Der

# Textus ornatior der Śukasaptati.

Kritisch herausgegeben

von

**Richard Schmidt.**

## ॥ श्रीगणेशाय नमः ॥

* *
*

सद्भ्यो यथार्हमभिपूज्य सप्रदचिणं प्रणामं निर्माय।
आत्मानं पुत्रविषयिणं कर्तुमुपक्रमे मेदिनीनायकप्रियः॥

भो तत्रभवन्तो भवन्तः प्रत्येकशो बृहस्पतिसमानवैभवाः। तर्हि मम संपत्तिरतिशायिनी। नाहं धनस्य विद्यमानस्य संख्यां कलयामि। परं तु मम तनयो नास्ति। किमत्र कारणम्। ततस्तैः समस्तैरपि संभूय जगदे। हरदत्त दत्तकर्णमाकर्णयतु भवान्। सर्वं जानीते। तर्ह्येतावदेव ज्ञानस्य किमिति गोचरतया विधुरो ऽसि। इतरे पदार्थाः सर्वे ऽप्युद्यमाधिकरणसामग्र्या प्रादुष्कारयितुं शक्याः। परं यशस्तथा संततिश्च सुकृतसंचयवञ्चनया न कथंचन तदुभयं साधयितुं शक्यते।

उक्तं च। पद्म कामयते कुन्ती तत्पुत्राणां वधूरपि।
सतीं वदति लोको ऽयं यशः पुण्यैरवाप्यते॥

मनःकाङ्क्षितो मनोरथस्तदानीमेवासाद्यते यदा परमेश्वरे निरतिशायिनी भक्तिर्जागर्ति। परमेश्वरानुग्रहं विना न कापि कामना फलाय कल्पते।

अभिहितं च। निरन्तरसुखापेक्षा हृदये वर्तते यदि।
त्यक्त्वा भवभवान्भावान्भवानीवल्लभं भज॥
पदे पदे निधानानि योजने योजने बिलम्।
अप्रसन्ने विरूपाक्षे कुतः क्षीरेण भोजनम्॥

इत्यभिहिते तेन हरदत्तेन परमेश्वरप्रीतिप्रकर्षोदयसिद्धये विविधदानपुण्यरुद्रजपकोटिहोमादि प्रमुखकर्म कर्तुमादध्रे। तेन सुकृतातिशयेन तस्य तनयः समजनिष्ट। तस्मिन्पुत्रजनिदिने हरदत्तः पटहोद्घोषपुरःसरं यावन्तो याचकास्तानदरिद्रानकार्षीत्। अर्थिनामवसरातिक्रमो नातिघटिष्ट।

तथा चाभिहितम्। पुत्रे जाते व्यतीपाते संक्रान्तौ ग्रहणे तथा।
खलु यज्ञे विवाहे च दत्तं भवति चाक्षयम्॥

तनयजनने यत्किंचिद्दानादि सुकृतं विधीयते तेन श्रेयसा बालकस्यायुर्वर्धते ग्रहाः सुग्रहा भवन्ति सर्वे ऽप्युपद्रवाः प्रद्राव्यन्ते।

उक्तं च। मन्त्रे तीर्थे द्विजे देवे दैवज्ञे भेषजे गुरौ।
यादृशी भावना यत्र सिद्धिर्भवति तादृशी॥

भावपुरःसरं मनसि विक्षेपं बिभ्राणः सात्त्विकवासनया यत्सुकृतसंचयमार्जयति तस्य सुकृतस्य फलमधिकत्वेन बोभवीति। भावानुसारिणी सिद्धिरधिगम्यते। तदनु तेन हरदत्तेन दैवज्ञानाहूय जातकर्म निरमायि। मदनसेन इति नामधेयं व्यदधत्। ततः क्रमेणान्नप्राशनचौलकर्मव्रतबन्धादिकं विधाय समस्तकलाकलापेभ्यः स्नातकमकारयत्। ततो वङ्गदेशनिवासिनः कुमुदकोशनामधेयस्य पुत्री नामतः प्रभावती प्रभावितीर्णसमस्तजननयनाह्लादकारिणी। तामेणीदृशं मदनसेनः पर्यणैषीत्। सर्वाङ्गसौन्दर्यविभ्रमवती सकलकलाकोविदा संगीतसाहित्यरसाभिनयविलसदसमशरशरनिकरहतिपरवशा परिरम्भसौरभ्यविजृम्भमाणविषमविषयरसविषमञ्जरी कटाक्षच्छटाक्षेपपरिक्षिप्तजनता घनतापसंपादितानेकलोकशोकसंवर्धनप्रभावती। तेन मदनसेनेन तत्तद्भावकलाकलापकुशलेन भृशमन्वरज्यत। तयोरप्यतिशायी प्रेमभावो ऽवर्धिष्ट। सुखेन तृतीयपुरुषार्थमसेविषाताम्। यदि मुहूर्तार्धमपि परस्परं न ददृशाते तदानीमनेकयुगावगाढविरहवेदनावैधुर्यमाविर्भाव्यते। अनया रीत्या तेन मदनसेनेन पुरुषार्थद्वयाद्विरतेन गरीयः सुखमनुभूय भूयसानेहसा कामपुरुषार्थरसोपसेवायां प्रावर्तिष्ट।

उक्तं च।

अमृतं शिशिरे वह्निरमृतं स्वामिगौरवम्।
भार्यामृतं गुणवती धारोष्णममृतं पयः॥
वाणी सारस्वती यस्य भार्या रूपवती सती।
लक्ष्मीर्दानवती यस्य सफलं तस्य जीवितम्॥
रम्या रामा यदि कुलवधूस्त्यागभोगाय वित्तं
वक्त्रे वाणी सरसमधुरा शंकरे चित्तवृत्तिः।
सद्भिः सङ्गो वपुषि दृढता सत्कुले जन्म पुंसां
धिग्धिग्दुःखं निरशनपदं स्वर्गमेकान्तदुर्गम्॥

इत्थं मदनसेनः समस्तमपि निजमुद्यममपहाय विषयोपभोग एवाश्रान्तविश्रान्तः। तदानीं तस्य पित्रा शिक्षितुमादद्रे। इत्यभ्यधायि च। रे मदनसेन। त्वमात्मीयं व्यापारं परित्यज्याहर्निशं दयितायत्त एव वर्तमानो ऽसि। तर्हि त्वदीयमेतद्व्यवसितमौचित्यं नानुषज्जते।

उक्तं च।

अतिव्ययो न कर्तव्यो नातिकामं परामृशेत्।
अतितृष्णानपत्यस्य अवश्यं निहते धनम्॥
अतिरूपाद्धृता सीता अतिगर्वेण रावणः।
अतिदानाद्बलिर्बद्धः सर्वत्रातिशयं त्यजेत्॥

अस्मात्कारणान्नातिशयः कामसेवायां त्वया कार्यः। पुरुषेण स्थानेष्वेतेषु संतोष एवादर्तव्यः।

उक्तं च।

संतोषस्त्रिषु कर्तव्यो मन्मथे भोजने धने।
त्रिषु चैव न कर्तव्यः तपसि ध्यानदानयोः॥

इत्थं पित्रा बहुशो ऽनुशासितो ऽपि मदनसेनो विषयासक्तमानसो न तदुदितमभिमनुते स्म।

आहुश्च।

न पश्यति मदान्धो ऽपि कामान्धो ऽपि न पश्यति।
चक्षुर्हीना न पश्यन्ति चार्थी दोषं न पश्यति॥
अर्थातुराणां न सुखं न बन्धुः कामातुराणां न भयं न लज्जा।
विद्यातुराणां न सुखं न निद्रा क्षुधातुराणां न रुचिर्न पक्वम्॥

कारणादेतस्मान्मदनसेनो न पितुः शासनमभिमनुतेतराम्। ततो ऽयं हरदत्तः पुत्रस्योपालम्भं त्रिविक्रमनामानं मित्रमाश्रावयत। ततस्तमाकर्ण्य त्रिविक्रमो हरदत्तमवादीत्। शृणु सखे। मन्मथर-

साक्रान्तस्वान्तो जनः कथमेकहेलयैवानयितुं शक्यः। हृदयान्तःस्थगितप्रथमरसावस्थोन्नाढा न किं सेवन्ते। अन्तःकरणगुणाहार्दबद्धसंबन्धशैथिल्यपरिपाट्या परिमृदितरणरणकतासमाश्रये व्यावहारिकी बुद्धिरियमुपवर्णयितुमुदर्कसंपर्कोपयोगिनी भवति।.....त्रिविक्रम त्वं जोषमास्स्व। अहमेव शनैः शनैरुपपत्तिविशेषैस्तं शिक्षिष्ये इत्यभिधाय हरदत्तो निजमन्दिरं समासदत्। तदनु हरदत्तः पुत्रस्य विषयोपभोगे निरत्युत्कर्षविशेषमभिवीक्ष्य तदसोढतया देहमात्मीयं परित्यक्तुं पर्यैच्छत्। त्रिविक्रमो वार्त्तामपि शुश्राव। ततस्त्वरमाणो हरदत्तोपान्तमाजग्मिवान्। तावतासौ हरदत्तः समग्रामपि प्रायोपवेशसामग्रीं निर्मायावस्थितो वर्तते। ततः तमतिचुकोप। हरदत्त त्वां विहाय नान्यं कंचन मन्दमतिमुपलभे। त्वं देहत्यागाय किमर्थं वृथैव प्रवृत्तो ऽसि। देहो ऽयं कियता महायासेनासाद्यते। देहेनानेन पदार्थचतुष्टयमपि साध्यं संपाद्यते। अस्य देहस्य कृते योगिनः सिद्धाः साधकाश्च नानारसरसायनादिषु परिचिन्वते।

अभिहितं च। पुनर्दाराः पुनर्मित्रं पुनः क्षेत्रं पुनः सुताः।
पुनः शुभाशुभं कर्म न शरीरं पुनः पुनः॥

किं च। आपदर्थं धनं रक्षेद्दारान्रक्षेद्धनैरपि।
आत्मानं सततं रक्षेद्दारैरपि धनैरपि॥

अत एव त्वमुचितं परिजिहानो ऽसि। आकर्णयतु नाम भवान्। पुत्रस्य श्रम ईदृशस्तव गृहीतुमयुक्तः।

उदितं च। जायमानो हरेद्भार्यां वर्धमानो हरेद्धनम्।
म्रियमाणो हरेत्प्राणान्नास्ति पुत्रसमो रिपुः॥

ततो हरदत्तो ऽप्यभाषीत्। अहमेतस्मात्पुत्रव्यसनजनितदुःखाद्द्वीयान्भविष्यामि। तादृशः प्रकारः कश्चिदस्ति चेत्तदानीमाचक्ष्व। तदानीं त्रिविक्रमस्तमाचष्ट। मलयपर्वते गुणसागरसंज्ञः शुको ऽस्ति। तथा हिमवतः शृङ्गे मलयवती नाम शारिका वर्तते। तौ द्वावपि मुनिशापतः पक्षिणावजायेताम्। तौ द्वावानेतव्यौ। ततस्तौ भवतः पुत्राय उपदेशं दास्यतः। ततो हरदत्तो ऽवादीत्। तौ कथं पक्षिणौ जातौ। केन दोषेण मुनिना शप्तौ। त्वमप्येतत्कथं जानीषे। तदेतद्वृत्तान्तमनस्तमितसामान्यं भवानवादीत्। तच्छ्रुत्वा त्रिविक्रमः शुकशारिकयोः प्रथमवृत्तान्तमभ्युदितवान्। आकर्णय मित्र राजवैश्यवर्य मानसं सर उत्तरस्यां दिशि योजनमात्रे पर्वते निवसत्येकम्। तत्र चैकस्तपोनिधिनामधेयस्तपोधनो बहुभिर्मुनिभिरुपासितः समास्ते। स चैकस्मिन्दिने विद्याधननामानं शिष्यं देवार्चनाय पुष्पाण्याहर्तुं प्रातिष्ठिपत्। स मुनीश्वरस्याज्ञासमयमनन्तरमेव निरगात्।

उक्तं च। षण्डः शाकुनिको मन्त्री क्रिमिकः स्तम्भसेवकः।
सद्यो ऽपवादी रोगी च सप्तैतान्सेवकांस्त्यजेत्॥

तथा। अलसं निष्ठुरं व्यर्थं क्रूरं व्यसनिनं शठम्।
असंतुष्टं कृतघ्नं च त्यजेद्दुष्टं महीपतिः॥

ततो ऽसौ पुष्पाहरणाय गच्छन्पथि पुष्पवाटिकामपश्यत्। दृष्ट्वा च तां पुष्पाण्युपचेतुमन्तः प्राविक्षत्। तत्र च घनसंपिण्डितपर्णपुञ्जसंपूरितं फलसमाहारात्समन्ततो नम्रं माकन्दतरुं मकरन्दरसोन्मदिष्णुमदनमङ्गलमहोदयं मनःसर्वस्वापहारकं लोचनगोचरं चकार। तस्य तले गन्धर्वमिथुनं ददर्श। सुरेश्वरपुरो गायको विश्वावसुसंज्ञको गन्धर्वराजः। तथा तस्य धर्मचारिणी मालावत्याह्वया। तद्द्वयमपि क्रीडाकौतुकपरवशं विपञ्चीं गृहीत्वा मिलित्वा गानं कुर्वाणमभूत्। तयोर्गायतोः स को ऽपि लयः प्रादुरभूद्येन साक्षाच्छ्रीपार्वतीनाथश्चन्द्रमौलिरिव स्वयं परितुष्यति। तच्छ्रुत्वा स विद्याधनः स्वं विधेयं विस्मृत्य तदेवाकर्णयंस्तत्रैवातिष्ठत्।

अभिहितं च। सुभाषितेन गीतेन युवतीनां च लीलया।
यस्य न द्रवति स्वान्तं स वै मुग्धो ऽथवा पशुः॥

इत्थं तयोर्विनोदपरवशयोर्गानं कुर्वाणयोः कालातिक्रमः प्रावर्तिष्ट सुराधीशस्य सेवासमयो ऽपचक्राम। ततः पाकशासनस्तत्राजगाम। शतक्रतुमाक्रान्तसंनिकृष्टप्रदेशं दृष्ट्वा प्रभुः कोपं करिष्यतीति भीत्या विश्वावसुमालावतीभ्यां शुकशारिकयोरधारिषातां रूपे। रूपान्यत्वं रचितमभिवीक्ष्य सुत्रामा सासूयं प्रोवाच। भवन्तौ मर्त्यलोके रूपाभ्यामेताभ्यां स्थास्यतः। तत्प्रभोः कोपप्रकर्षपरुषशापरूपं क्रकचसंपर्ककर्कशदुःसहं वचनमाकर्ण्य द्वावप्यवनतवदनावतिष्ठताम्। ततस्तौ दीनवदनावभिवीक्ष्य दिवस्पतेर्मनस्तरुणाकरुणाभरेणास्वादीकृतम्।

उदीरितं च। यस्य चित्तं द्रवीभूतं कृपया सर्वजन्तुषु।
तस्य ज्ञानं च मोक्षश्च किं जटाभस्मचीवरैः॥

एतल्लक्षणलक्षितं सतां चरितमभ्युपगन्तव्यम्। ततस्तेनाकृतकृत्ययोः शतक्रतुनानुग्रहः कृतः। मर्त्यलोके निवसतोर्भवतोर्मदनसेनाख्यस्य हरदत्ततनयस्योपयोगो भविष्यति। ततो ऽसावनुज्ञास्यति संतुष्टैव भवन्तौ। तदानीं पुनर्नगरमस्मदीयमवाप्स्यथ। इत्यभिधाय निरगात्संक्रन्दनः। तत्समस्तमपि चरितं विद्याधनो ऽवेक्षमाण आसीत्। ततः पुष्पाणामपहरणाय समयो ऽत्यतिचक्राम। ततः सुमनसः समानीय मुनिसमीपमुपयातः। ततो व्याहारि तपोधनेन। विद्याधन। वयं देवानर्चयितुं पुष्पाहरणाय प्रहिणुम त्वाम्। तर्हि समयातिक्रमं कस्मादकार्षीस्त्वम्। अस्मदीया देवपूजा विघ्निता। ततो मलीमसमाननं विधायास्थात्।

उदितं च। जीवन्तो ऽपि मृताः पञ्च व्यासेन परिकीर्तिताः।
दरिद्रो व्याधितो मूर्खः प्रवासी नित्यसेवकः।

अथ तेन विद्याधनेन गन्धर्ववृत्तान्तं तपोनिधेस्तस्य पुरस्तादुपवर्णितम्। तदाकर्ण्य मुनीन्द्रो ऽसावतो ऽदिष्ट। विद्याधन। विश्वावसुमालावत्यौ वासवो ऽभिशप्तवान्। ततस्तौ मर्त्यलोकमापततां ततस्त्वं मर्त्यलोकमवाप्स्यसि। ततस्तेनानुग्रहो याचितः। तदनु करुणाक्रान्तस्वान्तो मुनीन्द्रो व्याहृतवान्। त्वं मर्त्यलोके निवसन् जातिस्मर्ता भविष्यसि। हरदत्तेन समं मैत्रमुत्पत्स्यते तस्योपयोगाय भविष्यसि। ततः पुनराश्रममस्मदीयमागमिष्यसि। ततः सो ऽहं विद्याधनस्त्रिविक्रमो भूत्वावततार। अत एव शुकशारिकयोः प्रथमवृत्तान्तं जानानो ऽस्मि। तर्हि ते शुकशारिके ऽत्रागच्छतः। तथा करवाणि। ततः शुचिः स्नातो भूत्वा सौपर्णं मन्त्रं जप्तवान् शुकशारिकयोरावाहनमुद्दिश्य। ततस्तज्जप्तक्षण एव तौ पक्षिणौ पाणिप्राप्तावजायेताम्। तत एकस्मिन्पञ्जरे प्रक्षिप्य मदनसेनस्य मन्दिरे चित्रशालायाः पञ्जरे अन्तरास्थापयत्। हरदत्तत्रिविक्रमौ नियतौ भूत्वा यथाभिलषितं निरगाताम्। इत्थं भूयांस्यतिक्रान्तानि दिनानि। ततस्तया शारिकया बभाषे शुकः। भो प्राणनाथ। यस्मै कार्यायावामानीतौ तर्हि त्वं प्रयोजनविशेषेणास्मै मदनसेनाय न किमप्यभिदधासि। ततो ऽस्मदागमनस्य को नामोपयोगविशेषः। तदाकर्ण्य कीरो ऽपि गिरामुद्गारमाविरभावयत्। प्रिये त्वं यदभिधत्से ममापि मानसं तद्विमृशत्यहर्निशं परं प्रस्तावो न समापतति।

उदितं च। प्रस्तावसदृशं वाक्यं स्वभावसदृशं प्रियम्।
आत्मशक्तिसमं क्रोधं यो जानाति स पण्डितः॥

इत्थं कस्मिंश्चिदवसरे मदनसेनः शुकं व्याजहार। भो रामचन्द्र। वार्तामेकां व्याचष्टां भवान्। ततः शुकः प्रोवाच। शृणुष्वावहितो मदनसेन। अद्यतने समये त्वां विहाय नान्यः कश्चन सर्वतो ऽभिमानं

स्वमानसेनानुबध्नाति। धर्मार्थकामलक्षणपुरुषार्थचयसाधनेन त्वयैवासारस्य संसारस्य संसारता विधीयते ततो ते ऽप्यतिशयमोक्षः। प्रथमजः पुरुषार्थस्त्वयैव नाधिगतः। सर्वस्वमन्वभावि पुरुषार्थद्वयबाधनेन। एत एव पुरुषार्थाः पूर्वपुरुषैः पूर्वपरिपाट्या साधयितव्याः। व्यतिक्रमो न कर्तुमन्वेष्टव्यः।

आज्ञस्य।

धर्ममर्थं व्यतिक्रम्य केवलं काममाश्रितः।
अयशोभाजनं लोके परत्रापि च निन्दितः॥

अन्यच्च। विषमविशिखस्य व्यसनपरवशं त्वामभिवीक्ष्य तव पितरौ दुःखाक्रान्तस्वान्तौ स्तः। तयोर्दुःखवितरणे तव गरीयान्प्रत्यवायो ऽभीप्सितशोषमापादयन्नहर्निशं जरीजृम्भीति। यस्तु मातापितराववजानीते तं विहाय नान्यः कश्चन पतितो ऽस्तीति

गदितं च।

मातापित्रोरपोष्टारं क्रियामुद्दिश्य याचकम्।
परार्थे तिलहोतारं दृष्ट्वा चक्षुर्निमीलयेत्॥

तस्मादाकर्णयतु भवान्। एतदर्थे महाभारतीयमितिहासमेकं त्वां प्रति वक्ष्यामि। इत्यभिधाय मदनसेनं प्रति शुकः पौराणिकीं कथामेकां व्याहर्तुं प्रववृते। शृणु मदनसेन। मालवजनपदमध्ये नागपुरं नामाग्रहारः। तत्र विजयशर्माढ्यो ब्राह्मणो ह्यवात्सीत्। तस्य तनयो देवशर्माभवत्। तेन समस्ता अपि विद्या अभ्यस्ताः परं शान्तिर्मनस्युदयं नासादयति स्म। ततः पितरावभाषिष्ट। अहमन्या अपि विद्या अध्येतुं व्रजिष्यामि। ततस्तौ निषेद्धुं प्रचक्रमाते। ततस्तयोरुदितमवमत्य द्वितीयमेव देशान्तरं निरगात्। इत्थं देशान्तरे ऽटाट्यं कुर्वाणो ऽनेकतीर्थानि देवायतनानि पवित्रक्षेत्राणि दर्शं दर्शं दर्शादिषु विशेषपर्वसु पर्वसपर्यापरायणो भूत्वा तापसवेषानुसरणरसिकः परं वैराग्यमवलम्ब्य विषयवासनावितृष्णो निःस्पृहतया प्रवर्तमानः चित्रकूटपर्वतमाससाद। तत्र पवित्रमेकं तपोवनमालोक्य महामेरुप्रासादं शिवस्य दृष्ट्वा निर्मलजलपरिपूर्णं सरश्चाभिवीक्ष्य समासाद्य चाप्लवनं संध्योपासनं सुरपितृतर्पणं च विधाय प्रासादमासाद्य शिवमर्चयित्वा स्तोत्रादिना संतोष्य प्रणिपत्य च स्वचेतसि परमं समाधानमनुभूय तत्रैकस्य तरोस्तले निषसाद। पद्मासन उपविश्य नासिकाग्रे दृशौ विन्यस्य श्यामलाङ्गं चतुर्भुजं शङ्खचक्रगदापद्मोद्यायुधमाश्रयं श्रियः पुरोदेशावस्थितसंबन्धयोजितकरयुगलगरुडमित्यादिविशेषणविशिष्टं श्रीमन्तमादिनारायणं ध्यात्वा सांसारिकदेहाहंकारतापुरस्कृतव्यापारो परमचेतसोनिवारणतया सकलावरणपरिणताशयः क्षणं स्थितवान्।

देहभावं परित्यज्य निरालम्बनमाश्रितः।
आनन्दपदसंयोगी स योगी मोदते सुखम्॥
निद्रादौ जागरस्यान्ते यो भाव उपजायते।
तं भावं भावयेद्योगी द्विविधाभाववर्जितम्॥

एवमाकारविकारनिराकरणेनासौ देवशर्मा ध्याननिमीलितचक्षुरतिष्ठत्। तदन्वादौ तुन्दिलान्तःकरणो बहिर्विषयसंबन्धाभिवन्धिबोधविधुरो मध्यंदिनातिक्रममपि नाज्ञासीत्। ततो भिक्षानिमित्तं प्रतिनिरगात्। ततो ऽम्बरपदवीमवगाहमाना बलाका तस्योपर्यदूषयत्। यावता उपरि पश्यति तावता बलाकामालुलोके। ततस्तां सासूयमशपत्। शापवितरणसमयसमनन्तरमेव भुवस्तलं सा गतासुः पपात। तदवेक्ष्य देवशर्मा मनसि महान्तमनुतापमाससाद। वराकः प्राणी वृथैव गरीयांसं निग्रहं ग्राहितः। अल्पीयस्यपराधे दण्डबाहुल्यमासञ्जितं कोपपराधीनतया न किंचिदज्ञासिषं तपसो ऽस्मद्विहितस्य परिक्षोषः समवर्तिष्ट।

क्रोधो वैवस्वतो राजा तृष्णा वैतरणी नदी।
विद्या कामदुघा धेनुः संतोषो नन्दनं वनम्॥

नास्ति कामसमो व्याधिर्नास्ति मोहसमो रिपुः।
नास्ति क्रोधसमो वह्निर्नास्ति ज्ञानसमं सुखम्॥

इत्यभिधाय देवशर्मा तस्य दोषस्यापाकरणकाम्यया पुनरपि स्नानदेवार्चनादिकर्मावशेषं निर्माय समाधावुपविश्यैकान्तचित्तो भूत्वा कामपि मन्त्रानुवृत्तिं कृतवान्द्वैतभावपरित्यागेन।

अङ्गुल्यग्रेण यज्जप्तं यज्जप्तं मेरुलङ्घने।
व्यग्रचित्तेन यज्जप्तं तत्सर्वं निष्फलं भवेत्॥

तदनु निमित्तं निर्माय नगरान्तर्गन्तुं प्रक्रान्तवान्। ततो नारायणनामधेयस्य ब्राह्मणस्य गृहं भिक्षाहरणायागच्छत्। ततस्तदीयपत्न्या द्वारि गतं भिक्षुमवेक्ष्य भिक्षां दातुं पात्रं करे ऽकारि। तावता तस्याः पतिर्नारायणो गृहानगच्छत्। ततस्तया भिक्षापात्रं स्थापयित्वा क्षणमात्रं स्थातव्यमिति देवशर्मा व्याहारि। भर्त्रे जलपात्रं दत्त्वा स्नापनाय सलिलं समानीय स्नानसुरसपर्याभोजनादिसामग्रीसंपादनं संसाध्य देवशर्मभिक्षुनिमित्तं भिक्षामाहृतवती। ततो देवशर्मा तामवादीत्। एतावन्तं समयमहं द्वार्येव तिष्ठामि। त्वं विलम्बेन भिक्षां वितरिष्यसि। तर्हि गरीयान्प्रत्यवायस्तवाघटिष्ट। ततः सा भिक्षुमवोचत्। एकस्माद्विधेयविशेषादेकस्य बलवत्तरता। यस्यास्ति धर्मो ऽत्र यस्मिन्नुचितत्वमुख्यता स तेनादौ विधातव्यः। ततो ऽन्यस्मै प्रयोजनाय प्रवर्तितव्यम्।

गदितं च। अपूज्या यत्र पूज्यन्ते न पूज्यन्ते गुणान्विताः।
त्रीणि तत्र भविष्यन्ति दुर्भिक्षं मरणं भयम्॥

अस्माभिः पतिवरिवस्यानुसंधातव्या।

तथा हि। अयमेव परो धर्मो ह्ययमेव परं तपः।
पतिशुश्रूषणं यत्र तत्स्त्रीणां स्वर्गहेतुकम्।

एतावतास्मदीयं समस्तमपि व्यवसितं चरितार्थं भवति।

रचितं च। कोकिलानां स्वरो रूपं पातिव्रत्यं तु योषिताम्।
विद्या रूपं कुरूपाणां क्षमा रूपं तपस्विनाम्॥

भवादृशानां योगीश्वराणां क्षमैव भाव्या। तदानीमेवाविकलं योगस्य फलमासाद्यते। इतरथा व्यर्थः परिश्रम एवोदेति। ततो ऽसौ सरोषभ्रूभङ्गदुर्दृश्यतारकं न्यफालयत्। तदनु तया पतिव्रतयावादि। भवतां कोपेन किं नाम शक्यते कर्तुम्। कथमहं सा बलाका या कोपेन भवतो ऽन्तरिक्षादपतत्। एतदाकर्ण्य देवशर्मा विस्मयविवशः संजातः। अन्यप्रदेशजनितं वृत्तान्तं कथमेषा दृग्विषयीभावमापादयितुं प्रगल्भते। न ह्यसौ सामान्यसंभावनासंभाव्या भवति। अभिधायेत्थं तां दण्डवत्प्रणतवान्। व्याभाषीच्च। त्वयाहमुपदेष्टव्यः। तवेदृशमतीन्द्रियं ज्ञानं कुतस्त्यम्। ततः साश्रावयत्। यस्य प्राणिनो यो धर्मो ऽभिहितो ऽस्ति तं यथावदनुतिष्ठति। तर्हि स्वभावत एव ज्ञानोदयस्तस्मिन्नास्पदं संपादयति। मम पत्युरुपाचरणेन ज्ञानं जरीजृम्भीति। भवान्वाराणसीं गच्छतु। तत्र धर्मव्याधो नाम मृगयुरधिवसति। स तुभ्यं ज्ञानोपदेशं दास्यति। ततः साध्वीवचसासौ देवशर्मा वाराणसीं प्रति प्रस्थितवान्। शनैः शनैर्विश्वनाथनगरं मुक्तिक्षेत्रमासादितवान्। नगरमध्यमाविश्य तीर्थे समास्नाय श्रीविश्वेश्वरमभिपूज्य प्रदक्षिणं कृत्वा दण्डवत्प्रणिपत्य पवित्रमात्मानं विधाय धर्मव्याधं दिदृक्षुस्तदुपान्तमगच्छत्। ततस्तेन दर्शनसमनन्तरमेवाभाषि। किं पतिव्रतया प्रस्थापिता भवन्तः। तदाकर्ण्य तमवदत्। तयैव प्रस्थापितो युष्मत्संनिकृष्टमागतो ऽस्मि। ततो द्वावपि व्याधस्य निकेतनं गतौ व्याधेन देवशर्माणमासनायासनं

प्रचिक्षिपे। तदनु व्याधस्य वृद्धौ पितरौ तिष्ठतः। तयोरुपान्तं गत्वा द्रविणमार्जितं तत्पुरस्तादवस्थाप्य दण्डवत्प्रणिपत्य करौ योजयित्वा अतिथिरेको ऽभ्यागतो वर्तत इत्यवादीत्। तच्छ्रुत्वा पितरौ जगदतुः। अतिथिरागतश्चेद्दैवमस्मदीयम्। तस्य सपर्या ज्यायसी कार्या।

उक्तं च।

गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः।
पतिरेको गुरुः स्त्रीणां सर्वस्याभ्यागतो गुरुः॥
अतिथिश्चापवादी च द्वावेतौ मम बान्धवौ।
अपवादी हरेत्पापमतिथिः स्वर्गसंक्रमः॥

ततो धर्मव्याधस्तस्मिन्नतिथौ सत्कारमकार्षीत्। ततो देवशर्माभ्यभाषत। त्वं च सर्वज्ञस्त्वया धर्मोपदेशः कर्तव्यः। तदुदितमाकर्ण्य मृगयुर्जगाद। त्वं पतितस्त्वमुपदेशयोग्यो न भवसि। अतिथिरिति मत्वा माननीयो ऽस्माकम्।

यतो ऽभिहितम्।

विप्रो वाप्यथवा शूद्रश्चण्डालो वा गृहागतः।
अतिथिः पूज्य एवाच सर्वथा साधुवज्जुवि॥

त्वं पितृभ्यामुदितं न करोषि। किमर्थं तीर्थेषु भ्रान्त्वा श्रमं व्यर्थमापादयस्यात्मनि। तवैतद्विलसितं सकलं व्यर्थमेव। त्वं पुनर्गृहान्गच्छ पित्रोः शुश्रूषां साधीयसीं समाचर। एतावता स्वत एव ज्ञानमुत्पद्यते। अयमेव तवोपदेशः कृतः। ततो व्याधवचसा निजमेव निकेतनं निर्जगाम देवशर्मा। पितृभ्यां समागमत्। तयोर्मनसि तनयसमागमजनितं निरतिशयं सौख्यं प्रवर्तिष्ट। एतावतासौ देवशर्मा निष्पापः संजातः। अत एव मदनसेन त्वया पित्रोः परिचर्या कर्तव्या। एतावता त्वमपि विचित्रपात्रं भविष्यसि। काले पित्रोरुपासनमपहाय नापरं किमपि नृषु प्रार्थितफलप्रदं जागर्ति। पश्चैतद्विषये तवैकमुदाहरणमुपवर्णयामि। भागीरथीतरंगिणीतीरे पाण्डरपुरसंज्ञकं पृथु नगरम्। तत्र पुण्डरीकस्तु पित्रोरुपास्तिं महनीयामहर्निशमाचरति। तज्जाततपोऽतिशयसामर्थ्येन स्वयमेवाकुण्ठधामा वैकुण्ठपरिवृढो वैकुण्ठवसतिं शिथिलीकृत्य तमुपडुढौके। सो ऽद्यापि तत्रार्थ एवावस्थितो ऽभूत्। तत्स्थानं दक्षिणद्वारकात्वेन सर्वत्र प्रख्यातमाविर्बिभर्ति। एतावत्फलं पित्रोरस्ति परिचर्यायाः। तर्हि त्वमपि पित्रोः सेवामुपास्व। कथामेनां मदनसेनं प्रति शुको ऽभाषिष्ट। तदाकर्ण्य मदनसेनः कीरं गीर्भिरुपाचरत्। कीर त्वदीयप्रसादेन परमो बोधो मम हृद्युदियाय। इत्यभिधाय मदनसेनः पित्रोः समीपं प्रविव्रज्य दण्डवत्प्रणिपत्य करौ संयोज्य व्यजिज्ञपत्। एतावतो दिवसाननुषितसर्वार्थसार्थो ऽस्मि यो ऽहं भवतामादेशं न कृतवान्। तदेतद्विमानसुगतं समाजायत। अद्य प्रभृति प्रेष्ये यथादेशः प्रदीयते तथैतावत्प्रयोजनप्रेषणं मयि दातव्यम्। एतदाकर्ण्य हरदत्तः संतुष्य परं प्रमोदभरं प्राप्तवान्।

यथोदितम्।

यस्य पुत्रः पितुर्भक्तो भार्या छन्दानुवर्तिनी।
विभवो दानभोगाय तस्य स्वर्ग इहैव तु॥

ततः संतुष्य हरदत्तः पुत्रं प्रत्युवाच। त्वया कुटुम्बस्य पश्चाद्भागे चिन्तोद्वहनं कर्तव्यम्। अहं धनार्जनव्यवसायाय प्रव्रजिष्यामि। धनहीनः पुमांस्तृणस्यापि न विनिमयतामर्हति।

तथा चाभ्यधुः।

धनी पूज्यो धनी श्लाघ्यो धनी सर्वगुणाग्रणीः।
धनहीना न शोभन्ते निर्गन्धा इव किंशुकाः॥
यस्यार्थस्तस्य मित्राणि यस्यार्थस्तस्य बान्धवाः।
यस्यार्थः स पुमांल्लोके यस्यार्थः स च पण्डितः॥

यस्यास्ति वित्तं स नरः कुलीनः स पण्डितः स श्रुतवान्गुणज्ञः।
स एव वक्ता स च दर्शनीयः सर्वे गुणाः काञ्चनमाश्रयन्ते॥

अकारणं व्याकरणं तन्त्रीशब्दो ऽप्यकारणम्।
अकारणं त्रयो वेदास्तण्डुलास्तत्र कारणम्॥

इति पितुरभिहितं निशम्य मदनसेनो जनकं जगाद। मयि पुत्रे विद्यमाने यदि तत्रभवद्भिः प्रयासः कर्तव्यस्तदानीं पुत्रस्य क उपयोगः। यस्तु तनयो जनयित्रोः सपर्यायामननुयुक्तः किं तस्य जन्मना।

अभ्यधाच्च।

को ऽर्थः पुत्रेण जातेन यो न विद्वान्न धार्मिकः।
तया गवा किं क्रियते या न दोग्ध्री न गर्भिणी॥

यस्तु पित्रोः सपर्यया सुखं जनयति तस्यैव सफलं जन्म नेतरस्य।

तथोदितम्।

वित्तानुसारिणो धर्मः श्रद्धान्वितशिवार्चनम्।
पितुर्मातुः सदा भक्तिः सफलं तस्य जीवितम्॥

एकेनापि सुपुत्रेण सिंही स्वपिति निर्भयम्।
सहैव दशभिः पुत्रैर्भारं वहति गर्दभी॥

अत एव भवन्तो ऽत्रैव तावत्तिष्ठन्तु। अहमेव वाणिज्यविधानाय व्रजिष्यामि। इत्यनुज्ञामादाय निर्गतवान्। निजमन्दिरमासाद्य प्राणप्रियां प्रभावतीं प्रति प्रावोचत्। प्रिये प्रभावति। धनमार्जयितुं व्यवसायोद्देशेन द्व्यासुरस्मि। त्वया न कश्चिन्मद्विरहजन्यश्रमः समवलम्बनीयः। मयापि भवत्याः क्षणस्यापि वियोगः सोढुमशक्यः। परं जनकवचनमनतिलङ्घनीयमिति मत्वा गमनसंजायमानमना अस्मि। तद्विषमविशिखविषयविमुखं विषादविषविशेषपोषकं गुरुवचोविषवेदनायनातिशोषपरं पत्युः क्रकचकर्कशं वचनमतिदुःसहं श्रुत्वा निरस्तजीवितेव विध्वस्तापघना विगलिताङ्गसंधिबन्धा गलितकला परिहतप्रभा प्रभावती मोहानन्दसंदोहभूयस्या तापोष्णव्यथया गलगृहीतेव प्राणेश्वरं प्रति प्रोवाच। शृणुष्व प्राणनाथ। पितुर्वचनमनतिक्रमणीयं परमो धर्मः। परमन्यदप्यस्ति। यदुक्तं।

प्रावृट्काले यात्रा यौवनकाले पुरुषदारिद्र्यम्।
प्रथमस्नेहे विरहः त्रीण्यपि दुःखान्यतिगुरूणि॥

एतत्त्रितयमपि पुरुषस्यातिकष्टतरम्।

तथा च।

सिद्धे ह्यन्ने फले पक्वे नारीप्रथमयौवने।
कालक्षेपो न कर्तव्यः कालस्य त्वरिता गतिः॥

एतावत्सु प्रयोजनेषु पुरुषेणात्युत्सुकतया प्रयतनीयम्।

तथा च।

उत्कोचं प्रीतिदानं च द्यूतद्रव्यं सुभाषितम्।
कामिनीं प्रथमावस्थां सद्यो गृह्णाति बुद्धिमान्॥

इत्थं प्रभावती प्राब्रवीत्। परं न तत्तस्य चेतसि पर्यैति। तदनु हिरण्यगर्भगृहिणीहृदयंगमैः प्रियवचोभिः समाश्वास्य तां निरगात्। ततस्तयाभ्यधायि। मदनसेन तव मम चेत्तादृशं परमं प्रेमसामग्र्यं तर्हि मामीदृशीं परित्यज्य त्वया गमनं कथं क्रियमाणमस्ति। ततो ऽसावजल्पत्। अहं यत्र क्वापि गतवांस्तर्हि तत्रापि त्वं मम हृदये वसन्त्येवासि। एवं नयमिकदृशा जानीहि।

यथोक्तम्। गिरौ कलापी गगने च मेघा लक्षान्तरे भानुरथाप्सु पद्मम्।
द्विलक्षसोमः कुमुदस्य बन्धुर्यो यस्य मैत्री न च तस्य दूरम्॥

दूरस्थो ऽपि समीपस्थो यो वै मनसि वर्तते।
यो हि चित्ते न वर्तेत समीपस्थो ऽपि दूरतः॥

व्याहृत्येत्थं मदनसेनो निरगच्छत्। ततस्तया वज्रजलपरिप्लुते विलोचने अकारिषाताम्। तदालोक्य मदनसेनस्तस्याः समीपे समागत्य निबिडपरिरम्भसमारम्भसौरभ्यमभ्यस्यात्मीयपाणिनाश्रुपरिमार्जनं विधाय शुकशारिके अवोचत्। आकर्णयतां गुणसागरो मालावती च। इयं प्रभावती सर्वस्मिन्नपि विषये भवतोरुपहारे तिष्ठन्ती। भवद्भामेतस्याश्चेतसो विरहजन्यप्रलयकालसंकाशं कष्टं शनैः शनैरुक्तिविशेषैरपोहितव्यम्। इयं भवद्भ्यां हस्ते दत्तास्ति। एतस्या विरहो वर्धितुं न दातव्यः। इत्यभिधाय मदनसेनो वणिक्करणनिमित्तं मनीषितं कृत्वा देशप्रदेशमुद्दिश्य निरयासीत्। तदुपरि प्रभावती विवोढुर्विरहवेदनावस्थया विह्वलावयवा रात्रिंदिवं तदवस्थामवलम्बमाना स्नानोदकक्रियायामपि न स्पृहां बध्नाति। ततस्तस्या विरहव्यथाबाहुल्यमभिवीक्ष्य शारिका शुकमुवाच। रामचन्द्र। मदनसेनेन प्रभावती दत्तासीदावयोः। यदियं भवद्भिर्विरहव्यथाकदर्थनतो निवारणीया। तर्ह्येतां वियोगवनज्वलनज्वालाजटालजाज्वल्यमानापघनां मारकारागारविहारविक्लवक्लेशविशेषविगलिताङ्गसर्वस्वां विचक्षणो ऽन्तःशोकशङ्कुनिकारपरिकरमनाकुलमाबध्नानां त्वमेव किमिति कथाचरित्रेतिहासादिभिः कौतुकाधिकं जनयन्दुःखविशेषापाकरणेन न शिक्षयसि। तव मौनालम्बनमनुपदं तवैव वचनीयतामापादयिष्यति। ततो निशमितकान्तावचनः शकुन्तस्तद्वचनानुकूलकलितकलेवरकान्तसंकोचक्लिष्टान्तःकरणगणस्तामभाषीत्। प्राणाधिपे। स्त्रीणां चेतांसि चणिकानि दुर्वाराणि निर्वाहशून्यानि च। पश्यामि तावदेतस्याश्चेतसो ऽवस्थितायतिः किमुदर्केति। ततस्तदवबोधात्तदनुरूपं कमप्युपायं रचयामि।

तथोदितम्। अनृतं साहसं माया मूर्खत्वं चलचित्तता।
अशौचं निर्दयत्वं च स्त्रीणां दोषाः स्वभावजाः॥

इत्युक्त्वा पक्षी जोषमासाद्यातिष्ठत्। तदन्वेकस्मिन्दिवसे प्रभावती स्वस्योपत्यकायां स्थितवती। ततो विनयकन्दर्पेण पार्थिवकुमारेण तत्रस्था समन्मथावस्था कदर्थितानां स्वस्थकरणपरिणतदिव्यमहौषधी सा ददृशे। तदन्वनेककलाकोविदा वीक्षणक्षणाभिलक्षणाभिलक्षितहर्षोत्कर्षोत्पादनवैलक्षण्यास्तात्कालिकोत्तरविनिमयनियमितमनोवृत्तिस्विच्छाविहरणपरिहृतविग्रहाः श्रुतिसमुदितपरब्रह्मात्यन्तिकानुभवसंभाविताः स्तोकालोकशोकशङ्कूत्कीलनकोविदाः पत्युर्मनसि संश्रुत्य कृतमप्यात्मीयमपराधं विस्मारयन्त्यो व्यवहारे परमार्थे च नानोदाहरणानुगृहीतोपपत्तिसंपत्तिस्फुरिताधरा एवंविधा दूतीः प्रभावतीं प्रति जिघाय। ताश्च तस्याः संनिधानमागत्य शनैः शनैर्बहुविधां विबुधहृदयंगमां गोष्ठीं कुर्वन्ति मनोवासनानुरूपं निरूपयन्ति। अनेन प्रकारेण प्रभावत्या सह नैकट्यं प्रावर्तिष्ट। ततश्च व्याहर्तुमादद्रे। प्रभावति त्वं भर्तुर्वियोगं कस्माद्बिभर्षि। अविद्यमानमपि श्रमं निजे मानसे कस्मादारोपयसि। अद्यतनं दिनं द्वितीयदिने न निर्वहति। गतास्तु दिवसा न पुनरागच्छन्ति। अद्य त्वं निजावयवविद्यमानानुरागं तारुण्यं लावण्यं च किमिति किमिति वृथैव परिक्षपयसि। त्वं यद्वियोगं बिभाणासि स चेद्भवत्यां प्रेमपरवशः स्यात्तदात्मना समं किमिति न नयति। स तु पुरतोगताभिर्नितम्बिनीभिः समं दिव्यं विषयसुखमुपभुञ्जन्नास्ते। त्वं भर्तुर्भक्त्या किं न भक्षयसि। अनया पतिशुश्रूषया का नाम जातेति मह्यमेकामपि प्रदर्शय। परलोकोपभोग्यात्पातकाद्बिभेषि चेत्तदा स परलोकस्तत्पातकं च कस्य लोचनगोचरोपभावमापन्नं विजृम्भितम्।

तथाभिहितम्।

यावज्जीवं सुखं जीवेदृणं कृत्वा घृतं पिबेत्।
भस्मीभूतस्य देहस्य पुनरागमनं कुतः॥

तत्त्वमुपभोगविरहितमात्मीयं जन्म किमिति वृथैवातिवाहयसि। स्वेच्छया सुखोपभोगमाचरन्त्या भवत्या वयमपि साहाय्यभावं यास्यामः। अनेन राजकुमारेण विनयकन्दर्पेण समं भवत्याः संगमं कारयामः। एतावतापि जनुः सफलं भविष्यति। एतादृशैर्वचोभिस्तस्या मानसं भ्रमितम्।

उक्तं च।

संतप्तायसि संस्थितस्य पयसो नामापि न श्रूयते
मुक्ताकारतया तदेव नलिनीपत्त्रस्थितं दृश्यते।
अन्तःसागरशुक्तिमध्यपतितं तन्मौक्तिकं जायते
प्रायेणाधममध्यमोत्तमजुषामेवंविधा वृत्तयः॥
स्वातन्त्र्यं पितृमन्दिरेषु वसतिर्यात्रोत्सवे संगतिः
गोष्ठीपूरुषसंनिधावनियमो वासो विदेशे तथा।
संसर्गः सह पुंश्चलीभिरसकृद्वृत्तेर्निजायाः क्षतिः
पत्युर्वार्द्धकमीर्ष्यितप्रवसनं नाशस्य हेतुः स्त्रियाः॥

ततः सा प्रभावती भूयोभिर्भूषणैरात्मानं भूषयित्वा व्यभिचरणाय निर्गन्तुं प्रावर्तत। तदानीं शारिका पक्षिणं व्याभाषीत्। मदनसेनेन इयं प्रभावत्यावयोरुपहारे निवेशितासीत्। तस्मैषा व्यभिचारे प्रवर्तमाना। तत्त्वं कस्मादेनां न निवारयसि। तदनु कीर उदीरयामास। त्वं तूष्णीमास्व। यदभिधातव्यं तत्स्वयमेवैनामहं व्याहरिष्ये। यावता विहग उपायं विरचयति तावता शारिका प्रालपत्। प्रभावति यत्त्वं विधातुमभिलषसि तेन त्वं विनाशमवाप्स्यसि। इत्याकर्ण्य तया दूतीमुखमुदैक्षि। ततो दूती ररास। इयं पक्षिणी पापिनी निहन्तव्या या परेषामसुखाय प्रत्यूहव्यूहमाचरति। तदा प्रभावती समीपमागम्य पञ्जरार्गलमपाचकार। पाणिना धृत्वा शारिका विपादनीयेति मनसि प्रवर्तमानासीत्। तावता शारिका समुड्डीयापलायिष्ट। ततः सर्वा अपि बभाषिरे। निरगमदियं तदेव। साध्वजनिष्ट। ततः प्रभावत्या सकलवृत्तान्त आवेदितः। तच्छ्रुत्वा शुको ऽप्यकथयत्। तदेतद्रुचिरं व्यरचि। सर्वदैवाहं भवतीं मन्मथावस्थाभृशार्दिताङ्गीमालोके। किमपि भवतीमेतद्विषयं व्याहर्तुमन्विच्छामि। परं परेषां मनोभावं को नाम ज्ञातुमीष्टे। संसारे साध्वभिसरणं विहाय नेतरत्सुखं भूयसा जरीजृम्भीति। तर्हीदं त्वया साध्वाचरितम्। परमत्राप्यन्यदपि विद्यते। गुणशालिनीव संकीर्णावप्रसङ्गप्राप्ता उत्तरं कर्तुं प्रभवसि चेत्तदेतद्व्यायासविभाव्यं विधेयमङ्गीकुरु। इत्युदिता प्रभावती बभाषे। का नाम गुणशालिनी। कीदृशं संकीर्णं निस्तीर्णम्। तदुपवर्णयतां नाम भवान्। ततः शुको व्यावर्णयति। प्रभावती वयस्या पतिव्रता परिपृच्छति। इतीयं प्रथमा कथा इतरासां कथानां मूलपीठिकारूपा व्यावर्णिता। इति कथाकोशे कथावतारः॥

अथ चन्द्रवती नाम नगरी। तत्र भीमसेनो नाम राजा। तत्र मोहननामा वणिक्। तस्य भार्या नामतो गुणशालिनी। सा रूपेणातिशयं प्रकर्षं प्राप्ता। ततो वसुदत्ततनयस्तामीक्षितवान्। तद्वीक्षणक्षण एवायं मन्मथमथितसर्वार्थसार्थः प्रावर्तत। ततो ऽपार्थीकृतेतरव्यापारो दूतीभिस्तत्प्रार्थनां निरवर्तयत्। परं सा नोरीकृतवती। ततः कुट्टिनीकर्मनिर्माणोपायपरिपूर्णां पूर्णाभिधां मासोपवासिनीं प्रार्थयत दूतकृत्ये। यदि गुणशालिनी मामनुसरतीति त्वं चेत्करिष्यसि तर्हि यथा त्वं संतुष्यसि तथाहं निर्मिमे। यद्याचिष्यसे तद्वितरिष्यामि। तदानीं तया तथा करवाणीत्यङ्गीचक्रे। ततः सम्यङ्मुहूर्तमालोक्य गुणशालिनीगृहमगच्छत्। तया समं प्रत्यहं गरिष्ठां गोष्ठीमनुतिष्ठति प्रतिदिनं श्रीकृष्णविलासमल्लायोधकन्दुककेलिप्रमुखानि चरितानि गायति पुरातनबालत्वस्य गोष्ठीं निर्मिमीते। इत्थं तयोर्मैत्री समजायत।

तत एकस्मिन्दिने पूर्णायै किमपि दातुमुदधुनत्। ततः सा तन्न गृह्णीते। ममैतस्य भवत्या वितीर्णस्य कस्यापि वस्तुनो न स्पृहामावध्नाति मानसम्। यदहं त्वां वदामि तत्त्वयानुष्ठातव्यमिति सा गुणशालिनी तयोदितमुररीचकार। ततः पूर्णाब्रवीत्। यदि मदीयमभिहितं करिष्यसि तदानीमिदमर्थे त्वया मह्यं तथ्यवाक् दातव्या। ततो गुणशालिनी सत्यं प्रतिश्रुतवती। ततः पूर्णा निजोदीर्णं तया समं निर्णीय व्याहरत। त्वया तस्मै सुरतं दातव्यम्। आत्मीयमभिहितं सत्यं कर्तुमना ह्यसि चेत्तदानीमिदं निजोदितं परिपालय। ततो गुणशालिनी पूर्वं तदाकूतमजानती तदुदितं प्रतिश्रुत्य पश्चाद्दूरविचारचित्ता संवृत्ता। एतस्या दुष्टायाः पूर्वमहमाशयान्नाज्ञासिषम्। अजानत्या मया प्रतिशुश्रुवे। किमतः परं विधानमवधातव्यम्। यदि निजवाचं सत्यां करवै तदानीं व्यभिचारतो दुरितमूरीकृतं करिष्यते। यद्यभिसरणं नाङ्गीक्रियते तदा स्वसत्यस्य दूरतः प्रवासः। इत्यमेकं संधित्सतो ऽन्यत्प्रच्यवते तुन्दिलाधरपानमैथुनवत्। तदनयोर्मध्ये किं विचारकोटिमाटीकरिष्यते। शरीरमप्याधीकृत्य सत्यत्यागो न भवितुं दातव्यः। इत्यं प्राच्यविपश्चिद्वचनोद्घोषणा प्रकाशते। यथाभिसरणे कृते तत्सत्यहानिर्न करिष्यतेतराम्।

तथा चोचिरे। असारः सर्वतः सारो वाचा सारसमुच्चयः।
वाचा सा चलिता येन सुकृतं तेन हारितम्॥
वाचा यद्यत्प्रतिज्ञातं शुभं वा यदि वाशुभम्।
तत्संदेहो न कर्तव्य इदमेव हि सांप्रतम्॥

इति विमृश्य गुणशालिनी पूर्णां बभाण। त्वयाभिहितं तवाभिप्रेतं पुमांसमानय। तावताहं परस्मिन्देवतालये निवसामि। ततः प्रदोषसमये पूर्णा तमानेतुं गतवती जनसंमर्दे तं नोपलक्षयन्ती तत्सादृश्यस्थगितमानसा गुणशालिन्याः पतिं करे गृहीत्वा तस्मिन्संकेतनिकेतने समानिन्ये। तदा तेन निजदयिता तया च निजपतिस्नोपलक्षितः। तर्ह्यभिधेहि प्रभावति। तथाविधे ऽस्मिन्संकोचसमये किमुत्तरमकारि तया। एतत्पुरस्तादस्याशङ्कामाचक्ष्व पश्चाद्याहि। प्रभावती विमर्शवती समजनि परं तदुत्तरं नाज्ञासीत्। तावता रात्रिरप्यत्यवर्तत। ततः शुकमप्राक्षीत्। शुको ऽपि व्याहार्षीत्। सा तं भर्तारं परिज्ञाय कचैर्निगृह्य चपेटाभिस्ताडयामास। त्वं मत्पुरस्तादस्याशङ्कं सदैवं व्याहरसि यदहं भवतीं विहाय नान्यां कांचन कामिनीं जानामीति। तवैतादृशं विसदृशं चरितं मया दृशापि स्प्रष्टुं न शक्यते। ततो मां जनकमन्दिरं प्रापय। नो वा राज्ञे आवेदयिष्ये त्वां दण्डयिष्ये। तदानीमसौ मोहनो गुणशालिन्याश्चरणयोरपतत्। ममायं महानपराध आयादिति भवत्या क्षन्तव्य इत्यभिधाय तां समतोषयत्। तर्हि प्रभावत्येवंविधं कर्म कर्तुं प्रभवसि चेत्तदानीं बाकुल्यविभाव्यमिदमादर्तव्यम्

इति प्रथमा कथा॥१॥

पुनरपि प्रभावती विनयकन्दर्पनिकेतनमुपगन्तुं पक्षिणं पप्रच्छ। शुको ऽभिदधे। त्वमपि यशोदावदुपायकल्पनां परिशीलयसि चेत्ततो याहि। तदाकर्ण्य प्रभावती कीरं प्रति प्रश्नमादृतवती। यशोदायाश्चेष्टितं व्याचष्टां भवान्। इति तयोदिते पतत्री गतोद्रेकः प्रत्यभाषत। मदनपुराभिधानं नगरम्। तत्र नन्दननामा नरपतिः पालयति भूतधात्रीम्। तस्य तनयो राजशेखरः। तस्य भार्या शशिप्रभा। सैकेन वणिङ्नन्दनेन नयनविषयमापादिता। तद्दर्शनसमयसमनन्तरमेवासौ मदनमार्गणप्रहतिजर्जरितशरीरपरिहृतधैर्यो भूत्वा युगपदवस्थाविशेषाननुभवन्नुत्तरस्थितहृदयः सदा तदाप्त्युपायं परिचिन्वंस्तदेकतानतापदवीमवगाहमानो विद्यते। परं समर्थस्य युवतिः कथं केन प्रकारेण समासाद्यते इति प्रतिदिनं चिन्तया शुष्यच्छरीरो गलितकलाधनः कृष्णपक्षशशीव परिशेषितनामधेयाश्रयो भूत्वावतिष्ठते। इत्यं तज्जननी तादृशीमवस्थामवेक्ष्य तमप्राक्षीत्। पुत्र त्वमित्यं वर्तसे। तव मनसि

यदुदितमस्ति तन्मत्पुरस्तादस्तत्त्वपं भवान्वदत्विति मात्राभिहिते ऽसौ चित्तस्थितं सर्वमभिप्रायं तस्या अग्रे उज्जगार। यदि शशिप्रभा मदङ्गसंगमङ्गीकुरुते तदानीं मज्जीवितमस्ति नेतरथा। तर्हि प्रभावति त्वमेव पूर्वमुपवर्णय। तस्याभिलाषो यशोदया कथमपूरि। यशोदा शशिप्रभां कथं संयोजितवती। एतदभिधाय यथोद्दिष्टं व्रजतु भवती। तदाकर्ण्य प्रभावती तद्विचारचिन्तासंतानवितानैकरसा प्रवृत्ता। परं न विवेद। ततः प्रातः पत्तरथं पप्रच्छ। सो ऽपि जगाद। आकर्णय प्रभावति। तदानीं यशोदया तपस्विनीवेषमालम्ब्य काषायधारं त्रिपुण्ड्रतिलकाङ्कितं गलगृहीतरुद्राक्षमालं तथात्मना सममेकं बन्धुमानीय तस्य स्कन्धे ऽष्टदलकलावष्टब्धदेवसंपुटं कुसुमकरण्डं चावस्थाप्य गरीयांसं समारम्भं परिकल्प्य तया चैका शुनी समानीता। इति परिकल्पितपरिकरा शशिप्रभाया द्वारदेशमगच्छत्। तत्रागत्य द्वारपालकानब्रवीत्। वयं सौराष्ट्रसोमनाथयात्रायै गत्वा मार्गे तीर्थविशेषानालोकमानाः समागताः। अद्य तु भृशं परिश्रान्ताः। अपरतो गन्तुं न प्रभवामः। तर्हि अद्यतनं दिवसमत्रैव निवसामः। प्रभातसमये पुरोगमनाय मार्गमुपलब्धमवलम्बामहे। इत्यभिधाय तत्रैव स्थितवती। ततस्तेषां पश्यतां तत्रैव गोमयोपलेपनं निर्माय निरमायि तया देवार्चनं देवतावनेजनं कृत्वा धूपदीपनैवेद्यानि विधाय दण्डवत्प्रणिपत्य संनिधायिनीं शुनीं समपूजयत्समस्तोपहारनमस्कारादिना। तच्चरितं सर्वे ऽप्यभिवीक्ष्य विसिस्मिरे। इत्थं प्रतिदिनं तत्रावस्थाय शुनीसपर्यां विधायान्ते दण्डवत्प्रणिपातनादिकं करोति। तां वार्त्तां शशिप्रभा शुश्राव। ततस्तत्कौतुकालोकनाय एकस्मिन्दिवसे शशिप्रभा तत्राढौकत्। तदनु तच्चरितं यशोदामपृच्छत्। कैषा शुनी। एतद्वृत्तान्तं मह्यमावेदयतु भवती। ततो ऽस्याः प्रश्नानुग्रहं दृष्ट्वा यशोदया नेत्रे अश्रुःपूर्णे अकारिषाताम्। अवादि च। शशिप्रभे कस्मादेतत्पृच्छसि। एतत्स्वरूपे ऽभिहिते तवापि गरीयान् श्रमो भविष्यति। तया तथाभिहिते सति शशिप्रभा तत्प्रश्नावबोधायाग्रहं भूयांसमकरोत्। ततस्तदाग्रहतारतम्यमालोक्य यशोदा तद्वक्तव्याय विविक्तप्रदेशमयाचत।

यतो ऽभिहितम्।

आयुर्वित्तं गृहच्छिद्रं रहस्यं मन्त्रमैथुने।
पायुध्वनिं चावमानं मतिमान्न प्रकाशयेत्॥

इत्यभिधाय रहसि वक्तुं प्रवृत्ता। शृणु शशिप्रभे। पूर्वमहमियं त्वं च शुनी चेति तिस्रः सोदर्यः स्वसार एकस्य वणिजो निकेतने वर्तामहे। इति सत्यहं व्यभिचारपरायणा निजेच्छया प्रवृत्ता। यं तु पुमांसं कामार्तं पश्यामि तस्मै सुरतोपभोगं प्रयच्छामि। त्वमपि यस्योपरि मानसमुल्लसति तस्मै सुरतं ददासि नान्यस्मै प्रयच्छसि। एतावदेव त्वयि वैगुण्यं प्रतिष्ठितम्। आर्तेषु दीयते दानमिति वाक्यपरिपालनसामर्थ्योपबृंहितं मम पूर्वजातिस्मरणलक्षणं ज्ञानमुदियाय त्वं तु निजाग्रहव्यग्रमानसा एतावद्वैगुण्याद्भोगविशेषं प्राप्तासि परं न भाग्यसंपदो ज्ञानविशेषस्य। अन्या चैषा द्वयोरप्यावयोर्ज्यायसी निजेन पातिव्रत्यविशेषेण निर्गीर्णा न कस्मै चार्ताय रतिं प्रयच्छति। तत्पातकव्रातेनैषा शुनीत्वमनीयत। तर्हि शशिप्रभे तवापारदुस्तरसंसारोत्तरणाकाङ्क्षा जागर्ति यदि तदा त्वयाप्यार्ताय पुरुषाय उपभोगः प्रयोक्तव्यः। एतावता स्वत एव ज्ञानमुत्पत्स्यते। तदानीं शशिप्रभा व्याभाषत। अतिदुस्तरमसारं संसारं निस्तरामि तत्रभवत्या एव प्रसादो ऽभ्युदयनीयः। त्वमस्मदीयकुलदेवता। तर्हि त्वया यः को ऽपि कन्दर्पकङ्कपत्त्रकर्कशपराहतिपरिगलितनिखिलधैर्यगाम्भीर्यैः पुमांश्चक्षुषा विषयीक्रियते स मत्संनिधानमानेतव्य इत्यभिधाय दण्डवत्प्रणिपतितवती। तत इतरस्मिन्दिने यशोदा आक्रान्तप्रान्तदशाभ्युदयोपक्रमं निजतनयमानीय अतिथिरभ्युपगतो ऽस्तीति शशिप्रभां ज्ञापितवती। सा तमागतमतिथिं परिणतिरसनिभृतोपचारैः चारुतया परिचितवती। तर्हि प्रभावत्येतादृशप्रपञ्चितोपायचातुर्यं परिकल्पसि यदि तथा विधेयविशेषे ऽमुष्मिन्साधनबुद्धिर्भव॥

इति द्वितीया कथा ॥२॥

पुनः प्रभावती विवक्षुः पक्षिणं चक्षुर्भ्यां लक्षीचकार। ततो ऽब्रवीत्पतत्री। देवि नरोत्तमनृपतिवज्ज्ञवती यद्यभियोगं निर्णेतुं पारयति तदेतदाद्रियताम्। ततः प्रभावती तद्वृत्तान्तमपृच्छत्। पतंगनृप चरितं तदभिधातव्यमिति समभिहिते शुकः सकलं कथाकौतुकमकथयत्। विशालपुराख्यं नगरम्। तत्र नरोत्तमो नृपतिः परिपालयति धरित्रीम्। स्कन्धावतारे तस्मिन्विमलनामा वणिक्। तस्य द्वे भार्ये। एका रुक्मिणी वर्णव्याहार्या इतरा च सुन्दरी संज्ञया। तद्वे अपि स्त्रियौ अत्यन्तमेव चित्तप्रमाथिन्यौ विलोक्य कुटिलाख्यो धूर्तः स्मरशरनिकरपरिहतिहतामन्दप्रमोदमहोदयः कमपि प्रकारविशेषं चिकीर्षुः आरिराधयिषुः षोडशोपचारप्रचाराचरणचातुर्यपरिचयवैचित्र्यचित्रीयमाणचित्तां तदभिमतदेवतां प्रत्यक्षीकृत्याभिलषितं प्रणुतादिति देवताभिहितः कुटिलो ऽप्यात्मनो रूपं विमलस्येवानधिकप्रमाणवर्णवयोऽवयवसौन्दर्यसमुदायानेकतरप्रतीयमानपार्थक्यं प्रार्थितवान्। ततो देवतया तथा भविष्यतीत्युक्ते तदाकृत्यवलम्बनसमयसमनन्तरमन्यस्मिन्दिवसे विमलं ग्रामान्तरगतमवगत्य स्वयं तदगारं गत्वा द्वार्गोप्तारमद्यप्रभृति भवतो द्विगुणं जीवितं भक्तं शीतत्राणपटीयसीर्द्विपटीः प्रयच्छामि तदानीमेवेत्याभाष्य मत्समानरूपः कश्चिद्यत्नतः प्रवेष्टुमदातव्य इत्यभिधाय धिष्ण्यमध्यमध्यास्य सौन्दर्यादिगुणगणोदारान्दारानाकार्य जाययोर्द्वयोः शुचीनि चीराणि अलंकारनिचयांश्च वितीर्य सेवकलोकमाच्छादनाशनप्रियोक्तिभिः परिभाष्य सर्वांस्तानात्मीयान्विधाय मनीषितान्भोगानुपभुञ्जानो दानपुण्यविशेषांश्च निर्मिमाणः सुखसंचयमासाद्याध्यवासीत्सः। ततस्तद्गृहिणीभ्यां परस्परं समकथ्यत कथापि। परिवृढो ऽस्माकं वराटीव्यये ऽपि भृशं व्यसीदत्। इदानीमेव संपदो दानभोगादिना समागमोदयमगणयन्संप्रयोगमादरीदरीति। तर्हि कमत्र चित्तपरिगतमाशयं कलयाम। किमात्मनि पुरस्तादनिष्टं दरीदृष्टमितः प्रकृतबाधेनागामिनो ऽपसर्गेण चेतसि वैकृतं किमप्याविष्कृतम्। तदा सा वार्त्ता विमलस्यापि श्रवणविषयमगमत्। ततो ऽशेषविधेयबाधेन विधुरितोपलब्धिर्धावमान एव निजागारद्वारमागत्य द्वारं प्रविविक्षन्द्वारगोपकेन गले गृहीत्वा परिलोठितो बहिर्निरयासीत्तथ्यविमलः। ततो ऽसावर्गलं गृहीत्वा द्वाःस्थानवादीत्। अहमेतन्निकेतननायकः। कस्मान्मामपसारयन्ति भवन्तः। ततो द्वाःस्थो ऽप्यवदत्। स्वामी वेश्मनो ऽन्तर्निवसति। त्वं परतो ऽभिसरेत्यभिधाय निराकरोत्तम्। ततो ऽसौ सत्यविमलस्तावत्त राजानमावेदयामास। देव महाराज। मदीये मन्दिरे धूर्तः कश्चिदागम्य प्रविश्य निवसति। मम समग्रामपि संपदं व्ययातिशयकरणेन विपदं प्रापयति। तर्हि मदीयो यो निर्णयः त्वत्पुरस्तात्कारयितव्यः।

यतो ऽभ्यधुः।

बलं मूर्खस्य मौनत्वं तस्करस्यानृतं बलम्।
दुर्बलस्य बलं राजा बालस्य रुदितं बलम्॥

एतस्मात्कारणान्ममात्रभवाञ्छरणमाविरासीत्। ततो महीपालस्तमलीकविमलमानेतुं मानुषाननूनुदत्। तदन्वस्य नृपतिशासनमायातमभिवीक्ष्य राज्ञे दर्शनविधेयेनार्पणाणि मौक्तिकानि रत्नानि वस्त्राणि चापरिचितपूर्वाणि समानीतवान्।

तथा चाहुः।

रिक्तपाणिर्न प्रविशेद्राजानं दैवतं गुरुम्।
नैमित्तिकं तथा मित्रं फलेन फलमादिशेत्॥

इत्थं राजानं दृष्टवान्। अथासौ राज्ञा निजगदे। त्वमेतदीयां संपदं किमिति व्ययीकरोषि। तच्छ्रुत्वावितथविमलो वाचं प्रापञ्चयत्। संपत्तिरियं मदीया। दस्युरसौ। तथैव सम्यग्विमलो वाचा जिजृम्भे। एवं स्थिते सति राज्ञो ऽपि सातिशयः संदेहसमुदय उदियाय। द्वावपि सादृश्यं स्पृशन्तौ न चानयोरेकस्य मिथ्यात्वसंज्ञानं संपादयितुं प्रभूयते केनापि। तर्हि प्रभावति भवत्यपि विचारयतु नाम।

स तयोर्निर्णयकथकघटककोटिं कथमटीकृतवान्। तदाकर्ण्य प्रभावत्यपि प्रतिभाविजृम्भमाणविचारचातुर्यपरिणतिमवगाहमाना तमस्विनीमनीनिषत्पारम्। परं ततो न तन्निर्णयो बुद्धिदर्पणे प्रतिफलति। तथा प्रातः पृष्टः पक्षी प्रभावतीं प्रत्याह। तदा लवनीनायको विमलस्य द्वे स्त्रियौ समानीयाप्राक्षीत्। भवत्योर्विवाहसमये भवद्भर्त्रा भवत्योः कृते भूषणानि कानि कल्पितानि। तयोर्व्याहृतं श्रुत्वा द्वावपि विमलौ पृथगवस्थाप्य पूर्वोदितमेवापृच्छत्। तदुदितं सत्यविमलवचसा तादात्म्यमापनीपन्नम्। तच्छ्रुत्वा नृपतिः सत्यविमलं मानयित्वा स्वगृहान्प्रति प्राहैषीत्। धूर्तविमलाय चुकोप सत्यविमलस्य संपत्तिं तस्यैवाकरोत्। तर्हि प्रभावति निर्णयादावित्थं प्रतिभाप्रभावप्रभुतामालम्बसे चेत्तदानीमत्युत्कष्टमवगाह्यमेतदङ्गीकार्यम्॥

इति तृतीया कथा॥३॥

पुनः प्रभावती उपपत्युपान्तमीयुषी पतंगपुंगवं जगाद। सो ऽपि बहुसुतमन्त्रीवत्समासन्नमायासघनं कार्यं निस्तरीतुमीशिषे यदि तदानीमनुतिष्ठेति प्रभावतीमवादीत्। सापि कथं बहुसुतमन्त्री सायासं कार्यं निस्तीर्णस्तदभिधत्स्वेति। ततः सो ऽपि तत्प्रसं वक्तुं प्रचक्रमे। सोमपुराख्ये नगरे सोमशर्माभिधो ब्राह्मणो न्यवात्सीत्। तस्यैका कन्या। न कश्चिदपि तामुद्वहते अलक्षणपरिचितसर्वाङ्गत्वात्। इत्थं सापि विवाहसमयमतिनीतवती। ततस्तस्याः पिता तां सह नीत्वा तद्वरदर्शनाय प्रदेशविशेषानाक्रामद्भूयसः। न कश्चिदपि तां वृणीते। तदनु जनकस्थानं नाम पुटभेदमाससाद। तत्र गोविन्दो नाम विद्यार्थी मठे विद्याभ्यासं प्रगुणयति। स सोमशर्मा तस्मै स्वां दुहितरं ददौ। स गोविन्दो बहुभिर्निवार्यमाणो ऽपि परं तां पर्यनैषीत्। ततः पिता तामुद्वाह्य निजं नगरमाजगाम। स गोविन्दो भार्यया सह तत्रावस्थातुं प्रववृते। तदनु दिवसेष्वतिक्रान्तेषु तया जायया स गोविन्दो ऽभ्यधायि। यदाप्रभृत्यहं भवतोद्वाहिता तदानीमारभ्य भक्तभोज्यविशेषो न क्वचिदासाद्यते। आत्मान्धसा हीना बुभुक्षया म्रियमाणास्मि। तर्ह्युत्तिष्ठत। यामो मत्पितुर्गृहान्। तत्र गतानामस्माकं पितृदर्शनं भविष्यति। श्वशुरो मानयिष्यति भवतो वसनादिना। अत्र तु को ऽप्युपायविशेषस्तिष्ठति। स गृहमस्माकमापादयति।

तथा चोचिरे। यस्मिन्देशे न संमानो न वृत्तिर्न च बान्धवाः।
न च विद्यागमो नापि धनं तत्र स्थितिः कथम्॥
स्थानत्यागं प्रकुर्वन्ति सिंहाः सत्पुरुषा गजाः।
तत्रैव निधनं यान्ति काकाः कापुरुषा अजाः॥

इत्थं तया जाययाप्यशब्दि। गोविन्दस्तु न तन्मनसि कुर्वन्पुनरब्रवीत्। वचनमेतत्तथ्यमुपपन्नं न नीतिपदवीं दवीयसीं प्रकल्पयति। यत्र प्रदेशे पुंसो नोद्यमविशेषः कश्चिन्न तेन तत्रावस्थातव्यम्। परं श्वशुराश्रयं श्रितवतां शास्त्रे लोके ऽपि नितरामवमत्यता विद्योततेतराम्।

तथा चाभ्यधुः। उत्तमाः स्वधनैः ख्याताः पितृद्रव्येण मध्यमाः।
अधमा मातुलैः ख्याताः श्वाशुरैश्चाधमाधमाः॥

गोविन्देनेत्थमभिहिते ऽपि परं तया दुराग्रहो गृहीतः। बलादेव सा तं नीतवती निजजनकसमीपोद्देशम्। ततो गोविन्दः शताङ्गं सज्जीकृत्य तमधिरुह्य द्वावपि निरगाताम्। ततो गच्छतोर्मार्गे केशवः सहप्रस्थायी संगतवान्। दवीयसि वर्त्मनि तेन समं गरिष्ठां गोष्ठीमनुतिष्ठन् गोविन्दस्तमपि शकटमारोपितवान्। तदनु मार्गे मूत्रमुत्स्रष्टुं गोविन्दः स्यन्दनादवारुहत्। ततो ऽसौ केशवस्त्वरितं गोमाल्लच्यानडुहो प्रतोदेन तूर्णगत्या प्राणुदत्। तदनु शकटोपरि परपुरुषेण समं संजातमनीषिणी

जाता। विविक्ततया द्वयोरपि हृदंतुदः सातिशयः कश्चन प्रेमा प्रावर्धिष्ट। तदनुसारी गोविन्दो ऽपि शकटमाटीकते स्वाकपटस्नेहः शकटमारोढुं प्रावर्तिष्ट। ततो गोविन्दः केशवेनोल्लुठ्य परतः परिचिक्षिपे। अनुयास्यसि यदि तदानीं साधुतया शिक्षयिष्यामि। मदीया जाया मदीयः शकटः। न निश्चिनोमि त्वां कुतस्त्यं पारिपन्थिकम्। कस्माच्छकटमारूढवसि। इत्थं करुणया शकटमारोपितः केशवश्चण्डालचण्डताममण्डयत्। इत्थं तयोर्विवदमानयोः गोविन्दस्तु नरदेवमावेदयत्। नृपसमक्षं व्यवहारो ऽजायतोभयोरपि। एको वक्ति मदीयेयमिति। इतरो ऽपि तथैव। तत्रत्याः सभासदः स्त्रियं तामप्राक्षुः। कस्य त्वं जायेति। तया संजातनूतनमैत्रो धूर्त एव भर्तृत्वेन परिगृहीतः। तां दृष्ट्वा गोविन्दो जगाद। पापमेतदभिलाषमनीषया व्यवहरमाणा वर्तते। तदनु पृथ्वीप्रशास्ता प्रधानिनं बभाषे। त्वया स विवादो निर्णेतव्यः। तर्हि प्रभावति त्वमेव प्रतिभानवती भूत्वैतदुत्तरं वावदीहि। केनोपायेन विवादस्तयोरनुद्यत्। ततः प्रभावती चिन्तावती बभूव परं न हृदयसंदेहमपनुदती। ततः पृष्ट्वा शुकं तदुत्तरदानोत्सुकं चकार। तदानीममात्यस्तां स्त्रियमवोचत्। भवन्तौ संवसनान्निरगाताम्। तर्ह्यस्यां त्रियामायां किमभ्यवहारि। तथा चैतदेव गोविन्दकेशवौ च प्रश्नीकृतवान्। स्त्रीव्याहृतेन गोविन्दगदितं संगतमबध्नात्। ततः केशवमवमत्य गोविन्दाय तां स्त्रियं वितताार। प्रभावति प्रभाववैभवमेतादृशं भावयसि चेत्तदानीमेतदादरणीयम्॥

इति चतुर्थी कथा ॥ ४॥

पुनरपि यामिनीमुखे विनयकन्दर्पसमीपमियासुः प्रभावती प्रालपदिति पक्षिणम्। सो ऽपि स्वोपरि पर्याप्तं तमपराधमपरस्योपरि चेत्तुं बालसरस्वतीवद्बुद्धिवैभवेन प्रभवसि चेत्तदानीं संजीवतामिति प्राजल्पत्। प्रभावत्यपि बालसरस्वत्याश्चतुरचरितमवबुभुत्सुः कीरं गीर्भिरुदीरयत्। सो ऽपि चरितं तत्प्रभावतीमवजिगमिषुर्वाचं प्रापञ्चयत्। आकर्णयतु कुमुदनन्दिनो। उज्जयिन्यां गुणगणप्रागल्भ्येन जगत्त्रयजयिन्यां नगर्यां समाक्रान्ताक्राभद्विषत्पराक्रमो विक्रमार्कः। स सागराम्बरां यथावदाहार्षीत्। सकलकलाकुशला कामकलिका नाम कलाकलापानुभवकौतुकसंजीवनप्रथमाङ्कुरा महीपतेः सान्द्रानन्दामन्दनिष्यन्दोदबिन्दुसंदोहबन्धुभवदविरलविलसिततरलतानलविसृमरस्मरसमरसमारब्धतरंगितानङ्गरसपरिरम्भसंरम्भसौरभ्यलहरी विहारोचितप्रयासा कामिमनोरथपात्रं परिजृम्भते स्म। सापि च पृथ्वीपतेः पुरो निजं पातिव्रत्यं नितरां प्रकटीकरोति। त्वं मत्प्राणनाथः। आवयोर्देहत्वतैव द्विभिदा चित्तगत्या तु न द्वैतवृत्तिपरिक्लृप्तिः प्रबलीभवतीति वचोविशेषादिशां पतिं आवयति राजचरणमुद्रासुद्रितमालीयोत्तमाङ्गमङ्गीकुरुते नियमरचितां कुलशीलसंपत्प्रदां तुलसीं पत्युः पादयोरर्पयति अभ्यवहृतेः पूर्वम्। ततः कस्मिंश्चिदेकस्मिन्नहनि भूभर्ता महिषी चैकभाजन एव बुभुजाते। तदा पृथिवीपतिः प्रथमास्वदां प्रियां प्रत्याह। निःसीमानं स्वादुमहिमानं समुद्द्योतयन्त्यद्यतना मीनाः। तत्किमिति न भवतीभिरभ्यवहृतिविषयतामापद्यन्ते। ततस्तयाभ्यराखि। किमिति प्रभुभिरसमंजसमभिधीयते। अतितीव्रसतीव्रतपरप्रकर्षप्रभावप्रदं चरितमिदमस्मदीयं नावदधति भवन्तः। मत्पतित्वमापन्नान् श्रीमतो ऽत्रभवतः परिहृत्य पुंनामपरिमितपदं पदार्थं नाहं दृशा स्पृशामि किं पुनस्तदुपभोगं हरिहरीत्यभिधाय श्रवणौ पाणिभ्यामप्यधात्। ततस्तादृशं तत्समीरितं निशम्य स्थालस्थो मत्स्यो ऽहसिष्ट। तदालोक्य भूपालः परं विषादमासाद्य स्थलादुदस्थात्। ततो गण्डूषाचमनादिना शुद्धिमात्मनो विधाय ताम्बूलं स्व्यकार्षीत्। ततः प्रातः प्रातस्तनीं क्रियां निर्माय निर्मर्यादविक्रमो विक्रमार्कः संसदमासदत्। तत्र चानेकशो विपश्चितः स्वादेशिनः सूचनचणा एव स्वमनीषानिषण्णततवचःप्रपञ्चेन परेषां चेतसि पराजयं कर्तुं प्रभविष्णवो ध्वनितैरेवाध्वध्वान्तविध्वंसकाः सर्वज्ञादिगुणगणैः प्रकटीकृतमहिमातिशया नृपतेः पुरस्तादध्यासामासुः। राजा च तान्मत्स्यहासकारणमप्राक्षीत्। ततस्तदनिमेषहसितं न को ऽपि विपश्चिद्विवेक्तुं शक्नोति। तदनु

ते मौनमेवालम्बिरे। भूपो ऽपि सर्वेभ्यो विद्वद्भ्यो ऽक्रुध्यत्। एतावन्तः सर्वे भवन्तः भट्टपण्डितव्यासपुरोहितप्रधानमुख्या यदि यदेव ज्ञानक्रियाव्याप्तिं न परिशीलयन्ति तदानीं को नामास्माकं युष्माकमुपयोगः। तर्हि भवद्भिर्मदीयजनपदान्निर्गन्तव्यम्।

अभ्यधुश्च। काके शौचं द्यूतकारे च सत्यं सर्पे क्षान्तिः स्त्रीषु कामोपशान्तिः।
क्लीबे धैर्यं मद्यपे तत्त्वचिन्ता राज्ञो मित्रं केन दृष्टं श्रुतं वा॥

ततस्तैः सर्वैः संभूय राजा विज्ञप्तः। देव दिनपञ्चकमस्मभ्यमेतद्विचारपरिचारणाय दातव्यम्। पञ्चभिरहोभिर्मत्स्यहासस्य हेतुं व्याहरिष्यामहे। धरित्रीश्वरो ऽपि तत्तदुदीरितमुररीकरोति स्म। ततः संसर्गविसर्गे सर्वे ऽपि स्वान्स्वान्गृहानगमन्। मन्त्री च निजागारमागत्य उग्रचिन्ताग्रहग्रस्त उपाविशत्। तदनु तत्कन्या बालसरस्वती तदन्तिकमागत्य जनकं जगाद। तात चिन्तासंताननितान्तस्वान्तानाकलयामि किमु तत्रभवतः। तर्हि तत्कारणं ममापि व्याहरणीयम्। तथोक्ते तु तया अमात्यो ऽपि स्वापत्यं प्रत्याह। त्वं बालिका। किमेतया चिन्तया ते। त्वया दीव्यन्त्या सुखेनावस्थातव्यम्। तच्छ्रुत्वा सापि प्रासूत सरस्वतीम्। किमिति भवन्त एवमभाषिषत।

यतो वदन्ति। युक्तियुक्तमुपादेयं वचनं बालकादपि।
अन्यत्तृणमिव त्याज्यं व्युक्तं पद्मजन्मना॥

ततस्तेन तत्कारणमुपवर्णितम्। तन्निशम्य बालसरस्वती बभाण। तात एतावतैव किमिति चिन्तासंतानप्रकर्षमातनोति। इमं हेतुमहमेव व्याहरिष्ये। तदानीं राजा विज्ञप्तः। देव मत्स्यस्य हासहेतुं मत्कन्यका व्याहरिष्यति। तदाकर्ण्य तदानीमेव नृपतिरपि तामानय इति राजाप्यागत्य सभामभासयत्। बालसरस्वत्या आसिकामुपबबन्ध। तामप्राक्षीत्पृथिवीश्वरः। तयापि ततः प्रतीयते स्म। देव त्वं सर्वज्ञः सकलकलाकलापकुशलः। तर्ह्येतस्यार्थस्य प्रष्टव्ये नान्यः समुचितौचित्यमत्यन्तमाबध्नाति।

ऊचुश्च। अश्वप्लुतं वासवगर्जितं च अवर्षणं चाप्यतिवर्षणं च।
स्त्रीणां च चित्तं पुरुषस्य भाग्यं देवो न जानाति कुतो मनुष्यः॥

इत्येतादृशं स्त्रीणां चरितं देवानामपि विज्ञानस्य न विषयीभवति। मायाशतमप्यस्ति यो न तासां चित्तं किंचिदपि कलयति।

तथा चोक्तम्। गीतार्थो मानवो धर्मः तव शीलं वरानने।
स्त्रीशीलं वैष्णवी माया विस्मयाय मुहुर्मुहुः॥

त्वयैवेदं चारु विचारणीयम्। नान्यः प्रश्नार्हः। कः समीहते। इत्थं पापमत्याग्रहपरिग्रहं गृह्णीषे। तर्हि श्लोकमेकमहं गृणामि। तस्यार्थविचारमाचर। कृते ऽपि विचारे यद्यभिप्रायं न परिशीलयसि तदानीमहमावेदयिष्यामि।

यथा। राज्ञी न च स्पृशत्यस्मान्पक्वानपि महासती।
पुरुषाख्यांस्ततो राजन्हासिता स्म इति ध्रुवम्॥

श्लोकमिमं पूर्वं चतुरचेतसा विचारय। इत्यभिधाय बालसरस्वती निजागारमागमत्।

इति पञ्चमी कथा ॥ ५ ॥

पुनरपि नृपतिर्बालसरस्वतीमाहूतवान्। तिमिप्रमोदनिदानमपृच्छत्। तं प्रश्नमाश्रित्य सापि विश्वंभरेश्वरमश्रावयत्। एतत्कारणाद्भवतो ऽनुताप उदेष्यति। मण्डकागमनस्यानुयोगतो वणिजो जायाया

अजायत। तत्रापि तादृक्प्रकारः प्रादुष्करिष्यते। तदा राजापि तथा पृष्टवान्मण्डकागमनचरितम्। बालसरस्वत्यादध्यान। जयन्त्यां नगर्यां सुमतिनामधेयो विपणिर्न्यवात्सीत्। तस्य भार्या पद्मिनी। इत्थं कालकलितसुकृतसंस्कारस्य धनमपि पर्यहीयत। स तु तृणकाष्ठाद्याहरणदारिद्र्यमुद्रिकाद्रविणाहरणेनोदरपरिपूरणं विदधाति। इत्थं प्रवर्तमानो ऽसावेकस्मिन्दिने काष्ठभारमाहर्तुमरण्यं गतवान्। तदानींदिने वने ऽपि नासौ काष्ठान्यवाप्तवान्। एवं काष्ठविरहितः परामृष्टकष्टो गृहानगच्छत्। सलिलविहरलहरीपोप्लवमानसमन्तककुभं प्रावृड्मायान्तमभिवीक्ष्य संनिहितगणेशप्रासादमासाद्य उत्थितवान्। तत्र च गणेशाभिमुखं निरल्हादयत्। काष्ठघटितां गणेशमूर्तिं अद्राक्षीत्। तां दृष्ट्वा स्वमनसि समतुष्यत्। अद्यतनीं कुटुम्बभरणजीविकामेतद्गणेशमूर्तिकाष्ठभरेण कल्पयामि। अयमेवोपायो मम वृत्तेरित्यभिधाय कुठारं गृहीत्वा सज्जीकृतवान्। ततः प्रहृतिसमये गणेशो वणिजं व्याजहार। अरे क्रूरकर्मन्पापिष्ठतर किमेतच्चिकीर्षसि। सो ऽब्रवीत्। अहं त्वन्मूर्तिकाष्ठानि शकलीकृत्य भारं प्रकल्प्य क्रेष्यामि। तेन धनेनाद्यतनीं कुटुम्बजीविकां प्रकल्पयिष्यामि। इत्यभिहिते गणपतिरपि प्राजल्पदेनम्। तवायासबाहुल्यमालक्ष्य वयं त्वां प्रति प्रसीदामः। त्वया प्रत्यहं प्रातः आगन्तव्यं मत्पुरस्तात्सघृतशर्करं मण्डकपञ्चकमत्रावतिष्ठते तत्त्वया गृहीत्वैव गन्तव्यम्। तद्भवतः समस्तकुटुम्बस्य सौहित्यसमर्थनमितरवितरणपर्याप्तमपि भवति। परमन्यस्मै यदि वक्ष्यसि तदा न स्फुरिष्यति। इति पौलस्त्यवचनं नियमं निरणैषीत्। ततः सुमतिस्तत्तथा निश्चित्य निजमन्दिरमाजग्मिवान्। काष्ठविरहितमवेक्ष्य तत्पत्नी प्रयत्नवती तं बभाषे। त्वमद्य किं काष्ठभारं नानैषीः। कथमद्य पाककल्पनं कुर्महे। तदनु सो ऽब्रवीत्। केनाप्युपायेनाद्यतनं दिनमतिवाहय वल्लभजनोपलक्षनप्रकल्पननियमनेन। प्रातरारभ्येतरेभ्यो ऽपि वितरणपरिणतिपरीणसशौठ्यमध्यंमध्ये जनस्यास्यते भवतीभिरपि। ततः संजाते प्रातरवगत्य वणिग्गणाधीशगृहानगच्छत् अच्छसौधावतः। विघ्नसंघातविघटनपटुतरघनघोषसंघर्षप्रहर्षजगत्त्रयस्य देवस्याग्रे शर्करासर्पिरवाञ्चितप्रपञ्चमण्डकपञ्चकमपि लोचनगोचरीकरोति स्म। गृहीत्वा स्वगृहमागत्य गृहिणीपाणिमलंकृतवान्। तदासावत्यन्तसौहित्यसाहित्यमापनीपन्नः सह कुटुम्बकेन। सुखेनेत्थं प्रवर्तमानो ऽसौ परमपरिणामप्रकर्षं पुष्णानः समयं नयति स्म। ततः * * * * * * * * * * * * * * * * * *

प्रागतिकष्टदुष्टदिष्टदिनेदिष्टतास्तव संप्रति परमशमं परिकर्मनर्मसक्तिनिर्मर्यादः कर्मविशेषमनिर्मिमाणः परानन्दमहोदयसमुन्मिषन्मतिरिति सर्वान्वः सुखिनः कलयामि पूर्वं तु दारिद्र्यमुद्राभृतोपद्रवा अभूत। इदानीं तु न तथा। किमेतत्कारणमिति तयाभिहिते पद्मिनी तामभाणीत्। मद्भर्ता व्रतमण्डकानानयति। तानभ्यवहृत्य सुखेन तिष्ठामः। कुतस्तानानयतीति न विदांकरवै। तदनु मन्दोदरी गिरमुदीरयामास। तर्हि त्वया निजपतिरिति प्रष्टव्यः। कस्मात्प्रदेशादेतानानयन्ति भवन्तो मण्डकानिति। तद्वाक्यपरामृष्टप्रश्ना पद्मिनी रमणं निजमनुयुनक्ति स्म। मण्डकास्तु कुतत्या आनीयन्त इति मत्पुरस्तादस्तरहस्यं समस्तमप्यव्याहतं व्याहर्तव्यम्। इत्याकर्ण्य वणिगपि तत्प्रत्युत्तरार्पणाय वाणीं प्रगुणीचकार। किमनेन वृथाग्रहपरिग्रहविलसनेन चिकीर्षितं भवत्या। एतदर्थावगमात्समीहितसिद्धिरपि का नाम। यदा परमेश्वरः प्रसीदति तदा सर्वमप्यपेक्षणीयमनायाससमर्थितमर्थापयति।

यथोचुः। अरिर्मित्रं विषं पथ्यं अधर्मो धर्मतां व्रजेत्।
अनुकूले जगन्नाथे विपरीते विपर्ययः॥

तर्हि त्वमेव तज्जिज्ञासितस्य माग्रहं परिगृहाण। तूष्णीमास्स्व। तेन न्यक्कृता सा मौनावलम्बनपरायणा तस्थौ। ततः प्रातरुत्थिता सा पुनरपि मन्दोदर्या समुदैरि। अहो त्वया मण्डकसमागमकारणमवगच्छामि न वा किम्। तदा तदाकर्ण्य पद्मिनी यामिनीसमतीतं चरितं व्याहृतवती। तन्निशम्य मन्दोदरी निजोदरोद्गारं गिरां व्याहारं व्यरचयत्। यस्य स्त्रीप्सितस्थितं यन्नतिरेव न स्पृशति तस्य दयितात्वं

व्यर्थजीविता भर्तुर्भार्या व्यवहारपरिहार्या सा। जाज्वलीतु जीवितं भवत्या इति। नराकूतप्रभामासादयाम्यापृच्छ्य भवत्यै व्याहरिष्यामीत्यवादीत्। ततो विभावर्यां सा भर्तारमन्वयुङ्क्त। तदाकर्णनात्तत्पतिः प्रत्यवदत्। पापिष्ठे पतीनां सुखपोषणशोषणाय किमित्युदितत्वरासि। त्वं मौनमवलम्बस्व। तेन तथाभिहिते ऽपि साग्रहं परिजग्राह। मण्डकागमनकारणमिदमेवाकर्णयसि यदि तदानीं जीवामि नेतरथा। इति तदाग्रहग्रहपरिगृहीतगलो ऽसौ वृत्तान्तमाश्रावयामास ताम्। तया च प्रतिवेशिन्यै प्राजल्पि। सा च तथा कारयिषुर्मन्दोदरी कुठारस्कन्धं विधाय गणेशमूर्तिगतदारुभेदनाय गणेशप्रासादं प्रति प्राणैषीत्प्राणनाथम्। एतावता तुभ्यमपि व्रतमण्डकान्वितरिष्यति प्रतिदिनं पशुपतिनन्दनः। निशम्येत्थं सो ऽपि सुमतिसमन्वितो विनायकनिकाय्यमासेदितवान्। तदनु लम्बोदरो ऽपि तयोर्विवत्सुबुद्धिनिबन्धनमभिप्रायमवबुध्यालम्बकबोध्यैः पाशैरबध्नात्। अलक्षितप्रहारास्तु शरीरस्योपर्युपर्यापतन्ति। एवं जीवितव्यनिरपेक्षस्पृहौ कृत्वा विघ्ननाशनः सुमतिमवादीत्। अरे दुष्टमते निवारितो ऽभूर्मया पूर्वं न कस्यापि पुरस्ताद्व्याहर्तव्यमिति तत्कस्माद्भवानभ्यधात्। निशम्येति गणेशमुवाच। किं नाम त्वामहं व्यावचम्। पूर्वजन्मदुरन्तदुरितपरिपाकात्। तर्हि भूमहेन्द्र विचारयतस्तवापीत्थं भवति॥

इति षष्ठी कथा ॥ ६ ॥

पुनः प्रभाते राजवृन्दसमभ्यर्चितशासनो विक्रमादित्यो बालसरस्वतीमानाय्य विसारिहसितकारणमप्राक्षीत्। साप्यूचे। देव केशवस्य योगदण्डेन यथाभूत्तथा ते भविष्यति। केशववृत्तान्तं वदेत्युक्ता सापि बभाषे राजानम्। श्रीपुरं नाम नगरम्। तत्र केशवनामा द्विजः। सो ऽत्यन्तं निर्धनः। ततः कदाचित्स्वस्यायतनान्निर्जिगमिषुर्महापुरुषमेकं चक्षुषोरतिथीचकार। तं निजासनाध्यासीनमासाद्य तस्माद्देशाद्देशमुपदिश्य मुहूर्तमात्रमवस्थाय तदन्वतिथिर्यदि कश्चिदस्मदीये दृशौ स्वदर्शवितरणेन चरितार्थयति तदानीं तदर्थितं निष्प्रत्यूहमापूरयामि सर्वमप्यहं प्रवेशनसामर्थ्येनेत्यभिहिते महात्मना स केशवः संनिहिताश्रयः सत्सकामनया परिणतचित्तवृत्तिरतिथिरहमातिष्ठामीति महात्मानमभाषिष्ट। ततस्तच्छ्रवणपरिणतसंबन्धविशेषाबाधावबोधने निधनाद्यनेकविधवेदनावैकल्यविशुद्धबुद्धिवैधुर्योद्धरणविविधविशेषविधिहलाकदर्थना समर्थिता पृथुप्रथनं प्रथमसंदसंपत्प्रदर्शसुदर्शनाश्रयाद्यश्रान्तासाराश्रमपरिश्रान्ताजनुतानुजं न संजीवनधनार्थिनमाह स महात्मा। त्वमेतं मनोरथपूरकं योगदण्डं गृहाण। प्रत्यहमसौ पञ्चशतीं स्वर्णानां तुभ्यं दास्यति। यद्येतच्चरितं परकर्णसंगतं विरचयसि तदानीं मदीयो योगदण्डः पुनर्मत्करसाद्भविष्यति न किमपि तव फलयिष्यति। तदाग्रजन्मासौ योगदण्डं गृहीत्वा निरगमत्। प्रसिद्धप्रभवां स्वपुरीं उपेयिवान्। ततः शृङ्गारसागरमहोर्मिकर्मिसर्गनिसर्गविग्रहवती विलासवती नाम कामिनां निःसीमानन्दसंदोहलहरी काचन तृतीयपुरुषार्थपरदेवता समुल्लसति स्म वेश्या। गत्वासौ तत्र तामनुसृत्य योगदण्डसमुद्भूतद्रविणवितरणेन त्यागभोगादि निर्मिमाणः प्रतिदिनं परमैश्वर्यसुखमुपभुञ्जानो महेन्द्र इव परमप्रमोदमुपासीदति स्म। तत एकस्मिन्दिवसे जरती विलासवतीजननी निजां तनयामिदमन्वयुङ्क्त। अयि केशवो ऽयं व्यवसायविशेषविशेषितं न कंचन व्यवहारं दधानो भवति। अयमेक एवाभिवीच्यते। तर्ह्येतस्यैतावद्धनं कुतस्तनमायातीति त्वयाग्रहपुरःसरमसौ प्रष्टव्यः। ततो विलासवती वसतेः केशवं धनागमनकारणमप्राक्षीत्। ततो ऽसौ केशवो न व्याहरति स्म। तदनु भावविलासवत्यतिशयसंभोगाविष्करणेन शृङ्गारलहरीपरिरब्धं मन्मथापारसागरसंततरागमहोर्मिकर्मीरितशर्मनिर्माणवर्मायिताक्रमचङ्क्रमेण विश्रान्तस्वान्तं सततैतोनताविश्रान्तं परिहृतेतरविषयपरिचयं च विधाय काञ्चनचित्तानन्दविगलितोपासकेतरव्यापारागमनकारणं तत्पृच्छति स्म। तदा स्मरपरवशो ऽसौ योगदण्डं समस्तद्रविणकारणमावेदयामास। ततः कुट्टिनी तं योगदण्डमपाहार्षीत्। स तु योगदण्डस्तत्प्रदेशान्महदभ्याशमासेदिवान्। केशवस्य धनागमो ऽपि न विद्यते। तदनु तं निर्धनमवबुध्य कुट्टिनी

निरसारयत्। तदा केशवो राजानं व्यजिज्ञपत्। देव मदीयो योगदण्डः प्रतिदिनं पञ्चशतीमष्टापदानां प्रसूते। स कुट्टिन्यापाहारि। ततः पृथ्वीपतिः सकुट्टिनीं विलासवतीमाहूय भवद्यामेतदस्यायजन्मनो योगदण्डो ऽपजह्रे। एतदीयः सो ऽप्येतस्मै दातव्यः। ततो विलासवतीकुट्टिनी वाचं प्राचीकटयत्। देव ब्राह्मणस्यास्य मानसं मत्ततयानुतिष्ठितं पितुर्द्रविणं च सर्वमप्यवयीत्। नेदानीं तदुपान्ते द्रविणकणो वरीवर्ति। ततो वयमेतस्य गृहसंनिधानागममत्यरीरसं न च द्वारि प्रवेशमपि प्रयच्छामि। तेन कारणेन तस्य कन्दर्पकरपदं पैशाच्यमापनीपन्नमस्ति। इदानीं स्वयं वदनविनिर्गतवचनं वदति संनिपातपरिसरार्त इव व्याजेन ह्रीयमाणो जागर्त्यहर्निशं परिक्षीणमन्दाक्षः। तस्यास्तथाविधमभिहितं निशम्य सर्वे ऽप्यास्थानीसमासीना इदमित्थमेवेति निरणैषत एतत्सर्वेषामपि हृदयपदवीमध्यारूढम्। सर्वे ऽपि केशवायाक्रुध्यन्। राज्ञा निजनीवृत्तो बहिरनीयत जनैः केशवः। तर्हि राजन्नमुष्मिन्कारणानुयोगे तवापोत्थमापत्स्यते। श्लोकस्यैवार्थमाचर। इत्यभिधाय सागच्छत्॥

इति सप्तमी कथा ॥ ७॥

नृपश्च बालसरस्वतीं निजपरिचरवर्तिनीं विधाय विसारहास्यप्रश्नमनुयुयुत्सु रणति स्म। बालसरस्वति पूर्वप्रश्नस्यार्थं वाग्ग्रथनेनोत्तरयतराम्। इत्यवगत्यामात्यसुता व्यायच्छद्वाचम्। देवाकर्णिते ऽमुष्य कारणे एकस्य वणिग्गृहिण्या यथाजायत सिद्धं गृहमपि ज्वलनज्वालाकरालितं तथा वाञ्छितजनसंयोगो ऽपि नाघटिष्ट। तत्कथं प्रावर्ततेति नरपतिनाभिहिते बालसरस्वती तद्वृत्तान्तमुपवर्णयिषुर्वाणीं रसनारङ्गनर्तकीमकार्षीत्। शङ्खपुराख्यं नगरम्। तत्र त्रिविक्रमनामधेयो विक्रमाक्रान्तसकलधरामण्डलो मण्डलेश्वरो महीमण्डलं परिपाति स्म। तस्यां पुर्यां मनोहरो रत्नदत्तनामा वणिक्। तस्य प्राणप्रिया सौभाग्यवती। सा चाविरतं परपुरुषनिरता। तां तथाविधां विज्ञाय ते गृहरक्षकाः तस्या बहिर्गमनमपि नाकुर्वन्। तदानीं तया मनोवयस्याभ्यभाणि। अद्य त्वं मदुपपतिं प्रदोषसमये पुरोवर्तिनि देवताप्रासादे मदागमनपर्यन्तं स्थापय। तदन्वहं गृहमग्निसंगतं करोमि। तदग्निजनितसंमर्दसमाक्रन्दनमध्ये ऽहमलक्षितप्रकारं तदुपकण्ठमकुण्ठितप्रचारा मण्डयिष्यामि निजावस्थारणरणकता तत्संनिधिसंगताङ्गसान्द्रानन्दलहरी परिरब्धशरीरसमुच्छ्रया गृहागता यहास्वामिबाधाविनाशाय प्रयतिष्यन्ते। मदागमनं निर्गमनं च न कश्चिदपि जिज्ञास्यतीत्यादेशं वयस्यायै प्रादात्। तदनु प्रदोषसमये निजमन्दिरं हुताशनपरिकल्पिताशनं विधाय सा स्वयं देवताप्रासादमाससाद। यावतासौ तत्संकेतनिकेतनं गतवती तावता तत्रावस्थित उपपतिर्नगरान्तराग्न्युपसर्गमवजिगमिषुस्तत्कौतुकावलोकनायायासीत्। सा शून्यमुपरमणविरहितं स्थानमासाद्य व्यावृत्य निजमन्दिरमयासीत्। तावता स्वगृहमपि जज्वाल। तस्या एवं विशिष्टम्। तत्स्वमनसि समुन्मिषति स्म। मया द्वयमन्वष्ठायि। द्वयोर्मध्ये नैकमपि मां प्रति फलप्रदमजायत। गृहमग्निसादजनिष्ट तथोपपतिमपि नोपातिष्ठम्। तद्वैवं क्षीप्सनेन तवाप्येवमुज्जविष्यति कुकीर्तिरिति प्रभाष्य तदीयं प्रश्नाग्रहं निगृह्य बालसरस्वती निजमन्दिरमाससाद॥

इत्यष्टमी कथा ॥ ८॥

ततो द्वितीये दिने मेदिनीनाथः पद्यार्थस्याविन्दको बालसरस्वतीमाभाषास्मदीयं हृदयं यथार्थावेदनेन विशदसंविदापादयेति निवेदिते विदितवेद्या सापि तं जगाद। राजन्नदसीये ऽभिधेये ऽभिहिते रणबाङ्कवलकुम्भकारस्य यथा पुरावर्तिष्ट तथार्थावेदनसामर्थ्येन प्रकल्पितजीवस्य विबाधा यथा कुम्भकारस्य तादृक्प्रकाराविष्कारस्तवाप्युपकारासंस्काराय प्रकल्पिष्यते। इति निमितवाचा समुचितं चालोच्योपचयप्रचयपरिचेयापचेताः प्रचेतीचिकीर्षुरात्मानं प्रत्युवाच सचिवसुताम्। चरितं तदाचक्ष्वेति प्रोक्ते बभाषे बालसरस्वती। कोल्लापुरं चेत्रम्। तत्रैकः कुम्भकारो ग्रामकूटो रणबाङ्कवल इत्यभिधा-

प्रथितः। स त्वेकदा भाण्डभ्रष्टमचीकरत। ततस्तदाभाषपरिपूरणं चिकीर्षुर्वेगितया गत्या गच्छन्स्खलिताङ्घ्रिणा पर्यपतत्। पातबलोपबृंहितो ऽवनिखनिचितगर्गरिकागलशकलस्तब्धललाटफलको निशितचन्द्रहासप्रहारप्रहस इव परितो हासमानो निशितहेतिशतसंनद्धे प्रसृमरविषमसमरविलसदसमसंपत्समुपभोगसभापतदतितरकालकरवालकवलितप्रत्यर्थिपार्थिवचमूसमूहसामर्थ्योद्दित्वराङ्गकण्ठचुम्बत्कङ्कटविशंकटाभिमानो भावयन्वीरवरां धरित्रीं सवीरसूं कलयामास। इत्थं च बहुभिरहोभिः प्रथमासितं संबन्धिनिवासं शिथिलीकृत्य स्थानीयान्तरमासाद्य तत्रत्यं पृथुप्रतिमं पृथिवीनाथं नेत्रयोरतिथीचकारोपधनपाणिः रणबाहुबल इत्यात्मनः संज्ञां पुरस्तात्प्राचीकशत्। तत्र राजा तस्यालोके विशालं करवालराजप्रहारमालक्ष्य साधीयान्प्रथनप्रथितप्रगल्भो ऽयं पदातिः कलितालिकफलकप्रहतिर्नरश्लाघनीयमूर्तिः सुराग्रगण्यो ऽभूच्छ्लाघ्याङ्गीकृतागमन इत्यात्मीयानभिधायात्मनः समीपे तं समाहितवान्। मानादिना सम्यक्संतोष्यात्मनः पङ्क्तौ स्थानं तस्याकल्पयत्। अनया रीत्या तत्रावस्थितानामसौ मान्यानामग्रगण्यो भूत्वा राजाभिमतात्तस्मात्सर्वे ऽपि परिवारा बिभ्यति। इति तदुपकण्ठे निवसन्तं वसुमतीपतिरेकदा तमप्राक्षीत्। अहो बाहुबलदेव षट्त्रिंशद्राजतलोपलक्षित विशालालोके क्षत्रियलोके किंकुलान्तःपातिनो भवन्तो भवतां च भीमसंगदिष्णुहृदयोदयभूतः समीके कस्मिन्प्रभासो ऽलिकमलंचकार। कौतुकं तदेव त्वाश्रावयन्स्वस्मान्। ततो ऽसौ तन्नृपादिष्टमागत्य तमेवेति व्याजहार। महाराज त्वं विष्णोः साक्षात्स्वरूपमसि। तर्हि भवतां पुरतो व्यलीकवाक्यानि प्रकल्पन्ते ऽस्तोकपातकव्रातासञ्जनाय। अहं जात्या तु कुलालः। न कदाचन मया दृशोर्गोचरीकृतमस्त्यायोधनम्। अहं भाण्डान्यावहन्नुपचिकीर्षुर्वेगितगतिः स्खलितचरणो न्यपतम्। ततो ऽवनिगतकर्परखण्डोल्लिखितललाटो ऽहं खड्गविदलनसंशयमुत्पादयन्परितो भ्राम्यामि। पणमध्ये ऽपि नाहं वीक्षितवानाहवम्। तदान्तर्निशम्येत्थं नरपतिराश्चर्यपरंपरापरामृष्टान्तःकरणश्चित्रन्यस्त इव स्थितवान्। अर्धचन्द्रं प्रदाय निराकृतो ऽसौ करीरकारः। तर्हि प्रभूतभूतनाथ स्थानविशेषे सत्यं व्याद्रियते कस्मिंश्चिदसत्यमपि। परमाग्रहविधानेनातिशयः कुत्राप्युपयोगोदर्को जागर्ति। श्लोकार्थमेव विचारय। इत्यभिधाय बालसरस्वती स्ववेश्म प्रविवेश॥

इति नवमी कथा ॥ ९ ॥

ततश्च भूयो बालसरस्वतीं स्वोपान्तकलितोद्देशां विधायानिमिषहसितनिदानप्रश्नोपक्रमाय प्रगल्भां चक्रे। बालसरस्वती तच्छ्रुत्वोदितवती। देव बह्वाग्रहानुग्रहसरणेन कस्मादेतत्पिपृच्छिषसि। निषिद्धो ऽपि नाग्रहं जिहाससि। यथा मातुलः पश्चात्परिश्रमं महान्तमवाप्नवान्स प्रकारस्त्वयि भविष्यति। ततस्तदवबुभुत्सुः किं तच्चरितमिति प्रत्याह पार्थिवः प्रधानपुत्रीम्। सापि तदाख्यानेन पृथिवीप्रभुं चाचरितार्थयत्। यथा शृणु भूपते। प्रतिष्ठाननामधेयं नगरम्। तत्रैकस्य मालिकस्य वाटिका। तत्रातिबहूनि वालुकफलान्यजायन्त। ततस्तमस्मिन्यामागत्य जम्बुक एको वाटीमध्यगतानि फलानि प्रत्यहमभक्षयत्। मालिकस्तु प्रतिनिशं रक्षणाय प्रयतते परं नासावासाद्यते। एकदा तु फलानि प्रदर्श्य परं सौहित्यमात्मानमातन्वानः तृषापरिगतो जलं पातुं गङ्गामध्यगच्छत्। जलमापीय तरंगिण्यास्तीरे क्षणं स्थित्वातीवदुर्बलं रजकस्य गर्दभं तृणानि चरन्तं लक्षीचकार। तस्यास्थिशेषाण्यङ्गानि वीक्ष्य मृगधूर्तो ऽवादीत्। मातुल भवन्तः किमिति दुर्बलदेहाः। श्रुत्वेत्थं गर्दभो ऽपि बभाषे। किं वच्मि भागिनेय। मदीयः पुत्रो निर्बीजको ऽहर्निशं करुणां निरुणद्धि। असाधारणं सिचयनिचयं परिक्षिपति ममोपरि। न रात्रावाहारं च प्रयच्छति। दिवसे स्वैतान्दूर्वाङ्कुरान्कवलीकरवै। एतावता बुभुक्षया स्तिमितमानस एव तिष्ठामि। कारणादेतस्मादहं दुर्बलकलेवरः। नान्यः कश्चन ममोपद्रवसंमर्दी वर्तते।

तथा चाभ्यधुः। क्षुधासमं नास्ति शरीरपीडनं
चिन्तासमं नास्ति शरीरशोषणम्।

विद्यासमं नास्ति शरीरभूषणं
क्षमासमं नास्ति शरीररक्षणम् ॥

तर्हि भागिनेय कुत्राप्यस्माकमाहारावाप्तिर्भविष्यति तथा क्रियतां नाम। ततः क्रोष्टा व्याचष्ट। अहं तुभ्यमाहारं संपादयिष्यामि। परं तवोदरमापूर्णं चेदेतावता त्वं न ङ्कारध्वनिमुन्निरिष्यसि। तावता ध्वन्युपादर्शितस्मृतिपथो ऽसावागत्य मामपि लगुडैस्ताडयिष्यति त्वमपि प्रहारशतविदलितदेहः श्रमं भूयः समुपेष्यसि। ततः प्रसभं संबभाषे रासभः। पूर्णे ऽपि ममोदरे नाहं ङ्कृतिध्वनिमादरीदरीमि। अमुष्मिन्विषये भाषेयं मदीया। इत्युक्ते प्रचण्डचण्डिमापाण्डित्याकाण्डोद्दण्डताण्डविताडम्बरः फेरुण्डी गर्दभसंभावितपश्चाद्भागः वालुकावाटीनिकटभुवमटीकरोति स्म। तदनु प्रदोषसमये तमालमालिन्यमातन्वति जगति तत्र वाटिकायामन्तः प्रविश्य वालुकाफलान्यभ्यवजह्रतुः। गर्दभस्तु वालुकां भुक्त्वा वालुकालतामुन्मूलयति स्म। इत्थं गर्दभोदरं पर्यपूरि। एतावता ङ्कारणध्वनिरपि प्ररोदिति। तत्र रक्षणमुद्दिश्य मालिको बभ्राम्यमाणो ऽभूत्। स त्वरितगतिर्ध्वन्युपलक्षितं स्थानमाजग्मिवान्। तावता पलाय्य मृगवञ्चको मनःसमीहितं प्रदेशमाजग्मिवान्। स तु गर्दभो निगृह्य लगुडप्रहारैः शतशो दलिताखिलाङ्गबन्धास्थिसंचयः कृतः। निर्जीव इति मत्वा परित्यक्तः। गले च स्थूलकाष्ठपरिलुप्तकायं तु काकरणं प्रयोजितवान्। महता दुःखेन वहन्क्लिश्यन्परमपीडामनुभवन्भग्नचरणपाणिः शनैर्निरयासीत्। कण्ठचलनमधिचेतुं भवति यत्र तत्र काष्ठबन्धनेन च मृतकल्पो ऽगच्छत्। पथि क्रोष्टारं दृष्टवान्। तेन चाभ्यधायि। मदीयमभिहितं न करिष्यसि उदरे पूर्णे त्वं गानमेव प्रगल्भसे। तर्हि गीतस्यैतादृशं फलं हस्तप्राप्तं तवाजायत यत्नवतः।

माम गीतं न गातव्यमित्याचिष्टो मया बहु।
अपूर्वो ऽयं मणिः कण्ठे तव किं गीतिकल्पितम् ॥

भवान्पश्चात्तापं कर्तुं प्रववृते। अहं तव निषेधं नाङ्गीकृतवान्। ततस्तस्यैतादृशं फलं प्राप्तो ऽस्मि। तर्हि राजेन्द्र तथात्वमुदेष्यति। त्वमेतत्प्रश्नात्कल्पितोद्योगः सुखमासाद्य। श्लोकस्यार्थविचारमतिचातुर्येण परिचिन्तय। इत्यभिधाय बालसरस्वती निजमन्दिरमागतवती ॥

इति दशमी कथा ॥ १० ॥

पुनः प्रभावती विनयकन्दर्पस्य संकेतसदनमीप्सन्ती कीरमुञ्जरीगरिति स्म। ततः सो ऽपि वचः प्रयुयुजे। श्लोकस्यार्थमभिधेहि देवि। सा च तमेवापृच्छत्। ततः पक्षी वाचा लक्षीचकार। अहरारम्भे बालसरस्वतीं महीनाथो मत्यहासस्याविर्भावप्रथमाङ्कुरं क्षिपति स्म। सा च राजानं प्रत्यवदत्। नरेन्द्र एनमतिशयं कस्मादादरीदरीषि। अविद्यमानान्निषणाविशेषानालक्षयन्ति विचक्षणाः। अन्यदीयो व्यापारो यत्नेन सिसाधयिषते तदानीमश्रान्तं श्रमाश्रय एव विश्राम्यते। गर्दभस्यैकस्याविधेयविधानबुद्धेरनुतापखेदस्यासादयामियाय। तथा तवापि भोभविष्यति। ततो मेदिनीविनोदस्तां तं वृत्तान्तमप्राक्षीत्साप्यवादीत्। शृणु श्रवणीयगुणाग्रगण्य। कल्याणसंज्ञे नगरे श्वापरत्याख्यो रजको द्वितीयां गृहिणीं स्वां गृहिणीत्वेन परिगृहीतवान्। तदावर्तने निशीथिन्यां पारिपन्थिको विवाहविहारपरिश्रान्तानखिलसद्मसमासन्नजनान्निद्राविद्रावितमानसविलासानालक्ष्य तद्वेश्ममध्ये प्रविवेश। तदा द्वारि स्थितिभाजं भषकं गर्दभो ददर्श। तेन च भषको बभाषे। अरे श्वन्को ऽपि चोरस्तु खातं प्रदाय वेश्मान्तः प्रविविक्षुर्जागर्ति। अयं च सर्वमपि गृहान्तःस्थितवस्तुजातं गृहीत्वा गमिष्यति। तर्हि त्वं निजं व्यापारं किमिति परिजिहीर्षसि। तच्छ्रुत्वा श्वा वचः संचस्कार। न कदाचनायं मदीयां सुखदुःखादिचिन्तां विचारयति। तदाहं बुभुक्षित एव तिष्ठामि। न कदाप्यन्नं मह्यं प्रयच्छति। सर्वस्वनाशश्चेदस्य

भविष्यति तदानीं मम काचन वर्तिर्न जाघटीति। यस्य प्रभोः परिसरे दानमानमतीव नोपपद्यते तस्य कार्यविषये सेवको यदि स्वकायक्लेशवासनाकदर्थित उपेक्षालक्षितवैलक्षण्यपक्षपातितया परिशीलयति तदानीं तस्य पातकप्रतीपपाताधों ऽनुसंपद्यते। तथा चानुचरो यदात्मनः साधीयसीं प्रसाधनामनुसंदधाति आविष्कारमापादयन्नरणमभ्यङ्गीकरिष्णुः स्वशरीरं प्रहरझर्झरितं विधाय सेवां विधत्ते। तथाविधं भृत्यं स्वामी यदि दानमानादिना मानयति तदानीं तस्मिन्नधमवर्णावर्णवर्णनावृत्तिमावध्नाति। तर्हेतस्य प्रभोर्मम क उपयोगः। नम्रीकृतश्चेत्तदानीं न किमपि हीयते।

यतो व्याजह्रिरे।

त्यजेत्स्वामिनमत्युग्रं अत्युग्रं कृपणं त्यजेत्।
त्यजेच्च कृपणं भूपममित्रं मायिनं त्यजेत्॥

भषकेणेत्थं भाषितं निशम्य गर्दभो ऽभ्यधात्। यदि न भाषसि त्वं तदानीमहं ङ्कंकरोमि। तेनायमपि सावधानो भविष्यति। इत्याश्राव्य श्वा वाचमशिश्रियत्। श्वानः व्यक्तं ध्वनन्ति ततो जनाः सावधानाः संभवन्ति। उद्यमो ऽयमस्मदीयः। न भवादृशां विलसितमतस्त्वं मौनमवलम्बस्व। इति वारितो ऽपि शुना गर्दभस्तदीयं मतं नानुमनुते स्म। तदा गर्दभो ऽतिपरुषं जगर्द। तच्छब्दकार्कश्याकर्णनसमयसमनन्तरमेवाकर्णयतां कर्णानि बाधिर्यं शिरांसि च परमामार्तिमापेदिरे। परं गर्दभो निर्णेजकस्य मूर्ध्न उपरि गर्दनमशेषयति। तदा रजको व्याजहार। पापजातिश्चण्डालो ऽयं निद्रोपद्रवं विदधाति दिने तु व्यापारभारपरिचरणसामग्र्या परिश्राम्यामि। संप्रति अस्मान्निद्रावयति गर्दनेन गर्दभः। तर्ह्ययं स्वामिघातकः। एतस्य प्रचण्डलगुडेन दोष उत्पत्स्यते ऽस्माकमित्यभिधाय रजक उदस्थात्। द्वारिदत्तामर्गलां गृहीत्वा हस्ताभ्यामुभाभ्यां धृत्वा यथावलं चिकस्योपरि त्रिधा समभिहारेण तमताडयत्। प्रमीत इति मत्वा प्रहारप्रयोगं पर्यहार्षीत्। तदानीं स रासभः सुभाषितमेकमभाषत।

पराधिकारजां चर्चां यः करोति नराधमः।
स नूनं सीदति क्षिप्रं रजकाद्गर्दभो यथा॥

तर्हि भूपाल त्वमेतं प्रश्नं मा कृथाः। आग्रहं जहीहि। तदाकर्णनात्तव श्रमो भविष्यति। इत्युदीर्य बालसरस्वती स्वकीयं वेश्म समासदत्॥

इत्येकादशी कथा ॥ ११ ॥

पुनरप्यवनीनाथो विसारहासरसपीयूषसारश्रीप्सारसानुसारी बालसरस्वतीं समाहूय वाचं प्रचिक्षेप। तन्निशम्य साप्यवादीत्। महीमहेन्द्र त्वमेतदाविष्करणातिशयं जहीहि। एतदाचरणेन एको भुजगो ऽवसन्न आसीत्। तथा त्वमपि भविष्यसि। तदनु तद्वृत्तान्तप्रादुष्कारं कुरुष्वेत्यभियुक्ता बालसरस्वती नृपतिमज्ञापयत्तद्वृत्तान्तम्। आकर्णय नरेन्द्र। कौतुकमेकं वावच्मि। विस्मयस्मितं रसवियुक्तं वा भवतु परं तत्रावधानं कर्तव्यम्। एतावता वचनप्रयोक्तॄणां मनः समाधानमुद्रामुद्रितं भवति। तथा सति तत्र रसाभिव्यक्तिर्विकस्वरविहारवती परिलसति। अन्यच्च। प्रभूणां लक्षणमेतत्। यत्सर्वास्वपि कलासु कलाविलासविवेचकं तत्तत्कलापरिकलिताङ्गपरीक्षाभिवीक्षणमनुभूयते। यदि तस्मिन्कलासु शिक्षितत्वं जागर्ति तस्मिन्नादरं विधाय कला परिचितव्या नो चेत्किमपि तस्मै वितीर्य यथागतगमनायानुज्ञा दातव्या। तदानीमेव कीर्तिः प्रतिक्षणं परमां स्फूर्तिं दीपयति। पूर्वं विराटोपवर्तने कस्मिंश्चित्समये प्रावृडाकालिकी प्रादुरासीत्। तत्संगात्ताः सर्वा अपि तरंगिण्यो बहुलजलपरमपूरेण कूलंकषाख्याविशेषमात्मनः कृतार्थीकुर्वन्ति स्म। तत्पूरमध्ये प्रवहन्नहिरेको गमनसुररीकृतवान्। तस्यातितरां परिश्रान्तस्य शिरःप्रदेश एव केवलो जलबहिर्भूतः प्रकाशते। इतरत्सर्वं शरीरं जले मग्नम्। तत्रैको मण्डूक आगत्य फणाया उपर्यासेदिवान्। सर्पस्तूष्णीमास्त। न तावती शक्तिस्तस्मिंस्तदानीमवस्थानं परिचिनोति

स्म। ततो ऽसौ तेनैव छन्देन गन्तुं प्रावर्तत। इत्थं कूलंकषाकूले निवसन्भरद्वाजः पक्षी भेकाक्रान्तशिरोदेशं सर्पमालोक्याहासीत्। पक्षिहासमभिवीक्ष्य दर्वीकरो गिरं किरति स्म। भरद्वाज कस्माद्धसि त्वया। ततः सो ऽप्यवदत्। विपरीतनिरीक्षणेन मम हास्याविर्भावः समजायत। तत्किंनाम वैपरीत्यमित्युक्ते पक्षी विचिक्षेप वाचम्। भवतां कुण्डलिनामाहारभूता भेकाः। स चेद्भवन्मूर्धानमारुह्योपविशति तदा हास्यसमुन्मिषदास्यं बोभवीति। ततः सर्प उवाच।

किं हससि भरद्वाज सर्पो दर्दुरवाहनः।
कालच्छन्देन वर्तेत घृतान्धो ब्राह्मणो यथा॥

ततो भरद्वाजो बिभरांबभूव भारतीम्। घृतान्धाग्रजनुरुदन्तमुदीरयतां भवानिति निशम्य पतगोक्तां वाचं व्यज्ञयत्। ब्रह्मपुरनाम्न्यग्रहारे क्षेमंकरो ब्राह्मणः। तस्य भार्या अतिचलाचला। स तु परिलसदसमकुसुमशरासारप्रहारव्यथापरिनिष्ठितधैर्यः सर्वस्वसंसारसारभूतपञ्चबाणोपासनसामस्त्योपदेशिककटाक्षलक्ष्याभिव्यक्तानन्दसमुदयपरिमृदिताशेषक्लेशस्थिरीकृतहृदयाचिदुदयोल्लासो ऽङ्कितबहिरबहिरवस्तुवस्तुविन्यस्तान्तरकलनाकलपञ्चमप्रपञ्चविपञ्चितविपञ्चीपरिवादिनीध्याननिमीलितनयनो ऽवनिनीषति स्म दिनानि। स तु तस्याः पतिः न तस्यै सुरतं वितरति। अथामावास्या व्यतीपातो वैधृताः पौर्णमासी दशम्येकादश्यष्टमी युगादिर्मन्वादिः संक्रान्तिश्चतुर्दशी इत्यादिपर्वविशेषसज्ञनेन मासस्य मध्ये संभोगे विशेषतः प्रसक्तो न जाघटीति। इत्थं तस्या मन्मथोपभोगवासना न कदाप्यापूर्यते। इति सति कदाचन तया स्वचेतसा व्यवचिन्तितम्। संसारे विषयोपभोगसारे समुत्पन्नया मया न कदाचिदपि विषयानुशीलनसुखमास्वादितम्। मदीयं यौवनमनुपभुक्तामन्दविषयरसास्वादं वृथैव प्रतिदिनं गच्छति। तदनु वेगितगत्या वार्द्धक्यमुदेष्यति।

ऊचुश्च।
अध्वा जरा मनुष्याणामनध्वा वाजिनां जरा।
असंगमो जरा स्त्रीणामस्त्राणां मैथुनं जरा॥

इत्यभिधाय सा व्यभिचाराचरणाय प्रववृते। ततः कियतानेहसा स तत्पतिर्ब्राह्मणो ऽप्यज्ञासीत्। परं मौनमवलम्बनेन तिष्ठति। नाङ्गीकर्तुं प्रभवति पुंसा यत्किमपि कार्यं तत्सरसाभिसरणनिरसनव्यवसिततयानुसरणीयं मनसः कलनयावधीरितविधिनिर्बाधं फलोदयवासनाव्याहतसमर्थनप्रसरपरिचयकोडीकृत्य यदुपक्रम्यते तत्सिद्धिसमुदायमासादयति। अत एवायमग्रजनुरपक्षपिष्णुरपि तूष्णीमलंकरिष्णुर्जिष्णुश्चित्तंभ्राजिष्णुः सुखमनुभूष्णुर्विष्णुरनेहो ऽतिक्रमं निर्मित्सति। तथा सति सा तं नितरामवजानीते न च परिवेषयत्यस्य उचिताभ्यवहरणायान्नोदने। अन्नप्राणोदकमपि नासावासादयति। इत्यमस्मिन्शेषो ऽवास्थात्। तदनु विमर्शसुखतामामर्शको नामातः परो विधेयांशः। यदि संहननं समर्थनाघटनमभविष्यत्तदानीं द्वावप्येतावशिषिष्यं प्रतिदिनमित्थं चिन्तासंतानमातन्वानो जागर्ति। तस्या व्यभिचारिण्या मायावतीपरिनिष्ठितो भक्तिविशेषः। तदुपासनसमये पूर्वमेव देवीनन्दनदिने समागत्य देवायाः पाश्चात्यप्रदेशे प्रविश्यादर्शितशरीर एवावतस्थौ। ततः सा तामारिराधयिषुर्मङ्गलाराचिकादिसमग्रसामग्रीपरिग्रहा मायावत्या गन्धपूजाराचिदीपाद्युपचारषोडशकं विधाय पुरस्ताद्ध्याननिमीलितनयना क्षणमतिष्ठत्। तदा पश्चाद्भागावस्थितो ऽसौ व्याहृतवान्। भक्तजनाग्रगण्ये त्वयि भक्तिविशेषादरमालक्ष्याहं त्वां प्रति प्रसन्ना जातास्मि। तद्भवती मनःसमीहितं वरं वृणोतु। तदा तदाकर्ण्य दण्डवत्प्रणिपातितयास्तावि। मातर्मदीया स्वामिनी अलकपुराधिनायिका सेवकलोकानां संकोचनराहित्याकाङ्क्षाविकासावकाशं वितरणसामर्थ्येन परिपूरयसि। हृषीकानां रसानां किल आत्मजनेषु नोपेक्षा मनीषया दशामुल्लासयसि। इत्यस्तौषीत। तदनु मनीषितमवादीत्। यदि प्रसन्नासि इदानीं मदीयो भर्ता यथा न चक्षुर्भ्यां स्वविषयं परिचिनोति तथा प्रकारमाचरतात्। ततो देवतयावादि।

यदि तवाभिलषितं तदा तमेव लोकान्तराशयं रचयामि। तदा जगाद सा। स च निजावलोकनातङ्गावलोकनापर्याप्तावशेषनीयः। नेत्रे एव तस्य रूपग्रहनिग्रहे विधातव्ये। ततः स देवतादक्षो बभाण। अहं मायेरिणी देवता तथा करिष्यामि यथा तस्य नयने कनीनिकाकान्त्यादिगुणयुक्ते स्तः। परं सर्वस्यां नेत्रसौन्दर्यसामग्र्यां विद्यमानायामपि तन्नयनयो गरीयसी पीडा प्रादुर्भविष्यति। ततस्तदुपायपरिचयवशाद्विषयाग्रहमपि शनैः परिशीलयिष्यति। ततः सा पुनरपि प्राशंसीदिष्टदेवताम्। ततो देवता पुनस्तामूचे। भक्तजनचक्रवर्तिनि तर्ह्येवं साधय। प्रतिदिनमन्यैः पक्वान्नैः तस्य भोजनमातृप्तिकरं प्रयोक्तव्यम्। एतावता दृशौ स्वत एव गमिष्यतः। इत्यनुज्ञामभ्यर्थ्य प्रमुदितमानसा प्रगुणितोत्साहविशेषा निजनिकेतनमयासीत्। ततः सावधाना पायसमपाचीत्। ततः समये तस्मिन्द्विजोत्तमो ऽसौ ग्राममध्यतो गृहमालीयमागत्य गृहिणीमभाषीत्। स्नानसंध्योपासनादिमाध्यंदिनं विधिं समापयाम। यादृशं विद्यते सद्मनि तदेव परिवेषय। बुभुक्षा बहुधा बाधते। तन्निशम्य सा प्रासूत वाचम्। क्षणमत्र उपविशन्तु। पर्युषितमन्धः किमित्यभ्यवहरन्ति। ततो ऽतिरुचिरं विचित्रपक्वं विरच्य तस्मै परिविष्य देवतायै संकल्प्य तृप्तिपर्यवसानं द्विजोत्तमाय प्रायच्छत्। विभावरीभोजननिमित्तमपि तथैव तया निरमायि। इति प्रतिदिनं विदधाति। ततः पञ्चषैर्दिवसैर्नयनयोरुदियाय पीडा। प्रियामवादीत्। मदीयनयनयोः पीडातिविकारिणी कालकालाकलितलवावयवेषु मुहुर्मुहुस्त्वरबाधागरीयस्त्वमुरीकृत्य प्रवरीवर्ति स्म। अन्यच्चाहं पुरोऽवस्थितं रूपं पश्यामि न निश्चितगत्या। आन्ध्याविर्भावोपक्रमो ऽपि जायमानो दृश्यते। तथा तथा सातिशयादरपरिभाविता प्रयत्नविशेषं विशदयति। ततो ऽन्यैः कैश्चन दिनैर्नाहं चक्षुर्भ्यां लक्षयामीति ब्रुवाणो गृहमध्य एव गच्छन्किमपि वस्तु लुण्ठयति स्खलनाभिनयेन भिनत्ति पात्रीप्रभृति। द्वारिगन्तव्यादर्शनमधिश्रयणीसांनिध्यं याति। द्वारं कुत्रास्ति। तर्हि दर्शयतामिति। निर्निमित्तं मम नेत्रयोरेतत्किमजायतेत्यभिधाय मन्दिरमध्य एव मूत्रमुत्सृजति। शर्वर्यां महीयसी बाधेत्यभिधाय विलपति। तां प्रति व्याहरत्यहर्निशम्। मदीयनेत्राभिव्यक्तदुःसहपीडापाकरणाय कमपि प्रयत्नप्रकारं चिकित्सितपरिकल्पितविविधौषधसामग्रीसंपादनेन प्रतिबन्धप्रबन्धानुसंधानमाधत्स्व। इतरथा भृशोद्यतयैव व्यथया प्राणा अप्युपगन्तारः। तन्निशमनात्सापि व्याहार्षीत्। अन्यैरपि कियद्भिरहोभिः साधीयसी चक्षुषी भवतां भविष्यतः। धैर्यमवलम्बत। किमिति बालकप्रलापकौशल्यपरिशीलनेन। ततो ऽसावन्वहं परिदेवितो ऽधिकतया। ततः सततविसृमरसंतमसान्धानुवशतां नयनयोर्निर्णीय तया निज उपरमणो निकेतने समानिन्ये। तस्य कपटान्धस्याध्यक्षं द्वावपि सुखेन तिष्ठतः। तदासौ कपटान्धो बभाण गृहिणीम्। मदीयनेत्रे तु गते। अहमन्धः संजातः। त्वमनधिगतावधिक्रियामाजन्मनो मदीयोपासनं चिकीर्षसि परिश्राम्यसि। तर्हि मम हस्ते मुसलमेकमर्पय। तथाहं तत्परिकल्पितवर्त्मा तदवष्टम्भबलेन चरणन्यासं विदधन्मूत्रणाय बहिर्गच्छामि। तदानीं तया तस्मै साधीयान्सरलो महानेको लगुडो बलावष्टम्भनाय प्रददे। स तु ब्राह्मणो लगुडपाणिः अन्धत्वाभिनयेन तिष्ठति। तौ द्वावपि सुखेन निवसतः। एतावता तेनोपपतिना प्रतिदिनमन्तरागम्यते। उपवेशिते सति एतेषां चरणौ निक्षिप्य गृहान्तराकारयतात्। इतीदृशमादरविशेषं व्यधात्। ततो ऽसौ गदापर्वाख्यानमाख्यातुमुपचक्रमे। ततो घृतान्धो ऽभ्यधात्। गदापर्वाख्यानमुहूर्तमाकारयिष्ये। प्रत्यहमिह भवद्भिः सदायातव्यम्। भवतामहं गदापर्वाख्याखर्वगर्वपर्वबधिर इत्थं दुर्वहमुद्रानिर्वाहविभेदकं सर्वसुरपर्वप्रतिपर्वचर्वितनिर्वितथनिर्वासनोदित्वरसुकृतसर्वस्वं वरिवसितशर्वकृपाकटाक्षच्छटाचित्रप्रसादाभिव्यञ्जकं भवच्चित्तलयविशेषसंपोषकसर्वौद्योगेनाङ्गेषु समापयिष्ये। इत्यवगन्तव्यम्। अनेन प्रकारेण स उपपतिः प्रतिदिनं द्विजोत्तमात्तस्माद्गदापर्वपुराणं शृणोति। घृतान्धश्च तं प्रति व्याचष्टे। सा च तत्पत्न्युपपतिना समं भावविलासादिक्रीडाविनोदनं प्रतिदिनं निर्विशति। स तु ब्राह्मणो घृतान्धो दृग्भ्यां कलयन्प्रचण्डलगुडं करे कलयंस्तिष्ठति। एकस्मिन्दिने लगुडपाणिना प्रत्यैचि। उत्थाय भीमसेनस्तु गदां समुद्यम्य सर्वौद्योगेन

दुर्योधनमित्थं प्रहृतवान्। इत्यभिधाय तं तस्या उपपतिमतिबलेन प्रहारेण कपाले ताडितवान्। तथैव व्यभिचारिण्या अपि कपालमेकघातेन शकलीकृतवान्। इत्थमसौ घृतान्धो ऽग्रजन्मा स्ववैरमसाधयत्। तद्भुजगस्तु कालकवलितकलेवरः। तर्हि महीनाथ त्वमाग्रहं जहीहि। पद्यस्यैवार्थमामृश। इत्युपदिश्य प्रधाननन्दिन्यपि यथागतमगात्॥

इति द्वादशी कथा ॥१२॥

तदनु दिननाथस्योदये अवनिरमणो ऽमात्यतनूजामानाय्य जलचरहसितनिदानज्ञीप्सया अप्राक्षीत्। तदाश्रुत्य शापाद्विडौजस अप्सरा राजनन्दिनी समजायत। तदन्वेको जनस्तदभ्यग्रमागतवान्स तु तस्या अभिहितं नाकरोत्ततः स तया विरहमासादितवान्। तदन्वसावन्वतप्यत। तादृक्प्रकारस्त्वयापि घटिष्यते। इत्याकर्ण्य नृपतिस्तां तद्वृत्तान्तमप्राक्षीत्। तदनु सा बालसरस्वती तद्वृत्तान्तमवीवचत्। शृणु श्रुतिसंतोषकरकीर्ते। पूर्वं स्वर्गौकसामेका अप्सराः। सा च सुरनर्तकीनां मुख्यभूता। एकस्मिन्समये सा सुराणां पुरस्तान्नृत्यन्ती। तदतिशयपरितुष्टः पुरुहूतस्तस्यै साधीयसीं नगरीमेकां पार्थक्येन प्रायच्छद्विशालपुरीसंज्ञाम्। सा च नगरी नितरां निरुपमा। सा च देवनगरीमाश्रित्य निवसति। इन्द्रसमाराधनाय प्रतिदिनं सेवायै समागच्छति। इत्यमेकस्मिन्दिने सुतरां सेवानिमित्तं नागच्छत्। ततः शतक्रतुः तां शप्तवान्। त्वमस्मत्सेवानियमं निगृहीतवती। तर्हि त्वदीयं शरीरं जीवविरहितं भवन्नगर्यामेव स्थास्यति। तव मृतशरीरस्याराात्परिचर्यापरे द्वे स्त्रियौ स्थास्यतः। आगताय पूर्वपुरुषाय तव निर्जीवकलेवरवृत्तान्तावेदनं विधास्यतो वनिते ते। ततस्त्वं तु तस्य पुरुषस्य मुखान्निजनिर्जीवशरीरस्योदन्तमाश्रुत्य तदनु तन्नरेन्द्रनन्दिनीसंहननं हित्वा पुराप्सरसं वपुरवाप्स्यसि। तावत्समयावसानं मर्त्यलोके एवासनं तव बोभविष्यति। सा तन्निशम्य पुनः शतक्रतुं स्वकपोलसमुल्लसत्कान्तिबलात्कारकवलीकृतकोपं विधाय परामृशद्विशालविलसना प्रोवाच। मद्विरहिताया नगर्या न कस्यापि नायकत्वं प्रतिपाद्यम्। इति श्रुत्वा सुरपतिर्वाचमस्राक्षीत्। यावदवधि भवती निजनगरनायकत्वमापत्स्यते तावत्पर्यन्तं तव नगरनिवासिनः सर्वे ऽपि चैतन्यविरहिता भविष्यन्ति। ततः सा कुलिशपाणिना शप्ता राजकुमारीत्वेनावतार्षीत्। इत्थं कालकलनयासावेव नोदयं प्रतिपेदे। परमात्मनः पाणिग्रहणं प्रत्याचष्टे। आग्रहाभियुक्ता सत्येवं वावदीति। यः कश्चिन्मत्पुरस्ताद्विशालपुरीवृत्तान्तं व्याहरिष्यति तमेवाहं भर्तृत्वेन द्रक्ष्यामीति। अनेकशो राजानो राजकुमारास्तायान्ति परं न कश्चिदपि विशालनगरीविलासं परिशीलयति। ते पुनरपि यथागतं गच्छन्ति। इत्थमेको धूर्तः कश्चिदासीत्। स तच्चरितं बुभुत्सुः सकलं भूमण्डलं बभ्राम। ततः कोल्लापुरं चेचमासाद्य श्रीमहालक्ष्मीस्थाने ऽन्वतिष्ठत्। देवता प्रसाद्य वरं वृणीष्वेति व्याजहार। ततो ऽसौ। विशालपुरी का। सा कस्मिन्भूमिभागे ऽवस्थितिमादधाति। तन्नगरं मया चक्षुर्विषयीकर्तव्यम्। तथा प्रसीदतु भवती। इत्याकर्ण्य श्रीमहालक्ष्मीस्तस्मै विशालपुरीदर्शनाय प्रादात्पादुके। एते पादुके चरणासक्ते कार्ये। एतावता तव समीहितप्रदेशासादनं भविष्यतीति देवताज्ञामधिगम्य स पादुके अङ्घ्रिभ्यां परिगृह्य तरसा विशालपुरीमगमत्। तावता तत्स्थानासक्तिरजायत। ततस्तद्गत्वा सौन्दर्याद्यशेषातिशयगरीयसीं नगरीं चिदानन्दसंदोहतरंगिणीलहरीनिचयसहचरीमिव लोचनगोचरीकरोति स्म। तद्द्वारपक्षद्वये ऽपि करटिद्वयमभिवीक्ष्य बिभाय। ततः शनैः पुरस्ताद्गच्छन्करिणौ तौ चैतन्यविकलौ कलयित्वा अन्तः प्राविक्षत्। तथान्तःस्थितानि सर्वाणि मानुषाणि जीवकलाविकलितान्यालक्ष्य पुरस्ताद्गच्छन्राजभवनमतिमनोहरं नयनयोरयनं नयति स्म। तत्रत्या द्वारपाला अपि चैतन्यशून्याः। तदन्वन्तः प्रविश्य पश्यति यावता तावता एका सीमन्तिनी प्रक्षीणजीविता शयानास्ति। तत्सविधे द्वे युवती जीविते स्तः। ताभ्यां तत्रत्यं सकलमपि वृत्तान्तं ज्ञापितो ऽसौ तां सकलामपि वार्त्तां विकलमाकलय्य पादुकाबलेन क्षणादेव निजनगरमाससाद। सा नरेश्वरनन्दिनी नयनयोरयनीभावमानीयते तेन।

तां च संगत्य विशालपुरीविलसितमखिलमप्यविकलं परिशीलितवानहमिति तामावेदयामास। त्वया विशालपुरी दृष्टा न वेति पृष्टे दृष्टवानहमित्यवादीत्स ताम्। तर्हि तस्य नगरस्य द्वारि किमस्तीति संकेतविशेषं व्याहरतात्। तथा तत्सत्यतायां सर्वमपि सत्यमेवेत्यभिहिते द्वारिपक्षद्वये ऽपि दन्तिद्वयमस्तीति निशम्य सत्यव्यवहारो ऽयमिति संमानीकृत्य तमित्यमवादीत्। त्वं तद्वार्त्ताभिधाने वाचंयमो भव। यदाहं त्वामापृच्छामि तां वार्त्तां सकलमपि वृत्तान्तमभिधेहि। इत्यभिधाय सा तमन्तरनीनयत्। तेन समं मनःसमीहितसुरलोकैकभुक्तिभावविलासनायतिशयितसुरतोपचारोपचयपरिचितगहनानन्दसंदोहाभिव्यञ्जकं पूर्वानुभवस्मरणानुसरणतापरिमितकामतत्त्वनिरस्तसमस्तैषणाविषयविशेषलक्षणीयतदेकतानतानितान्ताद्वैतभावोपगूढमानसा सा काममप्यरचत मोहनमहनीयगहनमहोदये। इत्थं कालो नाल्पीयानत्यवर्तिष्ट। स तु मुहुर्मुहुर्मुखो हृदयसमुदितमानन्दाभ्युदयं प्राप्तो ऽपि विशालपुरीवार्त्तां तवाग्रे व्याहरामि इति प्रत्यहं तां प्रश्नयति। सा च यदाहं पृच्छामि तदा व्याहर्तव्यमिति तं निवारयति सर्वदा। इत्थं स तादृशीं दिव्यनितम्बिनीं तथाविधरत्यादीन्दिव्यान्भोगान्भुञ्जानो ऽपि पुराकृतविविधविषमविधेयविदलितचित्तवृत्तिस्तत्सर्वमपि सौख्यं मनसि मन्वानो व्याहरति ताम्। चरितमावेदयामीति क्रियासमभिहारेण। सा च तत्रत्यानशेषसंकेतविशेषानाकर्णितवती। एतावता समस्तसंकेतावगमक्षण एव तस्यास्तच्छरीरं त्यक्तजीवितमजायत विशालपुरशरीरं चेतनापरीतमजनिष्ट। तदन्वसावनुतापकरणे प्रावर्तत। वार्त्तां व्याहरमाणो ऽहं निषिद्धः। परमेतन्निषिद्धं नाकरवं दुष्टाकृतपरवशः। प्रक्षीणदैवस्य ममेदृशस्तु विपर्यस्तोपभोग अजनि। तर्हि महीपाल प्रश्नाग्रहणे योजनमस्ति। श्लोकार्थमेव विचारयतु भवान्। इत्युक्त्वा बालसरस्वती निजनिकेतनं जगाम॥

इति त्रयोदशी कथा ॥१३॥

पुनरपि राज्ञा बालसरस्वती समाहूता। मत्स्यहास्यकारणमप्राक्षीत्। तच्छ्रुत्वा सापि ससर्ज गिरम्। एतदाकर्णनाद्धराधीश तवापि तथा भविष्यति यथैकस्याः पुंश्चल्या जारो ऽपि नाजायत तथा भर्तापि न बभूव। मध्य एवावस्थिता सा कृतायासा। ततस्तन्निशम्य राजा तद्वृत्तान्तं व्याहरस्वेत्याह सचिवसुताम्। तदाज्ञामधिगम्य सापि राजानमाकर्णयेत्यभिधाय तद्वृत्तान्तकथनोपक्रमं प्रगुणीचकार। आभीरदेशमध्ये तपतिनीतीरे कस्मिंश्चिद्ग्रामे कृषीवलो न्यवात्सीत्। तत्सहचर्यतिचपला। तस्याः पतिः क्षेत्र एवावतिष्ठते सर्वदा। सा चोपपतिना समं सुखेन विषयोपभोगसुखं अङ्गीकुर्वाणा गृहे निवसति। तस्या बुद्धिरित्थमजायत। यं कमप्युपपतिं गृहीत्वा निर्गत्य तेनान्यत्र गतोपभोगरसानुसंधानपरतया अवलम्बते। इति हृदये निधाय पूर्वपरिचितमेवोपपतिं प्रति वाचं वितनोति स्म। अहं त्वया सह प्रदेशान्तरं निर्जिगमिषामि। तर्हि गच्छामः। त्वं मामादाय निर्याहीत्यभिहितः सो ऽपि गिरमुज्जगार। अत्र सुखेनैव निवसामः। त्वं निजगृहाधिष्ठात्री सुखविशेषोपभोगरसिका परिलससि। अहमप्यात्मनो मन्दिरे सुखपरवशः परमसंतोषसमासादितपोषस्तिष्ठामि। यदावयोर्मन्त्रभेदेनावस्थोपनीपद्यते तदानीं तदपि विधेयमनुबोभवामः। इति वर्तमानं सुखरसाभिव्यञ्जकसमयमपहाय किमन्यत्र गन्तव्यमिति अभिहिता तेन साप्यगदत्। यदि मां न निनीषसि तर्ह्यहं मनःसमुद्दिष्टेन येन केनापि समं निर्गमिष्यामि। गृहे किमपि विशेषधनमस्ति। तदपि संनयामि। इत्याश्रुत्य सो ऽप्यचिन्तयत्। इयं धनमपि सह निनीषति। तर्ह्येतया सह निर्गच्छामि। ततः परतो गत्वा विधेयविशेष आपदि तत्तथारूपमनुतिष्ठति। इति विचिन्त्य वाणीविलसितेन स्वैरिणीं तामन्वैषीत्। ममापि मानसं सर्वदा एतमेवार्थमनुसंधत्ते यत्त्वां गृहीत्वान्यत्र निर्बाधभोगविशेषानुभवो ऽभ्यस्यते। परमहमेतत्त्वां वक्तुं बिभेमि। तर्हि त्वं मदीयचित्तान्तर्गतमभिप्रायमवगत्य व्याहार्षीः। अद्य त्वं सायंतनसमये मम क्रीडाधिकां समग्रां सामग्रीं सज्जीकुरुतात्। धनवसनादि यत्किमपि सह गृहीतव्यं वस्तु विद्यते। तथाहमप्यात्मगृहगतं सर्वविशिष्टधनं गृहीष्यामि।

तदनु यामिनीप्रथमप्रहरसमये निर्गमिष्यामि। अद्यतनो गमनविधौ मुहूर्तयोगो ऽपि साधकतमो ऽस्ति। इति संकेतं तस्मै दत्तवान्। तदनु रात्रौ द्वावपि निरगाताम्। ततः कस्मिंश्चित्प्रदेशे तां गृहीत्वा तां तत्र परित्यज्य तदीयं सकलमपि धनमपाहार्षीत्। ततः सा परमनुतापमापतत्। मयाभीक्ष्णमसाध्वकारि। सिद्धो ऽपि निजः कौमारः परित्यक्तः। अन्यच्च स पापिष्ठतम उपपतिरपि मां विहाय गतवान्। संनिधौ मम धनमासीत्तदपि गृहीत्वापलायिष्ट। तर्हि राजविडौजस्त्वयापि तथात्वापत्तिरापतिष्यति। त्वं निजे मनसि पथ्यार्थं विधत्स्वेत्याश्राव्य महीन्द्रं मन्त्रिपुत्री निजं वसत्यनप्राशस्त्यमङ्गीचकार॥

इति चतुर्दशी कथा ॥ १४ ॥

अथान्यस्मिन्दिने बालसरस्वतीमानाय्यानिमिषहास्यहेतुमपृच्छन्नृपतिचक्रशिरःपरिगृहीतशासनः। ततः साप्यवादीन्नृभुजम्। असुद्रुमजम्बुकस्य गोचदूरीकरणाद्यदजनिष्ट तथात्वापत्तिर्भवतो भविष्यति। ततो नृपतिस्तां तु वृत्तान्तमपृच्छत्। सा चाबीभणत्। चन्द्रपुराख्यं नगरम्। तत्र सृगाल एको रात्रावेवेक्षुभक्षणाय सिकतिलनदीतीरं गच्छति। ते तु तद्रक्षकाः परितो निपुणगत्या भ्राम्यन्ति। इत्थं स जम्बुकः क्षेत्रमध्ये प्राविचत्। तदन्तःप्रवेशध्वनिमाकर्ण्य काचन शुनी सृगालमनुससार। सृगालो ऽपि तद्भयाद्दिग्भ्रममासाद्य नगरमध्यमार्गमशिश्रियत्। स तु तेन पथा गच्छन्नीलीरागकरणान्नीलीभूतकुण्डलेषु पङ्क्तितयावस्थानेषु पलायमानः तमेव मार्गमनुसरन्नात्मानं कांदिशीकः प्राक्षिपत्। पूर्वस्मात्कुण्डलान्निर्गत्य तत्पुरोऽवस्थायिनि एवं क्रमगत्या सर्वेष्वपि निपत्य निपत्य निरगात्। ततस्तद्रागसक्तविग्रहो ऽसावन्यथात्वमेव भेजे क्रोष्टुत्वमपागच्छत्। तदनु काननमनुससार। ततस्तं वीक्ष्य सर्वे ऽपि वनवासिनो विस्मयमतिमर्यादं भेजिरे। अलक्षितपूर्वं कुतः समागतमिति तत्परितः सर्वे ऽवतस्थिरे। कस्त्वं कस्मिन्स्थाने त्वं पूर्वम्। कुतः परिचितिरिति तमप्राक्षुः। वनावनीन्द्रो ऽहं वनोपद्रवनाशेन वननिवासिनां नानाजातीयानां मृगाणामहमेव मुख्यनायकः। भवद्भिः सर्वैरहं वरिवसितव्यः। इत्यभिधाय तेषां परिवृढत्वेन वर्तमानो निवसति स्म। सिंहशार्दूलास्तदुपासनाय प्रत्यवसरं परिसरन्ति। स तु जम्बुको वाचंयमतालम्बने न मामेते लक्षयिष्यन्तीति भीत्या फेरुफेट्कारमपि न परिचिनोति। यामिन्यां तु सर्वे ऽपि फेरवस्तं परिवार्य शेरते। अङ्गरक्षामपि स्वत एव कुर्वते। ततस्तत्परितो ऽनेकशो मृगविशेषा आसते। इत्थं प्रवर्तमानस्य तस्य कदाचिदीदृशी दुर्मतिरुदियाय। स्वयूथ्यानित्यमभाषिष्ट। भवन्तो मत्संनिधानाद्दूरीभवन्तु। अहमङ्गरक्षान्न्यानेवात्मन उपान्ते स्थापयिष्यामि। तैस्तु तच्छ्रुत्वा शिक्षयितुमादद्रे। अरे पापतम यथैव तिष्ठसि तथैव तिष्ठ। विनाशमवाप्स्यति भवान्। ततो ये दूरीकृताः तैः परतो गत्वा मन्त्रसंप्रधरो कृतः। इदानीमेतस्य यथा अपाय आयाति तथोपायं परिचिनुमः। परतो गत्वा सर्वे ऽपि संभूय फेरुफेरवं विदध्मः। तन्निशमनादेतस्यापि तदाविष्करणे मतिरुत्पत्स्यते। यावतासौ फेरुघोरवाशितं विधास्यति तावता सर्वे ऽप्यमुं जम्बुको ऽयमित्यभिज्ञास्यन्ति। तथा त्वागत्य शकलीकरिष्यन्ति। इति निश्चित्य सर्वे ऽपि दूरं गत्वा ध्वाङ्क्षन्ति स्म। तं फेरुणामारवं श्रुत्वा मया ध्वाङ्क्षितव्यमिति तस्य कुमतिरुदयासीत्। तां मतिं निरोद्धुं न कथंचनाप्यसौ शक्नोति। ततस्तैः संनिधायिभिर्व्याघ्रादिभिरसावुपलक्षितः। परस्परमभ्यधुश्च। पापतमो जातिहीनः सृगालो ऽयमेतावतो दिवसानात्मनः परिचर्यानस्मानकारयत्। तर्हि शेतां दुरात्मा। तर्ह्येनं चारुरीत्या शिक्षयाम। तदानीमेव साध्वित्यभिधाय संभूय सर्वे ऽपि विदार्य तं शकलीकृतवन्तः। असुद्रुमो ऽपि जीवितशेषतया स्थितवान्। तदनु दुःखं कर्तुं प्रावर्तत। अहं स्वगोत्रजानां वारितं नाचरितवान्। तत एव एतादृशीं दशामहमाप्तवान्। राजन्भवानपि वारितं नाचरतु। नो चेत्पश्चाद्दुःखासक्तिपीडितो भविष्यसि॥

इति पञ्चदशी कथा ॥ १५ ॥

पुनरपि नृपतिस्तामानाय्य तिमिहसितहेतुमचीकथत्। सापि प्रासोष्ट वाचम्। भूपते किमित्याग्रहं चरीकरीषि। अतिशयं जहीहि महीपते। अत्याग्रहं कुर्वाणयोश्चिन्तामणप्रमन्तयोः यथा द्वयोरप्यपायः समजायत तादृक्प्रकारः तवापि बोभविष्यति। ततो भूपालस्तयोश्चरितमावेदयतु भवतीति तामुद्योजयत्। सा चोवाच। शृणु श्रवणभूषणभूतकीर्ते। श्रीमल्लिकार्जुनस्य वर्त्मनि अप्रमन्तको वृक्षो ऽभूत्। स केनचित्पथिकेन साधुभावमापादितः। तत्स्कन्धे ऽधस्तादेकां वितर्दिकां विरचय्य उपरि वर्तुलं सर्वतःसमं स्थापितवान्। एकं भूरिसिन्दूरपरिपूरितप्रतीकं प्रसूनपूजिततनुं च कृत्वा चिन्तामणिनामधेयं तस्य चकार। इत्थं बहुभिरहोभिर्गतानुगतिकतया तस्य देवस्य साधीयसी प्रसिद्धिरजायत। प्रत्यहं तस्य सिन्दूरादिपूजानैवेद्यं वर्धते तथा चतुर्थीदिने मोदकपायसादिरचना। इत्थं महिमा तस्य बहुरभवत्। अन्यच्च पूर्वं मार्गिताः अप्रमन्तकस्य पर्णमेकैकं गृह्णन्ति सर्वे पथिकाः। तेन तस्याभिवृद्धिर्न बोभवीति। स तु चिन्तामणेरयमप्रमन्त इति कृत्वा तदाप्रभृति न कश्चित्तं करेणापि परामृशति। तस्मादशकलितदलशरीरतया विस्तारसामग्रीमतिशायिनीं भजमानो ऽसौ स्थौल्यभावेन जरीजृम्भीति। इत्थं बहुषु दिनेष्वतिवाहितेषु तयोरप्रमन्तकचिन्तामण्योः कलहः प्रावर्तिष्ट। ततः परस्परमभाषेताम्। त्वं मार्गसंगतो ऽप्रमन्तकः सर्वैरपि पथिकैः गच्छद्भिस्त्रोटितदलो मूलावशेषीकृत एवास्थितो ऽभूः। परं चिन्तामणेरयमिति न कश्चिदपि तव दलविदलनं कुरुते पान्थः। तस्मान्मत्संबन्धेन वर्धितो भवान्। तर्हि मयैव समं विकाराङ्गीकारमाविष्करोषि। इति निशम्याप्रमन्तको ऽपि चिन्तामणिं व्याहरति स्म। त्वयि किं नाम चिन्तामणिः। मच्छायासमाश्रयं कृतवान्मदाश्रयबलेन तव गरीयान्महिमा प्रादुरासीत्। नैवेद्याद्यभ्यवहारतो भवतो ऽङ्गानि समूलानि जातानि। अहं त्वदनुभूतान्द्वादशापि मासान्करवाणि। त्वं सर्वस्मिन्वेचे तिष्ठसि। सर्वः को ऽपि कर्षको हारासञ्जनाय लाङ्गलस्योपरि स्थापयति त्वां नद्धीरचितदृढरज्ज्वा लाङ्गलस्योपरि उत्तम्भनं त्वां बध्नाति। इदानीं मदाश्रयेणैव भवतो भूरिभाग्याभ्युदयः समजनि। इत्थं तयोरितरेतरं विरोधः प्रावर्तत। ततो ऽप्रमन्तकः चिन्तामणिमभाणीत्। त्वया विना मम किं नाम हीयते। त्वं किमिति न यास्यसि। तदानीं स चिन्तामणिर्वेदिकां तां विहाय परतो गतवान्। चिन्तामणिरहितः स तरुर्बाधामन्वभवत्। अन्यस्मिन्दिने जन एक आगत्याप्रमन्तकस्य त्वचो बन्धविधानाय समाकृष्टवान्। अपर आगत्य मेदिनीखननाय स्कन्धत एवानुचिच्छेद। इति प्रकारस्तस्य प्रावर्तत। चिन्तामणिस्तु कण्टकघटितप्रतितलकृतावस्थितिरुष्णांशूष्मणा पाण्डुरधूसरवर्णतामादद्दे। तदुपरि पक्षिणा अजङ्गः। स केनचित् जनेन परवल्गुगुल्फान्तःपरिक्षेपाय प्राप्त इति दूरतः पर्यस्तः। इति प्रकारानुभवः तयोरुभयोरप्यजायत। तर्हि राजेन्द्रातिशयं कुर्वाणस्य भवतो ऽपि प्रकारपात उदेष्यति। अद्यतनं दिनं चारुगत्या विचारय। यदि न जानीषे तदानीं प्रातरावेदयिष्यामि भवते मत्स्यहास्यकारणम्। इति व्याहृत्य बालसरस्वती निजमन्दिरं गतवती॥

इति षोडशी कथा ॥ १६ ॥

तदनु दिनान्तरे धरातुराषाड्बालसरस्वतीमानाय्य तिमिहसितकारणमन्वयुङ्क्त। तदाकर्ण्य बालसरस्वती ससर्ज वाचम्। आकर्णय विक्रमादित्य। एतत्कारणमावेदयामि। परमेका विज्ञप्तिरस्ति। भवत्प्रधानमुख्यः पुष्पहासो ऽयं भवता कस्मान्निगृहीतः। तच्छ्रुत्वा राजा व्याहार्षीत्। यदा हसति तदानीं परिषद उपरि बहुलपुष्पासाराभिसारो भवति। एवंविध एतदीयो गुणः। इत्थं परमजनपदपरिवृढस्य शिष्टाः समीपमागता अभूवन्। तेभ्यः कौतुकं दर्शनीयमिति धिया अहमेनमजहसम्। किं तदानीमभिहितो ऽपि नासावहासीत्। तद्रोषपरवशो ऽहमेनं निगृहीतवान्। इति निशम्य बालसरस्वती धराधिनाथं गिरा जग्राह। स तु कुसुमहासो देवेन निगलादुन्मोचनीयः। साधुतया मानयित्वा तदानीं किं दिनद्वये हासं नाकार्षीस्त्वमिति देवेन प्रष्टव्यः। तदनु मत्स्यहास्यहेतुजिज्ञासार्थमपि स एवानुयोक्तव्यः।

ततस्तद्वचनावगमान्नरपतिः पुष्पहासमुन्मोच्य प्रधानमुद्राधिकारं च विधाय किमिति तदानीं न त्वमहासीरिति तमन्वयुङ्क्त। तदानीं राजादेशमासाद्यामात्यो ऽप्यवादीत्। देव इत्यस्ति।

सिद्धमन्त्रौषधं धर्मं गृहच्छिद्रं च मैथुनम्।
बन्धनं चावकाशं च मतिमान्न प्रकाशयेत्॥

देव एनमप्राक्षीत्। तदानीं रहस्यमपि वक्तव्यमेव। मनःसंमोहिनीनामधेया मदीया गृहिणी। सा जीवादप्यत्यन्ततया प्रणयपात्रम्। तां विहाय कामपि कामिनीं न परिशीलयामि। किं तु। सापि व्यभिचरन्ती मम दृग्गयनमाससाद। अत एव तदानींतनदिने मम मनसि न कश्चन सुखलवाश्रयः। किं तु स्वैरोज्जागरदुःखसागरान्तर्गतगुरुगरोद्गारकलितगाम्भीर्यं मम मानसं कंचन विशेषमध्यगच्छत्। तस्माच्चित्तं न हास्ये सोत्साहे प्रत्यासक्तिमाबध्नाति। इति प्रधानवचःश्रवणान्महीभर्तुः हास्यमाविरासीत्। किं तु। तद्वास्यरसपरंपरापरिस्फूर्जद्दूर्जस्वलप्रतिहारप्रभावो महीभार्यावान्करस्थितेन बकुलपरिमलसङ्गणगणोदयकुसुमस्तबकेन कामकलिकां प्राणेश्वरीं प्रहृतवान्। तेन प्रहारेण मदकलितकपोला प्लवगजाचतनलिनीमवनीकारसोदरभाजा संमोहमहोर्मिगृहीतहृदया व्यरचि नरेन्द्रसहचरी। राजा च चेलाञ्चलेन तन्मूर्च्छापगमाय पवनाहतिमातनोति। तत्समीक्ष्य पुष्पहासस्य सहसा हासः प्रावर्तिष्ट। सदस उपरि पुष्पासारः प्रापतत्। तदालक्ष्य क्षितीश्वरः पुष्पहासमाससाद गिरा। पुष्पहास त्वमात्मानं स्वामिभक्तं ख्यापयसि। तर्हि मदीयायाः प्राणप्रियायाः प्राणस्थानसमानो यः क्षणः प्रतिक्षणं प्रवर्तमानो ऽस्ति मूर्च्छोल्लासितैतादृशी कष्टा दशा प्रावरीवर्ति तद्दर्शोत्करेण हास्यं भवतः प्रासंजयत्। ततः पुष्पहासो जगाद राजानम्। देव यद्यभयदानं दातुमीशिषे तदा वक्ष्यामि। वावदीहीति दत्तं मयाभयं तवेति नृपतिनाभिहितः पुष्पहासो बभाषे। देव त्वदीयेयं प्राणेश्वरी कामकलिका। अस्या गिरा मत्स्या अपि मुमुदिरे। सेयं पतिव्रता त्रियामायां मन्दुरासु मान्दुरिकनिकटमटीकिष्ट। दुष्टाशया किमिति कालातिक्रममकार्षीस्त्वमिति अभिधाय मान्दुरिकस्ताडितवानेतां कशाभिः पृष्ठभागे। अतः परं त्वरितगत्या तवान्तिकमागमिष्यामीत्यभिधायेदानींतनो ऽपराधः चन्तव्यस्त्वयेति चरणयोरपतदियम्। किं तत्प्रहारैरेतस्या न कश्चिद्बाधाविर्भावः प्रावर्तत। इदानीं भवद्विलसनचितकुसुमस्तबकसंपर्कपराक्रान्तकर्कशक्रकचचक्रवालक्रमा क्षणसंक्रान्तविक्षोभोपक्रमातिक्रान्तधैर्यप्रक्रमा महतीं मूर्च्छां जगाहे। यद्येतन्मदभिहितं प्रथते मिथ्यात्वाय तदानीमेव तस्याः पृष्ठभागे कशाताडनप्रतिफलनं लक्षणीयं देवेन। इत्यभिहिते महीपतितिलकस्तत्कौतुकालोकनायेक्षितवांस्तस्याः पाश्चात्यापघनम्। तदा प्रहारप्रतिबिम्बान्यद्राक्षीत्। तदालक्ष्य विक्रमादित्यो वैराग्यप्रकर्षं प्राप्तवान्। तर्हि प्रभावति बालसरस्वती यथा आत्मन आयासं परस्योपरि प्राक्षिपदुपकाराविष्कारेण प्रधानमुन्मोचितवती इत्युपायचातुर्यं विशदयसि चेत्तदानीमभिसर॥

इति सप्तदशी कथा॥१७॥

पुनः प्रभावती प्रदोषकाले विनयकन्दर्पोपान्तप्राप्तये पक्षिणं पप्रच्छ। सो ऽप्यवादीत्। देवि शृङ्गारवतीव व्यसननिरसने प्रसृमरसंविद्रसानुसारिणी भवसि चेत्तदा याहीत्यभ्यधात्। किं तद्वृत्तान्तम्। वावदीतु भवानिति तया नियुक्तः पक्षीन्द्रो वाचं विस्तारयति स्म। शृणु श्रवणालंकरणवाणि। राजपुराभिधाने नगरे सलवणदेवाख्यः कृषीवलः। तस्य द्वे स्त्रियौ। एका शृङ्गारवती अन्या सुभगा च। ते द्वे अपि व्यभिचारानुरक्ते संभूय व्यभिचरतः। कदाचित्सुभगा मन्दिरमध्यवर्तिनी उपपतिना समं विशेषसुखं प्रचयन्ती पञ्चशरनरपतिचापविद्यासहचरी चरितार्था वर्तते स्म। तावता तस्या भर्ता न्यग्रोधप्ररोहसंभारं वृत्तिविभागग्रथनाय समानीतवान्। तर्हि व्याचक्ष्व प्रभावति। तस्मिन्समये कं नाम उपायं

प्रकल्प्य तस्मात्संकोचातिशयादात्मानमुदवहत्। भवत्याः सख्यो भवती वाभिदधातु। ततः प्रभावती तच्चिन्तनानुसंधानावधानदत्तचित्ता निशीथिनीमनीनयत्तमुपायं नावगच्छत्। ततः पतत्त्रिणमनुयुनक्ति स्म। प्राह च सो ऽपि। आकर्णय प्रभावति। गृहान्तर उपधवसहितां विलासरसिकां सुभगां जगाद सा। भर्ता समेष्यति। त्वं देहल्या उपरि गलितबन्धनं कचकलापं विधाय भ्राम्यन्मस्तका व्याजृम्भमाणवदना घूर्णायमानाङ्गा भव। तदन्वहमुत्तरं रचयिष्यामि। ततः सुभगा तथैव व्यवसितमादृतवती। तदा सलवणदेवः शृङ्गारवतीमवादीत्। एतस्याः किमेतदजायत। ततः साभिवीक्ष्य तं व्याचष्ट। ज्वालयन्तु भवन्तः स्वसमीहितम्। वराक्या एतस्या उपरि परिभ्राम्यद्भ्रमविभ्रमाविर्भावापातनाय प्रबद्धप्रयत्ना वर्तन्ते। तन्निशम्य सो ऽप्यधात्। किमहमकार्षं कस्मान्मह्यं क्रुध्यसि। ततः साभ्यधात्। भवन्त एतान्वटप्ररोहान्समानिन्यिरे। एतस्मिन्वटे वटयक्षिणी निवसति। तर्हि तज्जनिता बाधा पीडयतीमाम्। अत एतान्प्ररोहान्नीत्वा तत्रैव स्थापयन्तु। इतरथा एतस्याः प्रतिक्षणं बाधाधिक्यं भविष्यति। तारुण्यसौन्दर्यसौभाग्यपरिकलितशरीरसंपदियम्। यदि तथाविधः स को ऽपि भूतविशेष एतस्याः शरीरमाविश्य स्थास्यतीति कदाचन ततः पुनः किं करिष्यते। इत्यभिधाय रोधनं विदधाना विकृतवाक्यानि व्याहरन्ती अधिष्ठितस्कन्धप्ररोहदशवटप्ररोहभारं पूर्वस्थानमगमयत्। तस्मिन्गते सति निरकासयद्द्वेषदत्तं गृहमध्यात्। तर्हि प्रभावति प्रतिभापरिकल्पितोत्तरविशेषा प्रभवसि चेत्तदा साधय॥

इत्यष्टादशी कथा ॥ १८ ॥

अन्यस्मिन्दिने कुमुदकोशनन्दिनी विनयकन्दर्पस्य संकेतनिकेतनगमनाय शुकं वक्ति स्म। सो ऽप्यवादीत्। मदनवतीवोत्तरवितरणे प्रभुतामालम्बसे चेत्तदानीं व्रज। ततस्तच्चरितावगमाय प्रभावतीभावितप्रश्नः पक्षीन्द्रो ऽप्याददे वाचम्। आकर्णय। कौमुदीदंहिनी नाम ग्रामः। तत्र त्रिलोचनसंज्ञो रावुत्तः। तस्य सहचरी मदनवती। सा चातीव सौन्दर्यभाववती व्यभिचारचातुर्यविरचनाप्रपञ्चान्वितपरिचयापि परं प्रसङ्गं न प्राप्नोति स्म परितो रक्षकमनुष्यनिषिद्धबहिर्गमना। इत्थमतिक्रामति काले पर्वविशेषेकस्मिन्गङ्गावगाहाय भर्त्रानुज्ञातगमना गृहीतोपचारपरिकरा चेटीद्वितीया प्रकटितभवभक्तिधूर्जटिदृष्टिनिकटीकरणाय समाटीकते स्म शिवालयम्। सा च विलासाभिव्यक्तिपटीयसी तरंगितापाङ्गतटीकाभिनयप्रवर्तित्रुटी स्थगितद्विपटी प्रपञ्चितारभटी स्फुटीभवति समकुटीचरोच्चाटीकरणमूर्तिस्तदनु मदनाधिदेवतेव मूर्तिमती तस्मात्करटिचर्मकुटनिकटाद्व्याघुट्य पर्यटन्ती खण्डपरशुभयपरित्यक्तकार्मुकं काममिवापरं वाडवं मध्येपथमद्राक्षीत्। सा तं दृष्टिदूतीबोधितसंकेतं कलाकलापकोविदानामग्रगण्यं तद्दृकपल्लवितमदनदावपावकं तदभिप्रायावबोधदत्तावधानं निजपरिसरमानिनाय मानिनी।

उदीरितो ऽर्थः पशुनापि गृह्यते वहन्ति नागाश्च हयाश्च चोदिताः।
अनुक्तमप्यूहति पण्डितो जनः परेङ्गितज्ञानफला हि बुद्धयः॥
आहारनिद्राभयमैथुनं च सामान्यमेतत्पशुभिर्नराणाम्।
ज्ञानं नराणामधिको विशेषो ज्ञानेन हीनः पशुभिः समानः॥

ततस्तदुपकण्ठमागत्य प्रयुङ्क्ते स्ववाचम्। त्वं कस्मान्मां समानैषीः। तदभिधेहि प्रयोजनम्। ततस्तया व्याहारि। मम त्वदीयाभिलाषः समुपनीपन्नः। तर्हि त्वया मदीयमगारमागन्तव्यम्। मदीयो भर्ता त्वया संगन्तव्यः। अहं मत्पतिमभिधास्यामि। मदीयो मातृष्वस्रीयो भ्रातासाविति। भवतापि तु मद्वचनानुसरणमनुकर्तव्यम्। इत्थमनया रीत्या कानिचिद्दिनानि साटोपभोगावगाहनपरिनिष्ठितकरणगणानिरस्तसारं संसारं कलितसारं कुर्वीमहि। ततो ऽसौ तद्वचनाद्ब्राह्मणस्तद्गृहानाजगाम। तस्य भर्तारं त्रिलोचनं चक्षुर्विषयीकृतवान्। नमस्चकार त्रिलोचनम्। स तस्मिन्समय उत्स्मयते स्म। कुत्र-

त्यो ऽयं परिचितः पुरुष इति त्रिलोचनो विचारचतुरसमीहो जातो ऽस्ति। तदनु मदनवती तत्संनिधानमागत्य वचनं प्रपञ्चयांचकार। भवन्त एतमुपलक्षयन्ति न वा। मदीयो मातृष्वस्रीयो भ्रातायं धवलनामधेयः। मत्पिता भवद्भ्यो मां प्रादात्। तदानीमारभ्य द्वादशाब्दावधि नागतवानसौ। एतज्जननी निमिमील। ततस्तज्जनितदुःखहरात्कान्दिशीयहृदयसंनिधान जन्मा जगाम। इत्यभिधाय तमवेक्ष्य वेपमानां रुदन्तीं तां संसारनिःसाराविष्करणगिरा समाश्वासयत्। तदनन्तरमागताय तस्मै श्यालाय धवलाय मदनवत्या एव मन्दिरे निवासो दत्तः। ततो रात्रौ समागत्य मदनवती धवलपर्यङ्कमध्यरुक्षत्। तदा तेन समागता साभ्यवदत्। यदीच्छसि आवयोरत्यन्तमभियोगं तर्हि तदानीमिदं सुकरमौचित्यचातुर्यं पश्येति तन्निशम्य व्याहार्षीत्। तथेति। पुनराह मदनवती। पतिवञ्चननिदानं चातुर्यमहं रचयामि। त्वं मां यथासुखं भजस्वेत्युक्त्वोपविवेश। तदा धवलो ऽसौ न प्रसरं करोति। ततस्तदाश्रुत्य प्रगुणीचकार वाणीं सा वाणिनी। त्वं गुणाग्रगण्यो ऽसि। त्वं तन्निराकरणद्वारावजिगृणीषुरसि धवल। पशुपतेः परमोपासको ऽसि। तदा धवलो ऽसौ तामवदत्। कुतो मामत्रानीतवती। कं वोपायं करवाण्यहम्। तदनु सा यदि मदीयां गिरं नाङ्गीकरोषि तदा त्वामेव दण्डयिष्ये। इत्युक्त्वा मुषितास्मीत्याम्रेडिते गिरं प्रागल्भयत्। तदनु तस्या आम्रेडितेन मुषितास्मीत्यनेन शब्देन अमुष्याः प्राबोधिषत जनाः पतिप्रभृतयः। ततो ऽसौ तस्याश्चरणयोर्निपपात। एकदा मा मां भीषय। हृदयवल्लभे मां रक्ष। तदनु ते मतं निर्वर्तयिष्यामि। इत्यवोचत। तर्हि प्रभावति सा तन्निजव्याहृतं कथमन्यथयत्। ततस्तदवगमाय प्रभावती विचारमनुभूय भूयः स्वबुद्धिदर्पणे तदप्रतिबिम्बितं बुद्ध्वा ततः शर्वर्यामतीतायामण्डजं व्याजहार। त्वमेव तमुपायं व्याहरतादिति। सो ऽपि बभाषे प्रभावतीम्। तदा सा मदनवती तं ब्राह्मणं बभाण। त्वं केशानुन्मुक्तग्रन्थीन्विहाय शिथिलितसकलापघनो भूत्वा निद्रामासादयेत्यभिधाय तस्य विषमशराशुशुक्षणीसंधुक्षणं पूर्वपरिकल्पितदुग्धं समन्ततः प्राकिरत्। तदनु मदनवतीपतिर्दीपिकासनाथो धावमान आजगाम। किमेतदजनिष्टेति तां प्रति प्रासोष्ट वाचम्। ततः सा रुदितं परिशीलयन्ती प्रोवाचामुम्। मुषितास्मीत्याम्रेडितोदीरितस्येममर्थं शृणु प्राणनाथ। अकरुणः कृतान्तो मदीयं माणिक्यं कवलीकुर्वाणो ऽस्तीति। ततस्त्रिलोचनस्तं लोचनगोचरीकुर्वन्मदनवतीं जगाद। त्वमत्र सयत्नाधितिष्ठेत्युक्ते साब्रवीत्। किं मम यत्नेन यदि भवता एतद्रक्षणे सामर्थ्यमुज्जृम्भते। तदा रक्षत। एतस्य विषूचिका संजातास्ति। एतावत्समयपर्यन्तं वमति स्म। इदानीमचेतनो निश्चेष्टो भूत्वावस्थितो ऽस्ति। ततस्त्रिलोचनः प्रोवाच। मा दुःखं बिभृहि। उपद्रवस्तु गरीयानुदितो ऽभूत्। परं दैवगत्या व्यपोहितं दुष्टमन्नं बहिरपतत्। नातः परं विषूचिका। त्वमेव तत्संनिहिता भव। यदि रात्रावुपद्रवो गरीयान् जायेत तदा ह्येवंविधं वक्तव्यं ममेत्यभिधाय निरगात्त्रिलोचनः। ततस्तौ द्वावपि सुखेन विषयरसोपसेवनमाबिभ्राताम्। तर्हि प्रभावत्येतावद्बुद्धिबाहुल्यवैभवप्रोद्भवः स्फुरति चेद्विधेर्निर्वहणं जानीषे तदानीं यातु भवती ॥

इति एकोनविंशती कथा ॥ १९ ॥

पुनरपि प्रभावती प्रश्नप्रसङ्गिनी पक्षीन्द्रं प्रत्यर्पयन्गिरः। सो ऽपि कान्तिमतीव आयासविस्तरं तितीर्षसि चेत्तदानीमिदमादर्तव्यम्। इति तामुज्जगार गिरम्। ततस्तद्वृत्तान्तावगमं प्रभावत्या पृष्टः पक्षीन्द्रः प्राह। प्रभापुराभिधानं नगरम्। तत्र मन्दबुद्ध्यभिहितः कुम्भकारः। तस्य पत्नी कान्तिमती। सा व्यभिचारनिरता। कदाचिदुपरमणेन समं मन्दिरमध्यमध्यास्ते। ततस्तस्याः पतिरापतितः। तर्हि वावदीहि प्रभावति तस्मिन्समये सा कमुपायमचीचरत्। प्रभावती विचारपरा प्रावर्तत। तदुत्तरं नाज्ञासीत्। ततः शुकः प्रवक्तुं प्रचक्रमे। भर्तारमागतमभिवीक्ष्य सा देवदत्तमवदत्। त्वमेनं बुर्बुरद्रुममध्यारोह। मा किमपि वाचं प्रयुङ्क्ष्व। अहमुत्तरं करवाणि। ततो ऽसौ भयविद्रुतो वसनविरहितो बुर्बुरद्रुममध्यारूढवान्।

कुम्भकारः समागच्छत्तावता तं बुर्बुरद्रुममधिरूढं दृष्टवान्। तदनु तं व्याहरति स्म। त्वं को भवसि रे। ततो ऽसौ न वक्ति च। ततः कान्तिमती गिरः प्राकाम्यमाकाङ्क्षति स्म। एतत्पृष्टे वैरिणः परिगृहीतवन्तो व्यापादनाय। कारणेन तेनायं बिभ्यत्पलायमानो द्रुममेनमध्यारूढवत्। कालकलितवैकल्यो भ्राम्यन्मतिजीवश्चरन्दृढस्थानावलम्बनो जनितवचनविस्मरण आदित्योदयाच्चैवावतिष्ठते। इत्याकर्ण्य कुम्भकारस्तमारूढद्रुमं व्याजहार। रे पिशाचनपकाय तरोरवरोह। तदनु तरोरवरोहति। तमालच्य तस्मै वसनं दत्त्वा चेमादिकं निर्माय निर्मत्सरस्तं प्राहिणोत्। तादृशी प्रज्ञा तव पोस्फुरीति चेत्तदानीं व्रज॥

इति विंशो कथा ॥ २०॥

* * * * * ततः प्रभावती वितर्कचिकीर्षितं पप्रच्छ पत्त्रिणम्। ततः सो ऽप्यवादीत्। विद्यापुरं नाम नगरम्। तत्र वितर्कः केशवश्च द्वौ विद्यार्थिनौ अध्ययनं कुर्वाते द्वावप्यतिधूर्तौ। एवं गच्छति काले केशवः संध्यावन्दनाय जलाशयं गतो ऽभूत्। तदानीं वणिग्गृहिणिका पानीयानयनाय तत्रागमत्। सा च शिरोऽधिरोहणाय गर्गरीं करेणोदच्चयेति केशवं वरीवर्ति। ततस्तस्या वचनात्केशवो ऽपि करेणोद्धृत्य तस्याः शिरसि घटमारोपयामास। तथा तां सुवदनामभिमुखीं च वीक्ष्याधरदंशनं च कृतवान्। तच्चरितं दूरतः पश्यंस्तद्भर्ता सर्वमप्यद्राक्षीत्। ततो ऽसावागत्य केशवं गृहीतवान्। जनसमूहो ऽप्यमिलत्तैः केशवं राजभवनं नेतुं प्रारम्भिते वितर्कस्तां वार्त्तामश्रौषीत्। धावमानस्तदुपान्तमायात्। ततस्ते नृपतिमन्दिरमानेतुं प्रयतन्ते। तर्हि प्रभावति केनोपायेनोन्मुक्तो भवति। ततः प्रभावती गृहीतचिन्तापरिकरा बभूव। तदापि नाज्ञासीत्। ततः सा शुकं जजल्प। शुको ऽप्यगिरन्निरम्। तदा तं केशवं विधृतमालच्य वितर्को ऽभाषिष्ट केशवम्। त्वं चुचुम्ब इत्येवानुकुरुष्व। एतादृश एव शब्द उच्चारणीयः। नान्यत्किमपि व्याहर्तव्यम्। तत उपरिष्टादधस्ताच्च कन्धरामन्यामानय वीप्साम्। तत उत्तरमभिधास्ये। ततः केशवो ऽपि तथैवानुसंदधानो व्याहरमाणो ऽवतिष्ठते। ततो ऽसौ राजकुलं प्रापितः। ततो राजाधिकृतास्तं प्रष्टुमुपचक्रिरे। को दोषो ऽस्तीति। अनेन परललनाचुम्बीत्यावेदिते राजाधिकृतः स केशवं प्राक्षीत्। ततो ऽसावध उपरि कन्धरां कर्तुं प्राक्रमत्। चुचुम्ब इति शब्दं पौनःपुन्यगत्यावादीत्। नान्यत्किमपि भाषते। तदानीं वितर्को राजाधिकृतं बभाषे। देव तस्य ब्राह्मणस्य भूतसंचारः समासक्तो ऽस्ति। तदानीमारभ्य एतस्य कन्धरा कम्पते तथैतादृशमेव शब्दं ध्वनति। एतदस्मिन्पैशाच्यमासज्जि। इदमेव तन्नतं पैशाचं सर्वे ऽपि जानते। तदानीं विचिन्त्य राजैवं व्याजहार। यदि अयमेव शब्दं व्याहरति अत एव सर्वेषां चेतसि चुम्बनभ्रमं प्रवर्तते। सर्वे भवन्तो जोषमाध्वमित्यभिधाय वणिजं प्रास्थापयत्। केशवमप्युन्मोच्य प्रस्थापितवान्। तर्हि प्रभावति ईदृग्विधमुपायं कलयसि चेत्तदा याहि॥

इति एकविंशती कथा ॥ २१॥

तदनु दिनान्तरे प्रभावती नुनोद कीरम्। सो ऽप्यवदत्। देवि वैजिकेव भर्तुः कोपं परिहृतवती यदि तदा स्वकार्यमपि साधय। इत्युपायविशेषप्रसञ्जनं जानीषे चेत्तदा याहि। ततः प्रभावती वैजिकावृत्तान्तं पतत्त्रिणमप्राक्षीत्। सो ऽपि ब्रूते स्म। नन्दनवाटिका नाम नगरी। तत्र कर्णसिंहनामा राजपुत्रः। तस्य भार्या वैजिका। सा कौमार एव वयसि सती व्यभिचारं परिचिनोति। परं भर्तुर्मनसि जीवादप्यतिशयेन प्रेमास्पदोदयं भजते। एकस्मिन्दिने भर्तुरभ्यञ्जनमासञ्जितं भर्तुः शिरसि प्राक्षिपत्। तदानीं द्वारि भूत्वा गतवानुपपतिः संकेतवितरणेन तामप्युपाहितवान्। तदन्वतिव्यभिचरन्ती सा जारान्तिकं टीकते स्म। तत्रस्थितं सर्वमपि जलमत्युष्णमिति भर्तारमवोचत्। अत्यौष्ण्येनासहिष्णुजलस्य सहिष्णुताकरणाय शीतलं न वार्यस्ति। चुल्लिपरिस्थितजलं वह्नितप्तमस्ति। तदन्तर्मिश्रणाय कलशं गृहीत्वा जलाहरणाय गमिष्याम्यहम्। ततो ऽसौ ब्रवीति। एतावति तमसि संध्यासमये न गन्तव्यम्। यादृगस्ति

जलं तादृशेनैवाहमाप्लावयिष्यामि। इति निवारयति तस्मिन्कुम्भं गृहीत्वा निरगात्सा नीरानयनाय। भर्ता च कलितसकलप्रतीकः परिकर्तव्यः। सा च देवदत्तसंनिधिं गत्वा चेतःकाङ्क्षितममन्दानन्दसमुदयैः क्षणं क्षणमपि सर्वस्वमकार्षीत्। ततः प्रभाते शुक्रोदयसमये उत्थाय वितर्कं कर्तुं प्रावर्तत। केनोपायेन भर्तुः कोपः परिहर्तव्यः। तर्हि प्रभावति भवत्यभिवादीतु। केनोपायेन भर्तृकोपो निवारितः। प्रभावती विचिन्तयत्यपि नाबुद्ध। ततः शुको बभाषे। देवि अरुणोदये तु भवनसमये जलाभिसमये गर्गरीमुत्तानां विधाय तदुपर्युरो निधाय भृशं सा पातनं चकार। तरोररघट्टमालारज्ज्वालम्बनेनातिष्ठत। ततः प्रकाशविशेषोपगमे मालिकस्तु ललनान्तिकमुपससाद। तदन्वरघट्टमालारज्ज्वालम्बिनीमयबन्धमालोक्य बोधानिदमनूनुदत्। युवतिरेका जलगर्ते निवसतीत्यावेदयन्मालिकः। मानुषाणि समवेतानि। ततस्तज्जनसमूहकलकलं श्रुत्वा कर्णसिंहो मनसिकृत्य जगाद। यदि भवति तदा वैजिकैव जलगर्ते निपतिता। नात्र संदेहापातः। अत एव न रात्रौ गृहानागात्। इत्युक्त्वा धावमानः समापपात। तदा वैजिकां जलगर्तवर्तिनीं निरीक्ष्य तां समाकर्षितवान्। ततस्तस्यां जीवतृणमचीकरत्। तर्हि प्रभावति त्वमित्थं मतिविशदतां प्रगुणयसि चेत्तदा गच्छ॥

इति द्वाविंशती कथा ॥२२॥

पुनर्विनयकन्दर्पोपसर्पणाय कौमुदी पतंगं व्याकोचयति स्म। शुको ऽप्युज्जगार गिरम्। देवि धनश्रीरिवोत्तरं कर्तुं संबोभवीषि चेत्तदोरीकुरु। ततः प्रभावती तं जगदे। कथाश्रितया तया किमुत्तरमकारि। तच्चरितं ज्ञापयतु मां भवानिति निवेदिते शुकः प्रोवाच प्रभावतीम्। शृणु श्रवणातिविशदशतगुणोदये। पद्मावतीति प्रसिद्धा पुरी। तत्र सुवेष इति वणिग्गणितवैभवः। तस्य पत्नी धनश्रीः। तयोर्द्वयोरतिशायिनी प्रीतिः सुखेनास्त। ततः कदाचिद्धनार्जनाय सुवेषो ग्रामान्तरं गतवान्। धनश्रीस्तु गृह एवातिष्ठत्। तदा पतिविरहवेदनया धनश्रीरवस्थाप्रदुःखकलुषितहृदया क्षणं युगान्तसंघातसममभिमनुते स्म। ततो धनपालाभिधो राजपुत्रस्तामतिथित्वं नयति स्म दृशोः। सो ऽपि तद्दर्शनजनितमदनसेवनजनितानन्दादेव वदनदैन्योद्वित्वरदुरितजनितयुगपदापातसमाविष्टसर्वावस्थो रात्रिंदिवं तदेकताननताचिन्तासंतानप्रतानपरिकलाश्लेषतामनयत्स्वतनुम्। ततो ऽसौ दूतीमुखेन तां स्ववशे कृतवान्। इति तां परस्पराक्रान्तिसमाक्रमसमुन्मिषदभिनवरसविसरविकचहृदयकलितकुवलयौवनमनोरथसमुचितामनुभवमनैषीत्। इत्थं कस्मिंश्चित्समये तयोरेकत्र दीव्यतोर्धनश्रीर्विधेयविशेषविनिहितमानसा तद्विलासे विलम्बनं कृतवती। तदा तदुपरीर्ष्यालुतया कृपाणिकया वेणीमच्छैत्सीत्तस्याः। स्वयं निर्गत्य गतवान्। तावता सुवेषो द्रविणगणानार्जयित्वा निजं संवसथमासेदिवान्। तदाचक्ष्व कुमुदकोशनन्दिनि। संकुचितमतिविलासावसरे सा कं प्रकारं निजकालुष्यापनोदनायाजीघटत्। प्रभावती चतुरचेतःप्रसरापि तद्विचारचिन्तामातन्वाना न स्म लक्षीकरोति समस्तरात्रिगमने ऽपि। ततस्तयानुयुक्तः प्रातः शुकः संशयशातनं तस्याः कृतवानायासवचनविचारपरायाः। सा च भर्तारं बहिरागतमवमत्य संदेशं प्रजिघाय। क्षणमात्रमत्रैव स्थातव्यं गृहीतोर्ध्वावस्थानावसरैरेव भवद्भिः। अहमक्षतपात्रहस्ता निर्वर्तितनिजनियमपरिकरा गच्छामि। ततः स्थालस्थापितप्रज्वलितमहलदीपाद्युपचारसंचया च वेणीं तदुपरि वर्तिनीं विधाय बहिर्निरयात्। तं दृष्ट्वा तदुपरि वेणीमुपाचालयत्। कुङ्कुमाक्षतान्क्षत्वारुणो विकारस्योपरि संभ्राम्य पाणिद्वये प्राक्षिपत्। ततः सुवेषो धनश्रियं व्याजहार। ततः सा बहुलपरिसृते विलोचने विधाय तं प्रति वक्तुं प्रावर्तत। मया दिनद्वयात्पूर्वं तवोपरि पश्चात्तापादको दुःस्वप्नो वीक्षांचक्रे। तेन जीवो बहुधा शोकविकारव्याकुलितकराङ्कुरो ऽजायत। ततो ऽहं कुलदेवतायै समीहितवत्युपयाचितम्। मद्भर्ता यदि निरामयशरीरो ग्रामादागमिष्यति तदाहं भवत्या उपरि स्वशिरस उद्भ्राम्य शिरोदण्डपुरःसरमुपयाचितं समापयिष्यामि। इति मया देवतायै प्रत्यश्रावि। अत एवाहं वेणीमच्छेदयं भवतु चक्षुःप-

रिगृहीतेषु। सुखमिदानीमनुक्तमवर्तिष्ट। तदनु सुवेषस्तामङ्कपालीकृत्वा व्याहृतवांस्त्वभवत्सदृशी पतिव्रता पुरातनसुकृतविसरैरेव लभ्यते। भवत्यां विद्यमानायां मम न कुतश्चन वैषम्यमापतिष्यति। इत्यभिधाय तां परिष्कारैः परिष्कृतवान्। तर्हि प्रभावति जानासि चेदुपायरचनानि तदा साध्यतामिति॥

इति त्रयोविंशतिकथा ॥२३॥

पुनरुपरमणेन समं रिरंसुर्मदनसेनरमणी शुकं प्रति चक्षुश्चिक्षेप। सो ऽप्यनङ्गसेनेव बुद्धिवैशारद्यं परिचिनोषि चेदिदानीमुचितमनुसंधेहि। तर्हि प्रभावत्यपृच्छत्पतत्रिणम्। अनङ्गसेनाचरितं कीदृशम्। तदित्यावेदयतु नाम भवान्। ततस्तदाचरितं विवरीषुः शकुन्तो बभाषे। मालापुराभिधाने नगरे महाधननामा वणिक्। तस्यात्मजो गुणगौरवस्तस्य गृहिणी अनङ्गसेना। सा च भुजंगसंगतिव्यसनिनी। सर्वे तां तथाविधां जानते तद्भर्तुरग्रे तच्चरितं ज्ञापयन्ति परं तस्याः प्रेमभारपरीणामे न कस्याप्यभिहिते शृणोति। एकदा सा भुजंगसहिता सुरतमनुबोभवीति। तदा तस्याश्चरणगतयोर्नूपुरयोर्ध्वनिरुद्भूत्। ततस्तु ध्वनिभीषितहृदया नूपुरे पृथगेकीकृत्य तदुपभोगसुखमन्वभूत्। तद्विलसितं तस्याः श्वशुरेणाद्राचि। स च प्रच्छन्नो भूत्वा तदुपान्तिकमागत्य नूपुरमेकमपनीय गतवान्यथागतम्। ततो ऽनङ्गसेना विचारपरायणा प्रावर्तत। असावेतं वृत्तान्तं मद्भर्त्रे ज्ञापयिष्यति। तदहमेव मान्यतागलिता भविष्यामि अधन्या च। तर्हि कथं नाम का बुद्धिरत्रानुसंधेया। इति चिन्तानिमग्नमानसा बभूव। तर्हि प्रभावति त्वमपि व्याहरस्व। सा कमुपायं प्राकल्पयत्। तदा प्रभावती भावितविचारचित्ताभवत्। नाबोधि। तावता रात्रिरप्यत्यवर्तत। तदनु वरवर्णिनी पक्षिणमप्राक्षीत्। सो ऽप्युवाच। तदानीमनङ्गसेना निजरमणसंनिधानमियाय। तेन समं भावप्रेमविलसितं पूर्वाभिनयवैचित्र्यप्रपञ्चपरिचयप्रदर्शनेन तं संतोष्य ततस्तत्पुरस्तात्किमपि वक्तुं प्रक्रामति। पश्य कुतनयं भवतो ऽग्रे व्याजह्रे। अतिक्रान्ते ऽहनि मच्छ्वशुरपादा मदीयशय्यासंनिधानमागत्य नूपुरमेकमपजह्रुः। ईदृशो नु भवतो जनको जागर्ति। तन्निशम्य प्रेयानवदत्तस्याः। नूनं नूपुरं चेदग्रहीत्। तदा गृहीतं देहि। अहमितरं नूपुरं कारयिष्ये। स मत्पिता सर्वदा तादृश एव। न कंचन द्रष्टुं शक्नोति त्वां तु विशेषतो न दिदृक्षति। तर्हि त्वं मौनावलम्बनेन स्थितिमाप्नुहि। त्वं तस्य वृद्धस्य विरोधं मनसि गृह्णासि। त्वया मदीयमनसोनुसंधानं विरुद्धाध्यासस्य द्रष्टव्यम्। इत्यभिधाय सान्त्वयामास ताम्। प्रातस्तु तत्पिता नूपुरं नीत्वा तनयस्य सांनिध्यमाजगाम। तस्य पुरस्तात्तमस्विनीसंगतं निखिलमावेदयांचकार। तदाकर्ण्य गुणगौरवो ऽप्याह गिरम्। याहि याहि मत्पुरस्तात्साधु वक्तुं समागतो ऽसि। भवद्भिरेव नूपुरमपहृतम्। तया विनिमयेन दोषासञ्चनेन तामेव भाषयन्ति। एतावताभिहितेन तज्जनको मौनमवललम्बे। अनङ्गसेना पूर्वमेव भर्तारमजिज्ञपत्। तदवष्टम्भेनासौ जनकवचनं सत्यतया नोरीकृतवान्। प्रभावति त्वमपीति मतिचातुर्यं परिशीलयसि तदा साध्नुहि॥

इति चतुर्विंशतिकथा ॥२४॥

ततः पुनः कुमुदजा व्याहार्षीद्विहंगमम्। सो ऽप्यवादीत्। देवि मुग्धिकेवोपायप्रकथनाय प्रगल्भसे यदि तदा यातु भवती। ततः प्रभावत्या पृष्टः पक्षीन्द्रो वाचयंस्तच्चरितं ज्ञापयितुमुवाच। मदनपुराभिधाने नगरे जनवल्लभनामा वणिक्। तस्य वधूर्मुग्धिका। सा चानवरतपरपुरुषपतिका। भर्तुरुपरि प्रेमलवं नाङ्गीकरोति। सर्वदा भर्तारमवजानीते अगणयन्त्यपि। ततस्तेन तस्याः पितृप्रभृतिसोदराणामग्रे निजभार्याया विधानमावेदितम्। नैषा मदीयमभिमतं कुरुते। रात्रौ सर्वदापि सर्वत्र भ्रमति। अहमेकाक्येव गृहे स्वपिमि। इत्याकर्ण्य मुग्धिका वाच प्रापञ्चयत्। अयमपदस्थः पापो निकृष्टस्य। अहमेकाकिनी नित्यं निवसामि। अयं प्रतिद्वारं पुरवासिनं जनं निद्रापयन्नास्ते। ततः संभूय तयोर्नियममकार्षुः। भवतोरु-

भयोर्मध्ये यो ऽद्य तमस्विन्यामेक एव स्थास्यति स एव सत्यवक्ता। यस्तु बहिर्भविष्यति सो ऽलीक इति नियमं कृत्वा गृहे गत्वोभावप्यभ्यवहृत्य निदद्रियेताम्। तदनु जनवल्लभस्य स्वरूपसुखपर्यायनामधेयसाधारणीं सकलहृदयवैधुर्यनिद्राविद्राविणीं निद्रामुद्राङ्कितद्रुमंचतां भर्तुर्निरीक्ष्य नीरजाक्षी समुत्थाय मुग्धिका गृहाद्बहिर्निरगात्। ततः सो ऽपि प्रबुध्य सहचरीं यावच्छयने पश्यति तावन्न तत्रास्ति। आपन्नधैर्यावस्थेति पश्चादुत्थाय कवाटं प्रादाद्भर्ता। सा तु स्वविधेयमविशेषयित्वा यदागच्छति तावत्कवाटं पिहितमस्ति। तर्ह्यभिधेहि प्रभावति। सा तत्र कमुपायं प्राकल्पयत्। ततः प्रभावती तद्विचाररचितचिन्तापि तमुपायं न गोचरीकुरुते स्म। तदनु त्रियामामतिक्रम्य तमेवोपायं शुकमन्वयुङ्क्त। तदासाववादीत्। शृणु श्रवणगुणगण्ये। सा कवाटं तत्प्रतिचिह्नं परिज्ञाय देहलीसमीपे निलीय यथासौ जनवल्लभः शृणोति तथैकाकिन्येव वाचं वक्तुं प्रावर्तत। किमिदं कृतं मया। ज्वलत्विदमस्मदीयं जीवितम्। अहं तथैव बहिर्निरगाम्। प्रातः पितृभ्रातॄणां मध्ये मदीयं मन्दाक्षमालिन्यं मन्देतरमाविर्भविष्यति। तर्हि केन प्रकारेण जीवत्यागं करोमि न वा। इति संदेहे सा पद्यमिदमकार्षीत्।

वरं प्राणपरित्यागो न मानपरिखण्डनम्।
मरणे क्षणिकं दुःखं मानभङ्गे दिने दिने॥

तस्मादिदानीं प्रमीयते। इत्थं भर्तरि शृण्वति सति सा निश्चित्याहार्यनिश्चयेव गृहनिकटस्थितजलगर्ते पतिष्यामीत्युक्त्वा गत्वा च जलगर्तसमीपं कूपस्योपरि वर्तिनीं शिलां गृहीत्वा कूपस्यान्तः प्राक्षिपत्। स्वयं चागत्य द्वारशाखान्तिके न्यलीयत। शिला तु जलमध्यमापातयन्ती ठठात्कारेण महतानादयत। तद्ध्वनेर्विस्मितदृसौ प्रवेपमानो वेगेन विहाय शयनीयं कवाटं विघाटयन्बहिरागत्य कूपोपकण्ठं गत्वा तत्संनिधायिन्यौ श्रुती विधायान्तःपतितवधूध्वनिविशेषाकर्णनाय प्रगुणोभवति स्म। तस्मिन्नवसरे सा गृहान्तरं प्रविश्य कवाटं कपाटयोर्निमानसा समजीघटत्कपटोपायप्रकटितमतिः कुलटाकुलदेवता। सो ऽपि कूपमध्ये कमपि ध्वनिमनाकर्णयन्पुनरागत्य यावता प्रविविक्षति तावता पिहितकवाटद्वारं लक्षितवान्। तदनु मनसि ध्वनति स्म। तद्विधेयवैशिष्ट्यं मुग्धिकया एवेत्यभिधाय द्वारि स्थितः मुग्धिकामभ्यधात्। वयं भवत्यास्यातुर्येण समुन्मिषितप्रतिभाः स्वमनसि परां संतुष्टिमाबिभ्राणा वर्तामहे। तदानीं निशम्य कवाटमुदजीघटत्। द्वयोरपि प्रेमप्रकर्षः प्रादुरभूत्। तर्हि प्रभावति त्वमपीत्थमुपायविशेषं प्रगुणयसि चेत्तदानीमादर्तव्यं स्वसमीहितमिति॥

इति पञ्चविंशती कथा ॥२५॥

पुनः प्रभावती पप्रच्छ पक्षिणम्। गुणाढ्यब्राह्मणवद्यदि संकीर्णसमयं नेतुं पारयसि तदादर्तव्यमिति सो ऽप्यवादीत्ताम्। तद्वृत्तान्तं व्याहरतादिति प्रभावत्या पृष्टः पक्षी प्रत्याह। विशालपुराभिधाने नगरे गुणाढ्यनामाग्रजन्मा। स धनार्जनमुद्दिश्य देशान्तरमशिश्रियत्। तदनु पथि गच्छन्नगरमेकमाससाद। तत्र स्थित्वा समानलोके किं करवाण्यत्रेति न कमप्युद्यममाप्नुते स्म। तदनु गोष्ठे गत्वा निरुद्यमश्चिन्तयति स्म। तदा बृहत्तनुं प्रलम्बगलकम्बलं जराशिथिलितस्नायुं वृषमेकं गोष्ठे लक्षीचकार। ततः स गुणाढ्यो ऽनुदिनं तदभ्याशमागत्य करीषशकलेन वृषभस्याङ्गानि कण्डूयति तृणकणादि ग्रासाय प्रयच्छति। इति प्रत्यहं परिशीलनेन स तं वृषभं स्ववशीचकार। इत्थं स प्रत्यहमागत्य रज्ज्वा निबध्य यत्र क्वापि गच्छति तत्र निषधो ऽसौ गच्छति शृङ्गचालनेन रौद्रतां दर्शयति। तत एकस्मिन्दिवसे वृषभे पर्याणं निक्षिप्य प्रदोषसमये कस्याश्चन पण्यगणिकाया गृहानगच्छद्वृषभमारुह्य। तस्याः कुट्टिनीं प्रति गिरं नयति स्म। वयं व्यवहारिणः। अस्मदीया वस्तुपूर्णा अनड्वाहः पृष्ठतः समायान्ति। प्रातस्त्वागमिष्यन्ति। अहं त्वत्र गत्वार्थनिर्णयायाग्रत एव समागममिदानीम्। पश्चान्निवेशितसंनिधानं या-

मयत्तदानीं दिवसो ऽपि समानं नावसानभावं भजते। अद्यतनं दिवसमत्रैवास्मिन्निवासाय सौकर्यं कुर्वन्तु। यद्याचिष्यन्ते तदहं वितरिष्यामि। ततस्तन्निशम्य कुट्टिनी प्रकटीचकार वाचम्। ईदृशं सामान्यजनस्वभावासन्नं च किमिति व्यवहरन्ति भवादृशाः। भवन्तः किमन्यलोकसामान्याः। गृहमिदं यौष्माकीणमेव। अत्र सुखेनागन्तव्यमुषितव्यं च। भवत्सदृशाः समायान्ति यस्मिन्दिने तदेव सुदिनम्। इतराणि दुर्दिनानीति। तथैवमस्मदीया तनया रथ्यापण्याङ्गना। भास्वत्कपर्दकं गृहीत्वा पानीयं पायय तादृक्क्लमभावोद्भाविनी न भवति। ततः कपटविपणी वार्णी प्राणैषीत्। धनं मदीयो ऽयं बलीवर्दो दूरतरं गच्छति। द्वारि स्थापयितुं न युज्यते। अयमन्तःशालायां प्रबद्धव्य इत्यभिधाय तत्र स्थितवान्। अङ्गमर्दनस्नपनाद्यजायन्त। रात्रौ तया सह न्यवात्सीत्। प्रत्यासन्ने प्रातस्तनसमये समुत्थाय वेश्यायाः सकलमलंकारं गृहीत्वा गतवान्। वृषभं च तत्रैवावस्थापयत्। तदनु दिनोदये दासी बहिर्निरगात्। वृषभं निबद्धमद्राक्षीत्। तावता जरन्तं विश्वंभरास्पृशत्सास्नं रोरूयमाणमभिवीक्ष्य ककुद्मन्तं दासी शम्भलीं बभाण। कस्यायं बहिर्निबद्धो वृषभ इति। ततः शम्भली तस्यास्तदभिहितमाकर्ण्य त्वरितगतिरुदतिष्ठत्। वृषभं चापश्यत्। पश्चात्कुट्टिनी जगाद। पश्य रे शर्वरीसमागतो गृहान्तरे स्थितवान्वा। यावतासौ वीक्षांचक्रे तावतासावलंकारान्गृहीत्वा निरगात्। पश्चाद्वृषभमुदमोचयत्। तदा कुट्टिनी तदात्मनो निकरणं प्रख्यापयसि चेत्तदा समग्रपण्याङ्गनावर्गमध्ये ऽपहासास्पदाभिमुख्यतामभजाव। इति मत्वा मौनमेवावलम्बितवती। तदन्वतिक्रान्तैर्बहुभिर्दिनैः स गुणाढ्यः कुट्टिन्या दृग्विषयीकृतः। मदीयसमस्तवस्तुलुण्ठको ऽयमित्यभिधाय विधृतस्तया। सा तं राजभवनं नेतुमुद्युनक्ति स्म। तर्हि प्रभावति त्वमपि भाषस्व। एतावति संकुचितसमयातिपाते ऽपि कमुपायमजीघटत्। तदा प्रभावती विचारचतुरचिन्तापि न स्म प्रतिभामत्यर्थं करोति। तदा दिनारम्भे निद्राविमुद्रितं पक्षीन्द्रं पप्रच्छ। शुकः प्रगल्भते स्म गिरोत्सर्गाय। यावता सा तं धृत्वा नृपतिमण्डलमुद्दिश्य नेतुं प्रववृते तावतासौ सिंवो सिंवोलीति क्रियासमभिहारेण शब्दं व्याहर्तुं प्रचक्रमे। ततस्तथाविधं चण्डालजात्यभिव्यञ्जकं तस्य शब्दं निशम्य शम्भली सहसाभैषीत्। तमस्विनीमेकां मत्तनयां संनिधर्षितवानिति चेत्तदास्माकं राजदण्ड आपतिष्यतीति विमृश्य तं प्रास्थापयत्। इतो याहीत्यभिधाय। तदासाववादीत्। मदीयस्त्वरितगतिरनड्वान्भवतां समीपे तिष्ठति। स दातव्यः। नो चेदद्याहमावेद्य राजकुले भवतीं दण्डयिष्यामि। मातङ्गस्योपभोगमकार्षीदियमित्यभिधाय यास्यामि। तदनु कुट्टिनी विहाय तस्मै किमपि दत्त्वा प्रस्थापयामास। तत्तर्हि प्रभावति एतावती संकीर्णसमयमेतादृशेन बुद्धिवैभवबलेन व्यपोहितुं पारयसि चेत्तदानीं प्रवर्ततां नाम॥

इति षड्विंशती कथा ॥२६॥

ततः प्रभावत्युपरमणनिवासमियासुः पतंगपुंगवं गिरा संगतोत्तरगिरं चकार। देवि सर्षपस्तेनवदात्मनो वैषम्यापनयनं निर्मातुं प्रभवसि चेत्तदा व्रज। ततस्तत्पृष्टः शुकः प्रभावतीं तद्वृत्तान्तमश्रावयत्। शृणु श्रवणानन्दप्रदायिमत्पदचरिते। प्रतिष्ठानपुरे को ऽपि दस्युर्न्यवात्सीत्। स तु द्यूते सर्वमपि धनं पराजोयत। तदनु यामिन्यां कस्यचिद्वणिजो गृहे भित्तिं विभिद्यान्तः प्राविशत्। तद्गृहमध्ये न किमपि नयनविषयीकृतवान्। तत एकस्मिन्भाण्डे सर्षपानपश्यत्। तान्गृहीत्वा वस्त्रेण बद्ध्वा बहिर्निरगच्छत्। तावता राजभटा आज्ञासिषुः। स तैर्विधृतः तद्बद्धसर्षपवस्त्रं तद्गले बद्ध्वा राज्ञः समीपं प्राप्तः। राजापि तान्भटानेवमवादीत्। गच्छतैनं गृहीत्वा मारयतेत्युक्ते प्रभावति त्वमपि विचार्य मह्यमावेदय। इत्थं केनोपायबलेन रक्षितवानसावात्मानमिति। प्रभावती विचारचातुर्यं नाटयन्ती न वेत्ति तत्प्रश्नम्। तदनु प्रभातं संजातमवगत्य पतंगश्रेष्ठमनुयुयोज। सो ऽप्यवादीत्। आकर्णय प्रभावति। राजा तं व्यापादनायानाययत्। ततो मलीमसो मलिम्लुचो महीपालं जगाद। अहं भवदुचितप्रयत्नशतैर्न हिंस्यो

भवेय। भवन्तो मन्मारणनिमित्तं यथाकथंचन कुर्वन्तु परं नाहं म्रिये। तदानीं विस्मयो राज्ञ उदियाय। राजा तमप्राक्षीत्। भवदमरणे किं कारणम्। तदन्ववदत्सो ऽपि। ज्ञानशीलिनः पुमांसो बालकगले रक्षामभिलक्ष्य मन्त्रसंस्कृतान्सर्षपान्दीयन्ते। समस्तापि डाकिनीभूतप्रेतपिशाचजनितबाधा बाधिता भवति न कश्चिदप्युपद्रवः प्रभवति पीडयितुम्। मम गले सर्षपभार एतावान्संस्थितो ऽस्ति। ततः केन विशेषेण मयि मरणोद्भावनं विकचयन्ति हन्त। इत्याकर्ण्य महीन्द्रो व्याहार्षीत्। तं मोचयध्वम्। तर्हि कुमुदनन्दिनि एतावदुपायपरिशीलनं भवती वेत्ति चेत्तथा विधेहि विधेयविशेषणम्॥

इति सप्तविंशती कथा ॥ २७ ॥

ततः प्रभावती भुजंगसंगतं चिकीर्षन्ती वयसि वाचां विलासं प्रकाशयति स्म। ततस्तया पृष्टः शुकः शान्तिकादेवी ह्यात्मनो भर्तारं विषमावस्थापन्नं मतिसमुन्मेषाभिव्यञ्जनेनोदमोचयत्। तादृशं बुद्धिविधानं जानासि चेत्तदानीं याहीत्यवादीत्ताम्। तदनु तद्वृत्तान्तं जिज्ञासमानया तया प्रभावत्या पृष्टः शुकस्तामवदत्। पृथुप्रथिमभाजि करभापुरे गुणगौरवो नाम वणिग्ग्रामण्यः। तत्सहधर्मचारिणी शान्तिकादेवी। स तु गुणगौरवः प्रतिदिनं नगरबहिर्गतकेतनां यक्षिणीं नमस्कुरुते नियमितमानसः। स त्वेकदा रजन्यां यक्षिणीदेवालये नमस्कारणायोदचलत्। तदनुसारिणी काचन धर्षिणी निरयासीत्। तत्र तयोर्द्वयोः संगतमजायत। स तु तामात्मन उपभोगाय बलादेवाभ्यर्थयामास। तौ द्वावपि प्रासादमध्ये तिष्ठतः। तावता सदीपका यामिकाः प्रासादमध्यं दिदृक्षवः तदन्तर्वर्तमानचोरादिशङ्कां निराकरिष्णवः समागमन्। तौ द्वावपि अन्तर्वर्तिनौ दृग्विषयीकृतौ। तदनु प्रासादमभितो रक्षणमुद्दिश्य रक्षकान्प्रक्षिप्य प्रातरेतौ द्वावपि क्षोणीरक्षकस्य चक्षुर्विषयतामापादयिष्यामीत्यभिधाय स्वविधेयविशेषं निरवर्तयद्यामिकाधिपः। ततः शान्तिकादेवी च तां वार्त्तामश्रौषीत्। तत्प्रभावति केनोपायविधानेन स्वपतिं निरमोचयत्सा। ततः प्रभावती बहुधा विचारनिर्माणपरा नाविन्दत्तदुपायम्। ततः प्राभातिके समये शुकमजल्पत्कृशोदरी। शुकः प्राचीकटत् शान्तिकादेवीबुद्धिविलासम्। प्रभावति सा शान्तिकादेवी निजं भर्तारं देवागारे राजभटैः प्रासादमध्य एव रक्षितमवगत्य स्वयं भोजनमभिमतं विधाय पुरस्तान्मृदङ्गवादनं कारयन्ती कल्पितप्रवद्धन्नपाका समस्तोपचारप्रपञ्चनपरा यक्षिणीप्रासादमाससाद। तदा रक्षणनिमित्तं द्वारि स्थितान्भटानद्राक्षीत्। ते न कस्याप्यन्तःप्रवेशं ददति। तदनु सा तदभिमुखमागतवती द्वारपालानवदत्। परमेश्वर्याः पूजाद्युपचारपरिचरणं विहाय मम पारणाविधिर्न फलति। अद्य भवद्भिरस्मदीये मन्दिरे ऽभ्यवहृतिरभ्यसनीया। तावता ताम्बूलं नयन्त्वित्यभिधाय करस्थितं कङ्कणं यामिकानां करे व्यसृजत्। अहमेकाक्येवान्तर्गत्वा देवतां चोपचारविशेषैरभ्यर्च्य नियमं निर्मायेदानीमेव व्यावृत्यागमिष्यामीत्यभिधाय प्रासादान्तः प्राविशत्। तत्र गत्वा स्वकीयवसनाभरणादिकं व्यभिचारिण्यै दत्त्वा तन्मिषेण तां बहिरचीकरत्। स्वयं तु तत्रैवातिष्ठत्। प्रातस्तु तद्वृत्तान्तं यामिका भूपालाय न्यवेदयन्। देव धनभूतिनामा विपणिः परपुरंध्रीसहितो बहिर्देवप्रासादे निरुद्धस्थापितो ऽस्ति। देवेनात्मीया जनास्तदवलोकनाय प्रस्थापितव्याः। तदनु तस्य तथोचितदण्डविधानेनोक्तव्यो ऽसौ। ततस्तेषां वचनाद्राजा निजजनान्प्रस्थाप्य तद्दर्शनमचीकरत्। ततस्ते जनाः प्रासादं गत्वा स्वसीमन्तिनीसमन्वितं धनभूतिं लक्षयन्ति स्म। राजापि तज्जनावेदितं श्रुत्वा तथा स्वभार्यानुगतं धनभूतिमन्तःस्थितमवगत्य यामिकानामुपरि भूरिकोपान्निगलं विधाय स्वपत्नीयुतं धनभूतिं प्रास्थापयत्। तर्हि प्रभावतीदृग्विधालीकत्वापाते ऽपि युक्तिविशेषानुकरणेन यदि स्वयं कर्तुमीशिषे तदा खेप्सितं साधय॥

इत्यष्टाविंशती कथा ॥ २८ ॥

ततः प्रभावती पतत्त्रिणमप्राक्षीत्। शुको ऽपि व्याहार्षीत्। देवि केलिकेव संकुचितावसरमपसारयितुं पारयसि चेत्तदानीमभितिष्ठाभिसरणमिति विहगेनाभिहिते तद्वृत्तान्तविविदिषया प्रभावत्या पृष्टः प्रत्याचष्टाण्डजः। शृणु मदनसेनमनोनन्दिनि। भीमरथ्यास्तीरे कस्मिंश्चिद्ग्रामे सापुलसंज्ञः कृषीवलः। तस्य सहचरी केलिका। तत्तीरादितरस्मिंस्तीरे वाञ्छितार्थप्रदः सदा शिवः। तस्य पूजकेन समं स्वेच्छाचरणेन व्यभिचरति। इत्थमेकस्मिन्दिवसे पराह्णसमये पानीयानयनाय गर्गरीं गृहीत्वा तरङ्गिणीमगच्छत्। तथैव पानीयमानीय तस्य सिद्धेश्वरस्य पूजकमुपधवमद्राक्षीत्। तत्समीपान्निवर्तमाना धवमद्राक्षीत्। तर्हि प्रभावति त्वमपि चिन्तय। तत्र सा कमुपायमकल्पयत्। ततः प्रभावती विचारबलावलम्बनापि न कलयामासोपायविशेषम्। तदनु रात्रिरपि पर्यहीयत। ततस्तत्प्रश्नकरणाय शुकान्तिकमेति स्म। सो ऽप्यभिदधे सावधानाम्। तस्मात्तीरादायान्तीं तां तस्या भर्ता लक्षीचकार। ततः सा वेगगतिर्जलपूर्णं कुम्भं गृहे समानीय तत्प्रातिवेशिनीपुरस्तात्संकेतं परिकल्प्य तदनु निजकुलदेवतायाः स्नानादिकं विधाय पूजाप्रमुखोपचारषोडशकं समाप्य प्रार्थनां कर्तुं प्रवर्तते। देवि प्रार्थयेयम्। तदन्वपमृत्युव्यपोहनाय भवत्युपायं न्यरूपयत्। परस्मिंस्तीरे सिद्धेश्वरस्य पूजा विधातव्या गःसुकाश्च दालयितव्या देवस्य। तर्हीदानीं गःसुकादालनं च कृत्वा समागता स्मेदानीं त्वदुपान्तम्। तर्हि भवदुपयाचितं तत्सर्वमपि संपूर्णतया सिद्धं गतं न वेति अभिहिते तया तत्प्रातिवेशिनी भाषते स्म। उपयाचितं सर्वमपि संपूर्णगत्यावाप्तम्। अनेनैकचित्ततया भवद्विरचितेन नियमविशेषेण समस्तमप्युपयाचितं निष्प्रत्यूहतया संपन्नम्। भवद्भर्तुश्चायुर्वर्धते। भवत्या सिद्धेश्वरदेवस्य उपासना न चिहासितव्या। इत्थं तस्याः पतिस्तयोः संवादं आकर्णयन्विद्यते। तन्मनसीत्थमभ्यधात्। इत्थं वराकी मम जाया निमित्तं शुभं कुर्वाणास्ति। तदनु तां मानितवान्। स्तुत्यादिवचनपरंपरया तां समतोषयत्। तर्हि प्रभावति विचाररचनां त्वं चातुर्येण प्रबध्नासि यदि तदानीमिदमादर्तव्यं स्वमीहितम्॥

इत्येकोनत्रिंशती कथा ॥२९॥

पुनः प्रभावती विनयकन्दर्पान्तिकगमनाय विहंगं जगाद सो ऽप्यवदत्। देवि मण्डोदरीवोत्तरविनिमयनिर्माणे निजां मतिं विशदयसि यदि तदाङ्गीकुरु। ततस्तद्वृत्तान्तमवजिगमिषुः प्रभावती शुकमनुयुनक्ति। तदावेदितुमाह शुकः। देवि प्रतिष्ठाननगरे यशोधनाभिधो वणिग्युवा। तस्य तनया मण्डोदरी। सा यशोधनाय जीवादप्यतिशायिनीं प्रीतिमावहति। ततस्तस्याः कृते जामातरमेकममेलयत्। सा मण्डोदरी स्वभर्त्रा सहितानवरतं गृह एवोपभोगकौतुकमनुभवति। तदनु मण्डोदर्याः सखी मकरन्ददंष्ट्रा राजकुल एवावतिष्ठते। ततः सा मकरन्ददंष्ट्रा राजपुत्रेण समं मण्डोदर्याः संगतमकारयत्। पश्चात्तस्य राजपुत्रस्य मण्डोदर्यां गर्भो ऽजायत। तदनु दौहृदावसरे मायूरमांसभक्षणायाकाङ्क्षा प्रावर्तिष्ट। ततः कस्मिंश्चिद्दिने राज्ञः क्रीडामयूरश्चरन्नास्ते। सा एकान्त एव सर्वेषामप्यपश्यतां तन्मयूरं निहत्य तन्मांसं पक्त्वा स्वादितवती। तदनु मकरन्ददंष्ट्रायाः सख्याः पुरस्तान्मैत्रभावेन तयैकदावादि। मया मयूरमांसभक्षणरूपसमुद्भूतदौहृदया राजकीयं क्रीडामयूरं निहत्य निजदौहृदपूरणमकारीति प्रीतिभावनतया न्यगदि। तदनु राजकीयः क्रीडामयूरः कुत्रापि गतवान्न च दृश्यते। राजा तु तत्क्रीडामयूरदर्शनाय सोद्घोषमुदञ्चितवान्ध्वजपटम्। तदा मकरन्ददंष्ट्रा तमक्रोडत्। राजकीया मकरन्ददंष्ट्रामप्राक्षुः। सावदत्। यशोधनविपणिनस्तनयया मयूरो मारितः। अहं तस्या एव मुखसंवादेन भवतां प्रत्ययमुत्पादयिष्यामि। एकं नरं विश्वासभूतं मया समं प्रस्थापयिष्यन्त्वित्यभिधाय प्रच्छन्नमेव मञ्जूषायां प्रक्षिप्य तां चैकस्य मूर्ध्न्यारोप्य मण्डोदर्या अभ्याशमसरत्। तत्र गत्वा मञ्जूषामवारोपयत्। तदनु मण्डोदरीं व्याहरति स्म। त्वं मदीयात्प्राणादप्यतिशायिनी। त्वां विना नान्या काचन मम संनिधानपदवीमवगाहते। तर्हि मम यः कश्चन विद्यते सिचयभूषणादिवर्गस्तं सर्वमपि त्वत्सात्करवा-

णीत्यभिधाय उपाविशत्। तदन्ववादीत्। मण्डोदरि भवत्कृत एव मयूरमांसभक्षणवार्त्ता पुनरपि कथय। कथमवधीस्तन्मांसमपि भुञ्जानाया भवत्याः कथं स्वादुविशेषमपुष्यत्। तज्जवत्याः सौहित्ये प्रीत्यभिव्यञ्जकं। तच्छ्रोतुमुत्कण्ठिताया मम पुरस्तादकुण्ठितगत्या गरिष्ठां गोष्ठीं वावदीतु भवती। तदनु सा मण्डोदरी तद्वचनप्रणयिनी तां गोष्ठीमुत्पादयितुं प्रावर्तिष्ट। ततः सा मकरन्ददंष्ट्रा वाक्यावसाने चष्टे ङुंकारमुच्चरति पेटां चपेटयति शनैः शनैरिति विदधानां तां समीक्ष्य मण्डोदरी शङ्कामियाय। मकरन्ददंष्ट्रा प्रतिक्षणं पेटां चपेटया ताडयति। तर्हि धनस्याभिलाषेण साष्टोलीमत्रोटयत्। राजकीयं मानुषं पेटसंपुटमध्यवर्तिनं विधाय समागता कितवाग्रेसरा। तर्हि किमतः परं विधातव्यम्। अहमपि समस्तं मायूरं वृत्तान्तं तस्याः दुष्टाशयायाः पुरस्तादस्ताशङ्कं व्याहार्षम्। इति परां चिन्ताकोटीमाटीकमाना वर्तते। तर्हि प्रभावति तदानींतने तादृशे समये कमुपायमकल्पयत्सा। ततः प्रभावत्यपि शुकवचनानुसारिणी तद्विचारपरा तां रात्रिमतीत्य दिनस्योदये विद्रावितनिद्रामुद्रं पत्त्ररथं पप्रच्छ। सो ऽभ्यधाच्च। आकर्णय प्रभावति। ततः सा मण्डोदरी तस्याः पुरस्ताद्वार्त्तां व्याहरमाणा वाचंयमा बभूव। तदनु मकरन्ददंष्ट्रा पुरस्तात्किमजायतेति मण्डोदरीमन्वयुङ्क्त। तदा मण्डोदरी जगाद। तथैव प्राभातिकः समयः प्रादुरासीत्सूर्यो ऽप्युदयमापेदिवान्। तर्हि मकरन्ददंष्ट्रे त्वमप्यभिधेहि। स्वप्नो ऽयं किंरूपः। एतदीयं फलं भव्यमभव्यं वेति जानीषे। अत एव भवत्याः पुरतो ऽयमभिहितः। तन्निशम्य पेटासंपुटान्तःस्थितो ऽमात्यो बहिर्निरगात्। गत्वा च राज्ञे निवेदयामास। मण्डोदरी मकरन्ददंष्ट्राया अग्रे स्वप्नमुज्जगार। इयं चास्माकमग्रे मण्डोदरी मयूरं न्यवधीदित्यभ्यधात्। तदनु निशम्य मकरन्ददंष्ट्रायै राजा अक्रुध्यत्। तर्हि प्रभावत्येतादृशमुपायविशेषं परिकल्पयसि चेत्तदानीमादृतादरा भव॥

इति त्रिंशती कथा ॥ ३० ॥

तर्हि प्रभावती शुकं प्रश्नीकरोति स्म। सो ऽप्यवोचत्। देवि मतिचकोरस्तस्कर आत्मनो विनाशमनीनशत्। तथा बुद्धिविधानमनुबध्नासि चेत्तदानुसर। ततः प्रभावती भारतीमहापयत्। मतिचकोरोदन्तमुदञ्चयेति। ततस्तथाभिहितो विहगस्तदुदन्तावेदनायासृजद्गिरम्। अवधेहि प्रभावति। गुर्जरजनपदे भृगुक्षेत्राभिधानं नगरम्। तत्रैको ब्राह्मणः। स तु वैधेयशकल एव अतीव दैवविरहितः। स तु देवनाय प्रावर्तत। तदनु शनैस्तस्करमतमन्वभवत्। तदा कुत्रापि खतपतितभित्तिविभागे दस्युरसौ विधृतः। राज्ञः समीपे निन्युस्तम्। राजा प्रत्यादिष्टवान्। चोरस्य दण्डो भवति यस्तमेतस्य कुर्वन्तु।

यत ऊचुः। चोरदण्डः शिरश्छेदो विद्वद्दण्डस्त्वगौरवम्।
भार्यादण्डः पृथक्शय्या मित्रदण्डस्त्वभाषणम्॥

इत्यभिधाय तं मारयितुमनयत्। तर्ह्याचक्ष्व प्रभावति। मतिचकोर एतावत्समयसमासक्तौ तदा प्रतारकं कमकरोत्। ततः प्रभावती विचारचातुर्यमनुभूयापि तदविषयन्ती विहंगमं व्याजहार। तया पृष्टः शुको ऽपि तस्याः संदेहापनुदं जगाद। प्रभावति शृणु। तदा तस्करो राजानं व्यजिज्ञपत्। देव विज्ञप्तिरेकास्ति। अहं किमपि चूडामणिसमहितं ज्ञानं करतलकलितमविकलमाकलयामि। तर्हि भविष्यतः समयस्य कमपि ज्ञानप्रकारमभिधास्यामि। तदनु भूपालो ऽप्यवदत्। व्याहरस्वेति। ततो ऽसौ जगाद। देव एतत्त्वं बाधाराहित्येन निर्णयकटाक्षितमेव जानीहि। एकस्मात्प्रहरादुपरि समस्तो ऽपि सर्गो ऽन्यथैव भविष्यति। अन्धकारः प्रवर्तिष्यते महाभयानकः। तर्ह्येवंविधस्यातिगरीयसो जगदुपद्रवस्य शान्तिकरणाय त्वय्याकाङ्क्षा वरीवर्ति यदि तदानीं कुरु तत्। इतरथैतत्सर्वमपि परिसमाप्तमेवेत्यहं पश्यामि। तदनु मेदिनीनाथो गिरमसृजत्। तर्ह्येतस्योपद्रवस्य कथं शान्तिर्भवतीत्याचष्टाम्। तदा राजाज्ञामासाद्य सो ऽप्युवाच। त्वमेव तदुपद्रवस्य शान्तिं करिष्यसीत्येतदर्थं मह्यमात्मनः

सत्यवचनं प्रयच्छ पश्चादभिधास्यामि। तदा राजा तस्मै सत्यवचनं प्रायच्छत्। ततो ऽसौ तच्छान्तिकं राजानमाश्रावयत्। मद्वचनं कर्तव्यमेतावता तच्छान्तिर्भविष्यतीत्यवगच्छ। राजाप्यवोचत्। अन्यादृशी सृष्टिर्भविष्यतीति तत्किम्। सो ऽब्रवीत्। अवधत्स्व महीमहेन्द्र। आत्मनि प्रशमिते सर्वापि सृष्टिः समाप्तरूपैव। यदाहं मृतस्तदा समस्तो ऽपि सर्गो ऽन्यथा जात एव। ममेतरेषामपेक्षया किं नाम प्रयोजनम्। तदा राजा तद्वचनमपहास्य तं निरमोचयत्। ततः प्रभावति इत्याद्यभ्यासं चिकीर्षसि यदि तदा प्रयाहि॥

इति एकत्रिंशत्कथा ॥ ३१ ॥

पुनः प्रभावती शुकमभाषत। सो ऽप्युवाच। यथा मनोहरा श्वश्र्वा असूयां पर्यहार्षीत्तथा तद्वदुत्तरं जानासि यदि तदा व्रजेत्युक्ते प्रभावती मनोहरावृत्तान्तमवबुभुत्सुः प्रत्याह पतत्त्रिणम्। तदा तयानुयुक्तः शुकः सो ऽप्यकिरद्गिरम्। एलोलनामनि नगरे वैजलदेवसंज्ञो माणिक्यकारस्तस्य पत्नी मनोहरा। तया सदृशी न काचन भूपालये सुदती रूपातिशयाखर्वितरूपा जागर्ति। सा वधू रूपसर्वस्वानन्यासदापि न भर्त्रे रोचते। तदनु सा व्यभिचाराचरणाय प्रावर्तिष्ट। ततः कस्मिंश्चित्समये श्वश्रूर्गोधूमाहरणाय पणं दत्त्वा मनोहरां विपणिनां गृहमर्धदिने प्रस्थापयामास। स्थूलं च वेणुपात्रं गृहीत्वा निरगमद्वणिजां गृहम्। वणिजः करे पणं प्रादात्। यावता वेणुपात्रे गोधूमान्प्रक्षिपति तदानीं तस्या उपपतिस्तां दृशा कलितवान्। स च संकेतं निर्माय तामाहृतवान्। सा च तन्निर्दिष्टं प्रदेशं निरगच्छद्वणिजं प्रत्यभ्यधाच्च। एते गोधूमा अस्मिन्वेणुपात्रे निक्षिप्य स्थापयितव्याः। स च वणिक्तद्व्यवसितं चाचरीत्। ततस्तद्वेणुपात्रं विशुष्ककरीषशकलपूरितं निधायोपरि सिचयखण्डेनापावृणोत्। सा च भुजंगसंगतं विधायानन्दातिशयलहरीपरिरब्धान्तःकरणा वेगेन देहि मदीयं वेणुपात्रमिति विपणिनं जगाद। तेन वणिजा शिरोनिहितं वेणुपात्रमनालोकयन्त्येव गृहीत्वा समागमन्निजगृहान्मनोहरा। पश्चाद्गृहाङ्गणे वेणुपात्रं संस्थाप्य श्वश्रूस्तामभ्यधात्। दर्शय गोधूमाः कीदृशाः सन्ति। समानीयतामित्यभिधाय मनोहरामवलोकं चिकीर्षुर्गोधूमानां तदन्तिकमागाच्छ्वश्रूर्यावदुद्घाटयति तावता करीषशकलपरिपूरितान्तरं तत्पात्रं दृग्विषयीचकार। तर्ह्यभिदधातु प्रभावति भवती। समये ऽमुष्मिन्सा किमुत्तरमकरोत्। तदा प्रभावती परोन्मेषविघटनपटुमतिवैशद्यं बिभ्राणापि न तदुत्तरविरचनं विवेचयति। ततस्तया तदुत्तरावबोधनाय पृष्टः शुको ऽकथयत्। प्रभावति निशामय। ततः श्वश्र्वाभिहिता सा। अयि पुत्रपत्नि मनोहरे गोमयचूर्णं किमेतदिति पृष्टा सा मनोहरा गिरमस्राक्षीत्। अम्बाहं वणिजां गृहानगमम्। ततो वणिग्गृहेषु साधीयांसो गोधूमा अत्युज्ज्वलपक्वान्ननिर्माणे पटीयांसो मिलन्ति। तदनु गवामगारमध्ये तु खनिमध्यात्साधीयसो गोधूमान्बहिराकर्षन्तो ऽभूवन्। तत्र गोधूमानयनाय जनेनैकेनाहमप्याहूता यावता तत्र गच्छामि तावता गोभिर्विषमसंचारे पथि स्खलित्वाहमपतं पणः पाणिस्थितः सो ऽप्यपतत्। तत्र पणमालोकमानापि नाविन्दं तत्रावनौ विकीर्णं करीषशकलचूर्णं समानीतं तथा इदानीं शूर्पे निक्षिप्य पणं मृगयामि। तर्हि प्रभावति उत्तरमित्थं वेत्सि चेत्तदा साधय॥

इति द्वात्रिंशत्कथा ॥ ३२ ॥

पुनः प्रभावती रामचन्द्रमप्राक्षीत्। सो ऽप्यभ्यधात्। मालतीवोत्तरनिर्माणविधौ पाटवं प्रकटयसि यदा तदा यातव्यम्। ततः प्रभावती बभाण रामचन्द्रम्। का मालती। कथमुत्तरमाविरकार्षीत्। तद्वृत्तान्तमावेदयतु भवान्। ततः सो ऽप्यगाहत गिरम्। शृणु कौमुदि। निषादसंज्ञं नगरम्। तत्र वज्राभिधः कृषीवलः। तस्य भार्या मालती। सा परपुरुषनिरता। इत्यमुत्तरायणपर्वणि शसत्करतण्डुलपिष्टकस्य पिण्डानकार्षीत्। ततो भर्तुर्भोजनाय वस्त्रेण बद्ध्वा पिण्डकान्क्षेत्रं प्रति निरगात्। मार्गे गच्छन्त्यास्तस्याः

पूर्वपरिचितमैत्रो देवदत्तः पथि संगतवान्। तदन्वसौ पुटीकृतवान्। महादेवः परमेश्वरः यदा स्वानुकूलो भवति तदानीमीदृग्विधो लाभः करतलमापद्यते। यत्सर्वदा धारावाहिकया स्मृतिपदं न जहाति तदेव करप्राप्यं जायते। इत्यभिधाय तां करे गृहीतवान्। तदा सा वराकी तस्य दाक्षिण्येन परिगृहीतमानसा न किमपि निषेधवचनं व्याहरति स्म। तदभ्यर्थनं न निषेध्यमित्यङ्गीकारेण न विलम्बयति स्म। तद्भर्तृभोजननिमित्तपरिक्लृप्तपिण्डकावस्थानं वेणुपात्रं पथ्येवावारोपयत्। ततस्तदुपभोगनिमित्तं विविक्तप्रदेशविशेषमगात्। एकस्तु धूर्तस्तयोर्वृत्तान्तं वीक्षमाणो निवसति। तदनु तद्वेणुपात्रोपान्तमागत्योद्घाट्य यावता पश्यति तावता तण्डुलपिष्टपरिक्लृप्ताः पिण्डकास्तत्र न्यस्ताः सन्ति। ततस्तु धूर्तस्तेषां समस्तपिण्डकानां पिण्डमेकत्र कृत्वा सर्वस्वैकमेव व्याघ्ररूपमकार्षीत्। तद्वेणुपात्रं पूर्ववद्वस्त्रखण्डेन प्रावृणोत्। ततो ऽसौ यथेच्छमगमत्। ततः सा मालती स्वसमीहितं संसाध्य तद्वेणुपात्रं गृहीत्वा भर्तुर्भोजनदानाय क्षेत्रमुद्दिश्यागमत्। तत्र गत्वा वेणुपात्रमवारोपयत्। भर्ता चाभ्यवहरणाय समाजगाम। भर्ता यावतोद्घाट्य पश्यति तद्वेणुपात्रं तावता पिष्टनिर्मितं व्याघ्रस्य रूपमपश्यत्। तर्हि प्रभावति वावदीतु भवती। सा तस्मिन्समये किमुत्तरं प्रगुणीचकार। प्रभावती तद्विचारयितुं प्रवृत्ता परं नाध्यवागच्छत्। ततः प्रभाते सा शुकं पप्रच्छ। ततो ऽवदत्सो ऽपि। देवि तस्याः पतिस्तां पृष्टवान्। त्वया किमेतत्पक्वान्नमानीतमस्ति। सापि व्याहार्षीत्। किं तव पुरो वच्मि। वज्रदेवात्याश्चर्यं नूतनमपि प्रावर्तिष्ट। अद्याहं शर्वर्यां भवदुपरि दुःस्वप्नमेकमद्राक्षम्। त्वं क्षेत्रे रात्रावुषितो ऽसि। द्वीपी समागत्य त्वामग्रहीत्किल। तदानीं मदीयो जीवो ऽतितरां दैन्यदशामापेदे। तदनु दैवयज्ञं वासुदेवमाहूयाप्राक्षम्। किंप्रकारो ऽयं स्वप्न इति। ततो ज्योतिर्विदवादीत्। * * * पिष्टमयव्याघ्रचिकायः कृत औत्सुक्यपरतन्त्रायास्मै तद्दुःस्वप्नजनितदुःखभरपरिखिन्नायाः पथि यदाजायत तदहर्जानामि नो। अनस्तमितप्रतापो ऽयं भगवांस्तरणिरिव जानीते। तदनु वज्रदेवस्तच्चरणयोः पपात उवाच चैताम्। वयस्ये मम गृहे न भवत्सदृशी गृहिणी पतिप्रणयपरिणतकरणगणा। सो ऽहं कलितसकललोककवलनकरालितकलेवरात्कालादपि न बिभेमि। तर्हि प्रभावतीति युक्तविशेषविलसितसारमुत्तरं चरीकरीषि यदि तदानीं याहि स्वमनीषितम्॥

इति त्रयस्त्रिंशत्कथा ॥ ३३ ॥

पुनः प्रभावती गिरा जग्राह विहंगमम्। सो ऽपि प्रासोष्ट वाचम्। देवि धूर्तमायाकुट्टिनीव स्वस्योपरि समापतत्परिभूतत्वं पुनस्तपःसरणे प्रसरति यदि प्रभासमुत्सेकस्तदानीं तरलतरतामवलम्बस्व। तदनु प्रभावती तद्वृत्तान्ताकर्णनाय पतत्रिणा विवर्णयिषुर्जगाद। कथं तद्वृत्तान्तम्। व्याहरतां भवान्। ततः सो ऽभ्यधात्। हस्तिनापुराभिधाने नगरे कमलाकरो विपणिः। तत्तनयः प्रथिततनयो रामः सर्वाः समस्ताः कलाः पर्यशीलयत्। ततो ऽसौ कमलाकरो व्याहरति स्म। अथास्मत्पुत्रो रामः कलामात्रं शिक्षितवान्। परं स्त्रीणां चरितं न वितरति मानसे ऽस्य बोधसाधर्म्यम्। तर्ह्ययं तदपि शिक्षितव्यः। तदन्वेकां धूर्तमायाकुट्टिनीं समानीय तामित्थमवादीत्। त्वया च मदीयस्तनयः समस्तमपि स्त्रीणां चरितं ज्ञापयितव्यः। यथा धूर्ताः स्त्रियो नैनं प्रतारयन्ति तथा बोधयितव्यः। अहं भवत्यै सुवर्णानां सहस्रं प्रयच्छामि। यदि कदापि धूर्ताः स्त्रियो ऽन्याः प्रतारयिष्यन्त्येनं तदाहं सुवर्णानां द्विसाहस्रं भवत्याः सकाशाद्ग्रहीष्यामि। इति नियमं निर्माय कुट्टिनीहस्ते ससुवर्णं रामं प्रदत्तवान्कमलाकरः। ततः सा धूर्ता कुट्टिनी समयं समस्तमपि स्त्रीचरितं विगलितकीलनं रामायोपदिदेश। सा तं रामं सकलनिजकलागहनपरिणद्धान्तःकरणं विधाय कमलाकरस्य हस्ते प्रायच्छत्। ततः कदाचित्स्वसुतं बुद्ध्यवधानाय बोधनाय धनार्जनाय रामं देशान्तरमुद्दिश्य प्राहिणोत्। स तु स्वर्णद्वीपं प्रपेदे। तत्र कलावतीति वेश्या। तया सह विषयोपभोगं कुर्वाणः सुखेन तिष्ठति। सा च कलावती तेन रामेण

समं बहुधा वेश्याभिव्यक्तिविजृम्भकं मनसा वचसा वपुषा चरितानुसरणेन च प्रयत्नातिशयं प्रतिक्षणं पुष्णाति परं न तस्य मानसं भ्राम्यति। तत एकदा कुट्टिनी कलावतीमवादीत्। रामो ऽयं दिनैः पञ्चषैः स्वग्रामं गमिष्यति त्वं त्वेनं भ्रामयितुं न पारयसीति। तदा सा तां जगाद। अहं सर्वप्रयत्नेन प्रकारसामर्थ्यं निर्मिमाणासं परमेतदीयं मनो नाक्षुभ्यत। किं करवै। ततः कुट्टिनी प्रकटीचकार वाचम्। कलावति तर्हि त्वयायमेवाभिधातव्यः। स्वसंवसथं यास्यसि। ततो भवतो विनाहं विरहवेदना-वैधुर्यं सोढुं न प्रभवामि। तर्हीदानीमेवाहं प्राणांस्त्यक्ष्यामीत्यभिधाय तस्मिन्पश्यत्येवात्मानं जलगर्ते प्रक्षिप। ततस्तन्निशम्य कलावती भारतीमगिरत्। एतद्भवत्यभिहितमत्यसमञ्जसम्।

यतो ह्याहुः। अतिक्लेशेन ये ह्यर्था धर्मस्यातिक्रमेण च।
शत्रूणां प्रणिपातेन मम ते ऽर्था भवन्तु न॥

ततः कुट्टिनी वाचमनीयत रसनायम्। आयुषो विनाशं विना शक्नोति न मरणमभिभवितुम्। अन्यच्च। सहानुसंधानमासाद्य विविधबुद्धिविधाननिबन्धनकरमपि न चिन्वन्ति सन्तः।

अत आह। न साहसमनारुह्य नरो भद्राणि पश्यति।
साहसं सर्वकार्येषु भद्रलक्ष्म्याभिभाजनम्॥

इत्थमुक्ते तत्कुट्टिनीवचननियमितमानसा तस्मिन्नामे पश्यत्येवात्मानं जलगर्ते चिक्षेप। तदनु धावमानो रामस्तत्कूपसमीपं गत्वा तां समीचयामास। तदा स्वमनसि चमत्कृतवान्। इत्थमभ्यधाच्च। नैतस्याः चेतः प्रपञ्चोपचयपरिचितिपारीणम्। इयं केवलं मामेवानुसृतवती। तदनु यत्किमपि तस्य धनमभूत्त-त्करसात्कृतवान्। तदनु कैश्चन दिनैर्निर्धनमाजातं तमालोक्य दूरीचकार कलावती। ततो धनविरहितो रामो निजनगरमाजगाम जनकस्य पुरस्तादुदितमवर्णयत्। स तु धूर्तमायाकुट्टिनीं समाहूय सहस्रद्वयं सुवर्णानामयाचत। तदा सा कमलाकरमभ्यधात्। तस्मिन्नेव नगरे पुनर्धनार्जनोद्देशेन व्यापारपुरस्कृतं रामं प्रस्थापयतु भवान्। अहमप्यनेन समं प्रयायाम्। तदनु स तामपि स्थानविशेषं प्रातिष्ठिपत्। ततो रामस्तत्स्थानमासेदिवान्। ततस्तदभिमुखी कलावत्यागच्छत्। तदागमनोद्देशोपयाचितदीपिका विभिन्नबाधा रूपवकुलसंभ्रमविभ्रमवती रामपरिसरमागत्य नीराजयामास रामम्। तदनु नृत्तगीतवा-द्याद्यनेकोपचारप्रपञ्चपरिचितं निजनिकेतनमनैषीत्। द्वावपि सुखेन विषयान्बुभुजाते। तर्हि प्रभावति त्वमपि चारु विचिन्त्याचक्ष्व। तदा सा तदीयं धनं कथमानीतवती। ततः प्रभावती तच्चिन्तायां दत्तचित्तापि धनानयनोपायं न कलयति स्म। तदा तया पृष्टः पतंगो व्याचष्ट। तदानीं धूर्तमाया कुट्टिनी रामाय संकेतं प्रादर्शयत्। त्वया गत्वात्मोपरितनभूमिकायां कलावत्या मन्दिरस्य शारि-भिर्देवनीयं तयैव सह। अहं च तेनैव वर्त्मना गमिष्यामि तद्गृहं पुरतो गत्वा त्वं तु मामभिवीक्षमाणो मञ्जीतिचिन्तितः। परतो दृष्ट्वा त्वामपसरन्तं कलावती प्रक्ष्यति। त्वं किमित्यात्मानं गोपायसीति। तदा सा भवतैवमभिधातव्या। इयं पुरतो मार्गे समागच्छन्ती वाग्श्रेयकारिणी जरती मदीया जननी सा। एतदीयं द्रविणं नीत्वा भवत्याः संनिधानं पूर्वमागतवान्। तद्धनं भवत्यै दत्तम्। इदानीमियमा-गतास्ति। को जानीते किं करोमीति। इति वचनं भवता श्रावयितव्या कलावती। कुट्टिनीकृतसंकेतो रामः कलावतीमन्दिरमागच्छत्। तत्र गत्वा तया सहोपत्यकायां शारिभिरदीव्यत्। तदा धूर्तमाया कुट्टिनी स्कन्धोपरि विपञ्चीं विमुच्य तदग्रमार्गमनुससार। रामो ऽपि तदभिमुखमेवालोकमानस्तिष्ठति। स च तामभिवीक्ष्य क्रीडां तत्याज च तद्दृग्गोचरे गतवान्। ततः कलावती तमपृच्छत्। त्वं कस्मा-दुत्थितो ऽसीति। तदासौ पूर्वतनं व्याहृतं तस्या अग्रे जगाद। ततः कुट्टिनी द्वारप्रदेशमापतत्। ता-न्गृहस्थितान्वावदीति। मदीयं पुत्रं रामं प्रस्थापयन्तु। मम सर्वस्वमपहृत्य भवतीनां हस्ते वितीर्णमस्ति।

ततस्ताभिरप्राच्छि सा। का किंनामधेयेति। कुत्रत्येति। सावोचत्। पद्मावत्यां नगर्यां सुदर्शनस्य मेदिनीपरिवृढस्य प्रातःकालगायकाहम्। अहं मातंगगायका। अयं च मम पुत्रः। भवत्यश्चैतदीयेन संसर्गेण वर्तमानः समस्तमपि साधुलोकमशुचीकरोति स्म। परं भवत्यो यथारुचि कुर्वन्तु। मम तेन किं प्रयोजनम्। इति वचोभिस्ता अबिभयुः। तां गृहान्तरमानयामासुः समस्तं धनं तस्यै प्रायच्छन्। तच्चरणयोरपतंश्च। वार्त्तेयं न कस्यापि पुरो ऽभिधातव्या। इत्यभिधाय सधनां तां प्रातिष्ठिपन्। तर्हि प्रभावतीति विशेषमायानटने प्रागल्भ्यं बिभर्षि यदि तदा साध्यतामिति॥

इति चतुस्त्रिंशत्कथा ॥ ३४ ॥

प्रभावती पुनरप्राक्षीच्छुकम्। तेनापि व्याहारि। देवि रतनादेवीवोत्तरं कर्तुं जानीषे यदि तदा साध्वभिसर। इत्यभिहिते शुकेन प्रभावत्यवादीत्। रतनादेवीवृत्तान्तमावेदयेत्यभिहितः शुको व्याजहार। इन्द्रपुरे नगरे विक्रमसिंहनामा राजपुत्रस्तस्य सहचरी रतनादेवी। स तां ताडयति गालीर्वितरति विनैव प्रयोजनमीर्ष्यालुतां प्रकटीकरोति। को ऽत्र समागतो ऽभूत्को वा गतवान्। हे उपपतिसमुद्भवे द्वारीप्रदेशे कस्मादूर्ध्वा स्थितासि निर्निमित्तं सिचयं कस्मात्संवीतं भवत्या। इत्याभाष्य वाचाटतां प्रत्यहमुपन्यस्यति तां प्रति। ततः सा स्वमनोगतं निगदति स्म। अयमेवंविधः पापिष्ठतमः। तर्ह्येतस्य वञ्चनाप्रपञ्चने ऽपि न कश्चन दोषकलङ्कशङ्कुशङ्काकुलितोत्पातः। तदनु सा व्यभिचारचरणाय प्रवर्तते स्म। व्यभिचारविद्यायामतीवाशेषकोविदा चण्डचरिता प्रावर्तत। तदा तन्नगराधिपतिना समं तथा तस्य सुतेन च सह गच्छति। परस्परं ज्ञातुं न ददाति। एकस्मिन्दिवसे ग्रामाधिपसुतेन सह सुरतोपभोगं कुर्वाणास्ति। तावतासौ ग्रामाधिप एव समागतः। ततः सा तमालोक्य तत्पुत्रं गोपायति स्म तं च मन्दिराभ्यन्तरमाजुहाव। तमपि पूर्णमनोरथमकार्षीत्। तावता विक्रमसिंहराजपुत्रः कोपकलुषितः समागतवान्। तर्हि प्रभावति व्याचष्टां नाम भवती। एतस्मिन्नवसरे तया किमुत्तरमकारि। सा च विचारविशदमानसापि न तदुत्तरं कलितवती। ततः शुको ऽभाषत। आकर्णय प्रभावति। भर्तारमायान्तमवगत्य ग्रामाधिपस्य हस्ते कशां प्रायच्छत्। त्वं शपथं दधानो बहिर्निर्गच्छ। मदीयः पुत्रश्चण्डालो यदा मम हस्तप्राप्तो ऽभविष्यत्तदानीं तस्य शिर एव हरिष्यामीत्यमिदधानो तिष्ठन्नेव बहिर्गत्य याहीति। तदासौ ग्रामप्रभुस्तादृगभिनयस्तथैव व्याहरमाणो बहिर्निरगात्। विक्रमसिंहरावुत्तो मन्दिरमध्यमागत्य रतनादेवीमप्राक्षीत्। यमगृहीतो ऽयं ग्रामनायकः कस्य गालीर्वितरन्निर्गच्छति। ततः सा रावुत्तमवादीत्। इदानीं भवन्तः श्रान्ताः सन्ति। पूर्वं सुपर्वपरिचर्यान्तं प्रत्यवसानं च कुर्वन्तु। पश्चाद्भवतः पुरो वृत्तान्तमिदमभिधास्यामि। तदनु रावुत्तस्तु सुपर्वार्चनमभ्यवहरणादिकं च कृत्वा ताम्बूलपूरिताननो भूत्वा सुखासीनः श्रमं तत्याज। तदा रतनादेवी भुक्त्वा रावुत्तसंनिधिमागत्य तद्वृत्तान्तव्याहरणाय प्रावर्तत। रावुत्त किमप्यद्य नूतनमजायत। ग्रामपरिवृढः सक्रत्पुत्रस्योपरि चुकोप। कृपाणं निरस्तकोशं कृत्वा तत्पृष्ठमग्रहीत्। तदानीमसौ वराकस्तस्य पुत्रो रिरक्षिषुः पलायमानो ऽस्माकीयद्वारपुरोदेशे वर्तिनीं दृष्ट्वा मामेवमवादीत्। मां रक्षत रक्षत। शरणमागतो ऽहं भवताम्। तदानीमहं यौष्माकीनविरुदस्यास्मार्षं शरणागतवज्रपञ्जर इति जगत्प्रसिद्धस्य। अत एवायं यावदसौ ग्रामाध्यक्षो नागच्छति तावता गृहमध्ये गोपितः। ततस्तत्पृष्ठसरस्तज्जनको ऽपि कोपपरवशः समागत्य गृहमध्ये प्रविश्य स्वपुत्रं वीक्षांचक्रे। तदा तत्पुत्रं पृष्ठवर्तिनं विधाय पुरस्तादहमतिष्ठम्। तदन्वसावाक्रोशमानः पुत्रमनवलोकमानो गालीर्वितन्वानः क्रोधेन जाज्वल्यमानो निरयासीत्। ततो विक्रमसिंहरावुत्तो रतनादेवीमवादीत्। तस्य पुत्रः कुत्रास्ति। तं मम दर्शय त्वम्। तदा सा तं बहिर्निर्गमय्य प्राहिणोत्। ततो ऽसौ रतनादेवीचरणौ स्वशिरसा ववन्दे। यद्यत्र त्वमेतन्नाकरिष्यस्तदानीं समस्तस्य

वंशस्य कलङ्कमविकलमागमिष्यत्। इति तां वचोनिचयोदयेन समतोषयत्। तर्हि प्रभावतीदृग्युत्त्युपबृंहितमुत्तरं कर्तुं कलितमतिर्भवसि यदि तदा व्रज॥

इति पञ्चत्रिंशत्कथा॥ ३५॥

ततः प्रभावती शुकं पप्रच्छ। सो ऽब्रवीत्। त्वमपि देवि सुरतसुन्दरीव यथायासनिस्तरणे ऽवदातमतित्वं प्रथयसि तदानीमङ्गीकुरुतात्। तदा प्रभावत्या तद्वृत्तान्तावभावाय पृष्टः शुकः प्रोवाच। शङ्खपुराभिधाने नगरे महाधनाभिधो याज्ञिकः। तस्य सहचरी सुरतसुन्दरी। सा च परपुरुषानवरतरतनिरता। तस्याः पतिर्यदि किमपि वावदीति तदा तं न सहते। वृथैव पत्युरुपरि यथाकथंचन व्याजरीहरीति। ततो ऽसौ तद्भीत्यावलम्बितमौन एवावतिष्ठते। एकस्मिन्दिने सा निजमुपपतिं गृहमानिनाय। ततो यामिनीजेमनं विधाय सर्वे ऽपि गृहनिवासिनः शयनाय शयनीयमशिश्रियुः। दीपो ऽपि निर्वाणभावं प्रापितः। तदा भर्तारं निद्राणमाज्ञाय सा भुजंगेन संगता भुजंगी प्रतिभाविरामसमुज्झितदुदया निभृतरसानन्दामन्दसंबन्धा नितरामरंसीत्। ततस्तद्रतिजनितध्वनिं महाधनो ऽप्यशृणोषीत्। ततस्तं ग्रहीतुं करं प्रायुङ्क्त महाधनः। तदा स करस्तस्योपपतेर्मेहनमग्रहीत्। तदासौ सुरतसुन्दरीमभाषिष्ट। मया चोरो ऽस्ति विधृतः। त्वं वेगेन गत्वा दीपं समानय। ततः सापि व्याजहार। अहं दीपाहरणाय द्वारि गच्छन्ती बिभेमि। अहमेव चोरं गृहीष्यामि भवन्तो गत्वा दीपमानयन्त्वित्यभिधाय ततः सा चोरमग्रहीत्। महाधनस्तु दीपमानेतुं बहिर्निरगात्। ततो बहिर्गते महाधने साप्युपपतिं मुमोच। तदा सा महिषसिंहस्य जङ्गजिह्वामाकृष्य जग्राह। महाधनस्तु दीपमुज्ज्वाल्य समानयत्। यावत्पश्यति तावता कासारग्रावस्य रसना पाणिना नियन्त्रितास्ति। तदालोक्य महाधनं व्याहार्षीत्सुरतसुन्दरी। साधु साधु। वीराचरितं चरितमकार्षीः। त्वया नेतरैः शूरैरीदृक्कर्तुं शक्यते। तथेत्यभिहिते महाधनो ऽपत्रपिष्णुरिवावतिष्ठत्। तर्हि प्रभावतीदृग्विधमुत्तरं कर्तुं भवती पारयति यदि तदानीं सुखेन गच्छतु॥

इति षट्त्रिंशत्कथा॥ ३६॥

पुनः प्रभावती विनयकन्दर्पनामधेयनरेन्द्रं जिगमिषुः पक्षीन्द्रं प्रति प्रायुङ्क्त वाचम्। तां निशम्य सो ऽप्यभ्यधात्। देवि बुद्धिमतीव संकीर्णासक्तिनिस्तरं कर्तुं जानासि यदि तदा स्वमनोभिलषितमसंकुचितधिया साधय। ततः प्रभावत्यवादीत्। हे पक्षीन्द्र बुद्धिमतीवृत्तान्तमावेदयादितः। तच्छ्रुत्वा शुको ऽप्यवोचत्। उचोपुरं नाम नगरम्। तत्र सांपुरतनामधेयः कृषीवलः। तस्य सहचरी बुद्धिमती। सा परपुरुषरतसमुदितमानसा। भर्तुः कृते चेत्रभोजनं गृहीत्वा गच्छन्त्या मार्गे कस्यचिदेकस्य तरोस्तले जारेण सह प्रत्यहं रहस्यसुखमनुभूयते। तस्यास्तद्विलसितं सर्वे जानते। ते तच्चरितं सांपुरतकर्षकस्य पुरस्तादाचचक्षिरे। तदन्वसौ तस्याश्चरित्रस्यावजिगमिषया तमेवानोकहमारुह्य प्रच्छन्नतनुः स्थितवान्। ततो गृहीतभोजना गृहादागता तमाजगाम बुद्धिमती। तत्रागत्य तदन्नं जगत्यां निवेश्य भुजंगेन संगता समुपभोगभङ्गिविगलितविग्रहाग्रहपरिग्रहं तदेकतानकलितपूर्वापरकलाकलापकवञ्चलं निरतिशयं विषयसुखमन्वभूत्। ततस्तयोस्तथाविधनिबद्धरसविलसदसममनःसमुदयानन्दघनतां निरीक्ष्य वनस्पतेरवततार। बुद्धिमती च तरोरवतरन्तं तं लक्षीचकार। तर्हि वावदीतु प्रभावति भवती। तस्मिन्समये सा किमुत्तरमकरोत्। ततः प्रभावती चिन्तयन्त्यपि नाबुध्यत। ततस्तयानुयुक्तो द्विजो ऽपि निजगाद। सा च भर्तारं वीक्ष्य उपपतिं प्रातिष्ठिपत्। तदा तत्पतिस्त्र समागत्य बुद्धिमतीं पर्यप्राक्षीत्। भवत्याः संनिधाने द्वितीयः पुमान्क आसीत्। ततः सा पतिमवादीत्। त्वं किं न जानीषे। द्रुमस्यास्यायमेव स्वभावः। एतदारूढो जनो हि स्थलस्थितमेकमपि द्विवेन पश्यतीति पूर्ववृद्धा आचक्षते। तदा स्वयं

च तं महीरुहमारुरोह बुद्धिमती। तदानीमाहूय तं प्रत्येवमवादीत्। त्वमप्यपरसीमन्तिन्या समं सुरतसुखमुपभुञ्जानो ऽसि। एवंविधस्त्वं पापतमः। तर्हि राजकुलानेत्य भवच्चरितं निवेदयिष्यामि भवन्तं नमीकरिष्यामि। तदासौ व्याहरत्। तादृशं बह्वायासोपपादितश्रमसामस्त्यसमयमित्यादिबुद्धिवैभवगहनप्रयोगकल्पनातारतम्येन यद्यतिवर्तितुं प्रभवसि यदि तदा साधयेप्सितम्॥

इति सप्तत्रिंशत्कथा ॥ ३७ ॥

ततः पुनः प्रभावती भुजंगसंनिधानं जिगमिषुः पतंगं परिस्रयति स्म गिरा। तदुदितं निशम्य सो ऽपि जगाद। देवि मदनावतीवोत्तरविरचनायां चातुर्यं तनोषि यदि तदा साधयतु भवती। सा तद्वृत्तान्तं पप्रच्छ शुकं शुको ऽप्यवोचत्। नाकपुरे नगरे रथकारो हि करालनामा। स तु द्वितीयां स्त्रियं पर्यणैषीत्। तस्या मदनावतीति नामधेयम्। सा च परपुरुषसुरतनिरता। तदा जनेभ्यस्तस्या व्यभिचारचरितं निशम्य रथकारः प्रत्ययावगमाय गृहे ग्रामगमनमभिधाय निरगात्। ततः प्रदोषसमये गुप्तद्वारमार्गेण कैरप्यलक्षितो गृहमध्यमाजगाम। स त्वागत्य मञ्चकस्य तले निलिल्ये। मदनावती च रथकारचरितं नाज्ञासीत्। तदा सा रथकारं ग्रामान्तरगतमवगत्य नितरामानन्दलहरीपरीताङ्गा समजायत।

यत उक्तम्। दुर्दिवसे घनतिमिरे गतसंचारासु नगरवीथीषु।
पत्युर्विदेशगमने परमं सुखं जघनचपलायाः॥

रथकारो गृहे नास्तीति मत्वा तया निजोपपतिर्गृहं समानिन्ये। तेन समं विनोदगोष्ठीमनुभूयमानासीत्। तदा स्वचरणेन भर्तारमस्प्राक्षीत्। सा चरणस्पर्शादेवैत्यवागच्छत्। मदीयो भर्ता प्रच्छन्नतनुर्मां शिक्षयितुमत्रागत्य निलीनो निवसति। इति मनस्यभिधायोत्थातुमुपचक्रमे। तदानीमुपपतिरुत्थाय तां कचबन्धे जग्राह। तर्हि प्रभावति त्वमाचक्ष्व। तदा तथाविधे तस्मिन्समये तया किमुत्तरमकारि। ततः प्रभावती विचारे प्रयत्नं कुर्वाणापि संशयनाशं न परिचिनोति स्म। तदानीं तदवगमनाय पृष्टः शुकस्तां प्रति प्रोवाच। शृणु प्रभावति। कचगृहीतया तया व्याहारि। मया तव पुरस्तात्पुरैव व्यवहारि। रथकारस्तु सांप्रतं ग्रामान्तरं गतो ऽस्ति। त्वमौत्सुक्यं मामभिधेहि। यद्यहं त्वदीयसाधनसंबन्धिनी। तव धनेन संबन्धो रथकारस्यान्तिकमाजगाम। तर्हि रथकारो ग्रामादागच्छतु। तदनु त्वं तमेव जहीहि तव मनसि यद्रोचते त्वं रथकारस्य तत्कुरु। मामपि तव मनःसमीहितं विधेहि। इत्थं तस्या वचनानि रथकारो ऽश्रौषीत्। ततस्त्वसावबिभेत्। मनस्यभिहितवांश्च। लोकानां धनसंबन्धभागधेयं गृहीतं तदतिशयेनानौचित्यमकारि। इत्यभिधाय विदितभाषया परित्यागं विधाय निरगात्। तर्हि प्रभावति यद्येतादृग्गमुत्तरं कर्तुं पारयसि तदानीमाचर स्वोचितम्॥

इत्यष्टत्रिंशत्कथा ॥ ३८ ॥

पुनः प्रभावती पक्षिणं पप्रच्छ। ततः शुको ऽभिदधे। देवि श्वेताम्बरवदात्मन उपरि समापतितं प्रच्छन्नाभियोगमन्यस्योपरि आरोपयितुं प्रभवसि यदि तदानुतिष्ठ। ततः प्रभावत्या पृष्टः शुकस्तद्वृत्तान्तं प्रबभाषे। शृणु। श्रीपुरे नगरे नरेन्द्रनामा श्वेताम्बरः। सकलमपि लोकं वशीचकार। सर्वो ऽपि तस्य वरिवस्यां साधुतया नियमपरमतया कुरुते। तदनु दिव्यान्नाहारसंबन्धात्तस्य विषयवासनाप्युदियाय। तदासौ विषयविवशो वेश्यया सहितस्तिष्ठति। तच्चरितमेको दिगम्बरस्त्वज्ञासीत्। तच्छ्वेताम्बरचरितं श्वेताम्बरभक्ताय दिगम्बर आवेदयत्। भवदीयः श्वेताम्बरो रात्रौ वेश्यागृहं प्रवसति। अद्य प्रदोषसमये भवद्भिरवेक्षणाय समागन्तव्यम्। स च वेश्यासहितः श्वेताम्बरो द्रष्टव्यो भवतां भविष्यति। ततस्ते श्रा-

वकाः श्वेताम्बररक्षणाय परित उपविविशुः। कृतसंकेतः श्वेताम्बरो निजमन्दिरे न्यवात्सीत्। ततो वेश्यापि तस्य वेश्म प्राविशत्। तदा श्वेताम्बर इत्यवगतवान्। मद्रक्षणकृते एते ऽत्र परितः प्रसरीसरन्ति। तर्हि प्रभावति भवत्यप्यावेदयतु। तदा श्वेताम्बर आत्मनः संजायमानां मानखण्डनां कथमपाकृतवान्। ततः प्रभावती विचारप्रतिभानिरता समजायत। यदा नावगच्छति तदा शुकमप्राक्षीत्। ततः शुको ऽप्यवोचत्। शृणु प्रभावति। श्वेताम्बरस्तथेत्थं निरणैषीत्। यदिदं कैतवक्षपणको मद्रुपर्यारोपयन्नस्ति अस्य क्षपणकस्य स्फिगुन्नतो ऽफलं दर्शयिष्यामीत्यभिधाय स्वयं क्षपणकवेषं विधाय पाणिना वेश्यां विधृत्य बहिर्निरगात्। तद्रक्षकाः श्रावकाः तं क्षपणकमद्राक्षुः। तदन्वभिमुखं गत्वा विशेषतया न विविचांचक्रुः। क्षपणकं चावज्ञासिषुः श्वेताम्बरं च सर्वे ऽपि मानयामासुः। तर्हि प्रभावति त्वमेवंरूपमुपायं परिकलयसि यदि तदानीं स्वसमीहितसाधनपरा भव॥

इत्येकोनचत्वारिंशत्कथा ॥ ३९ ॥

पुनरपि प्रभावती शुकं पप्रच्छ शुको ऽपि नानन्दीति स्म। देवि शशकवदात्मनो मरणमपाचरीकरीषि तेनैव वैरिणः पराहताः तथा बुद्धिविशेषं प्रयुनक्षि यदि तदानीं यायाः। तदानीं तद्वृत्तान्तबुभुत्सया प्रभावती प्रवभाषे। शशकवृत्तान्तं ब्रूहीति। ततः शुको बभाषे। शृणु श्रवणालंकरणवाणि। तारकरालाभिधाटवी। तत्र कुटिलनामा पञ्चाननः। स तु सर्वानपि वनजीवान्निहन्ति। तदा तद्वनवासिनः सर्वे ऽपि संभूयासह्यपराक्रमं सिंहं विज्ञापयामासुः। देव मृगराजावस्थानसमर्पणेन प्रसीद। त्वमेव तस्य काननस्य परिवृढः। वयं सर्वे ऽपि भवदीयाः प्रजाः। त्वत्पुरस्तादापतितं सर्वमपि मारयसि त्रयः खलु चत्वारो वा। तर्हि भवतैवं विधातव्यमत्यन्तमनुचितम्। त्वया च सर्वदा स्वगुहायामासीनेन स्थातव्यम्। प्रत्यहमेकैको मृगविशेषो भवन्तं समागमिष्यति स्वयमेवेत्थं भवते बुभुक्षाप्यपहरिष्यते। तथा वयं च युगपदेव न परिक्षयमाप्नुमः। इति तेन समं नियमं परिकल्प्य ते वनवासिनो मृगा अतिष्ठन्। प्रतिदिनं तेषां निवसतां तत्र यस्मिन्दिने यस्यावसर आयाति स तु स्वयमेव गच्छति तत्समीपम्। अनेन प्रकारेण ते तत्रासते। तस्मिंश्चकोरनाम्नः शशकस्य समयः समायातः। स तु शशको वेगादेव भोजनावसरे न तत्परिसरं सरति स्म। तदनु भोजनसमयमतिक्रम्य गतवान्। तदा सिंहस्तमवेक्ष्य कोपपरवशः प्रहर्तुमुदतिष्ठत्। तर्हि त्वं वावदीहि प्रभावति। स त्वात्मीयं मरणं तस्मात्कथं निराकृतवान्। इति शुकवचननिशमनसमय एव प्रभावती विचारविशदमतिरभवत्। न कथयति स्म तदुत्तरम्। पश्चात्पतत्त्रिणमप्राक्षीत्। शुको ऽप्यभ्यधात्। शृणु प्रभावति। सिंहस्य पेटाकपोलालिकोपरि यावता पतति तावता शशकः शशंस। देव देवप्रभो महाराज मदीयमेकमुत्तरमाकर्णय। तव मनसि जातः कुलसमन्वितः कश्चिदभिमानविशेषो ऽस्ति न वा। अस्ति चेत्तदानीं मदीयमभिमतं सादरं समाकर्णय। अहं तु मध्यंदिन एवागतो ऽभवम्। त्वदन्यः पञ्चाननो मध्येमार्गं मां गृहीतुं उदयुनक्। मया च भवदभिधानमग्राहि। आरोषमाणस्त्वद्विषयिणीर्गालीर्वितन्वानो महतीं निन्दां कर्तुं प्रावर्तत। ततो ऽहं स्वामिनस्तव निन्दामाकर्णयितुमशक्नुवानस्त्वदुपान्तमासेदिवान्। देव एव प्रमाणमित्यभ्यधात्। ततः पूर्वं कदाचिदप्यकुण्ठितखण्डितविक्रमो जठरानलकवलितकलेवरः कण्ठीरवस्तदुपकण्ठं जिगमिषुः शशकमवादीत्। अप्रतिहतप्रतापे मयि महारण्यपरिवृढे जागरूके को वात्मनीनकर्मा परिपन्थिको मत्समानकर्मा जागर्ति। प्रदर्शय तं दुरात्मनो मार्गमिदानीमेव। शमनसदनातिथिमवितथपरात्माहं करोमीति केसरी कन्दरान्निरगात्। तदनु मृगधूर्तो मृगेन्द्रं वञ्चयन्नित इत इत्यभिदधानो धावमानः सन्नगाधजलपरिपूरितां वापीमुपेयिवान्। देव भवतो भयेन पलायनपरायणो वाप्यामस्यां निलीनः सन्नास्ते। पश्यैनं दुरात्मानमनात्मज्ञम्। तदा द्विरदान्तकः कूपमध्यनिगलमाससाद। वदनमवनतं विधाय यावता पश्यति तावता प्रतिबिम्बमात्मनो ऽन्तर्वाप्यां पश्यति स्म। तं दृष्ट्वा पञ्चाननो वापीं च पेटां

चोच्चालयति स्म। सिंहस्तु स्वकीयं क्ष्वेलारवं प्रायूयुजत्। तदा तद्वापीमध्यात्प्रतिशब्द उदतिष्ठत्। तदनु कोपावेशातिशयेन पञ्चाननो वाप्यामपतत्। वाप्यां पतित्वा नखरायुधो मरणमासेदिवान्। तत्रत्यानि सर्वाण्यपि सत्त्वानि सुखेन स्थातुं प्रवर्तन्ते॥

तथा चाभ्यधुः। बुद्धिर्यस्य बलं तस्य दुर्बुद्धेस्तु कुतो बलम्।
पश्य सिंहं मदोन्मत्तं शशकेन निपातितम्॥

तर्हि प्रभावति यदीदृशं बुद्धिविशेषमीशिषे तदा याहि॥

इति चत्वारिंशत्कथा ॥ ४० ॥

पुनः प्रभावती प्रश्नपरा प्रावर्तत। शुको ऽप्यभ्यधात्। देवि त्रैलोक्यसुन्दरीवायासनिस्तरणप्रतिभामुज्ञावयसि यदि तदा यातु भवती। तदा प्रभावती तद्वृत्तान्तमप्राक्षीत्पक्षिणं सो ऽपि प्रावोचत्। सिंहलपुरे नगरे बकबुद्धिनामा वैश्यः। तस्य सहचरी त्रैलोक्यसुन्दरी। सा च परपुरुषनियतमानसा। तस्याश्चरितं सर्वे ऽपि जानते बकबुद्धेरपि पुरतो सर्वे ऽभिदधिरे परं नासौ तेषां वचनानि सत्यतयाङ्गीकरोति। तदन्वेकस्मिन्दिने प्रत्ययावगमाय ग्रामान्तरगमनमुद्घोष्य निरसरत्। ततः प्रत्यासन्ने प्रदोषसमये पाश्चात्यद्वारमार्गेण गृहमध्यमागत्य मञ्चकतलं प्रविवेश। सा त्रैलोक्यसुन्दरी निजमुपपतिं गृहं समानिनाय। तदनु रात्रावभ्यवहृत्योपपतिना समं सुरतोपभोगाय प्रावर्तिष्ट। तदानींतने समये चरणेन सा भर्तारमस्प्राक्षीत्। स्पर्शसमय एव मदीयो भर्ता मद्दूषणनिमित्तं गुप्तवृत्त्यात्रागत्यावस्थितो ऽस्तीत्यवगत्यागमदसौ प्रायशः शय्यातले निलीन इति। तर्हि प्रभावति विचारय त्वमपि। * * *। प्रभावती विचारपरापि तदुपायं न ददर्श। ततः प्रभावती शुकं प्रति गिरमुज्ञावयितुं प्रववृते। तदनु शुको ऽवदत्। भो प्रभावति शृणु। स्वाचरिततारकर्मावजिगमिषुमात्मनो भर्तारं शयनीयादधः शायिनं जानती चरणस्पर्शमात्रेणोपपतिमुन्नतं रचयितुं चिरं रतिमुद्वीक्ष्य कटाक्षेणात्मनः परिवृढं ज्ञापयित्वावधृतमृषेर्ष्यापूर्वकमुवाच। रे रे मूढ तिष्ठ। किं मां भोक्तुमुद्यतो ऽस्यकुलटाम्। किमर्थं मदाह्वानं कृतवती त्वमिति चेद्वक्ष्यामि। मदीयभरण्डायुषो ऽभिवृद्ध्यर्थमस्मत्कुलदेवतां त्रिपुरसुन्दरीं सपर्ययाजस्रमतोषयम्। सा त्वेकदा स्वप्न आगत्य मामुवाच। अयि सुरतसुन्दरि तव भर्तुरायुरद्यैव गण्डादन्तमाप्नोतीति। ततो ऽत्यन्तखिन्नहृदयया दयितैकदेवतया मया सपर्याक्रियासमभिहारेणामन्दानन्दं संप्राप्तास्मत्कुलदेवता त्रिपुरसुन्दरी वाचमिमामुवाच। भो सुरतसुन्दर्यद्यतनदिन एव ते भवति गण्डात्परिवृढार्धायुषः परिचयः। यदि तस्यायुषो ऽभिवृद्धिमाकाङ्क्षसि चेत्तदेतस्मिन्नेव दिवसे ऽन्यपुरुषमुपामन्त्र्य शयनीये सानन्दमनङ्गमहोमहालता कन्दर्पामन्दमालिङ्गनं तस्य विधाय तस्मै रतिं प्रदातुमुद्यते ऽवभूत्योपरता भव। तेन तदङ्गसंगेनैवाद्य ते दयितायुः। अन्यो ऽपि ईदृशो स्वरमणायुषो ऽभिवृद्धिमाकाङ्क्षमाणां तदनन्यदेवतां त्वां धर्षयति चेदर्धायुषो हीयत इति। ततः श्रेयसे भूयसे चकारेदृशं कर्म रमणस्य। इतो ऽप्यात्मानं गर्हयन्तीमपांसुलां मां मा धर्षय। यदा धर्षयसि मां तदार्धायुषः परिचयस्ते भवति।

यत आहुः। अपांसुलां पुष्पिणीं च बलाद्भुङ्क्ते नरो हि यः।
क्षीणमायुर्भवेत्तस्य मूढस्याविदितात्मनः॥

ततस्ते मदेकदेवताया रमणस्य चायुषो ऽभिवृद्धिर्भूयादतो यथागतं गच्छ गच्छ। यदि मामीदृशीं पुनः पुनः स्पृशसि चेत्तदा गाढमुद्घोषयामीति। ततो बकबुद्धिमान्नाम वैश्यः स्वकान्ताजल्पितमाकर्ण्य मञ्चाधस्तादुत्थितो भार्यां सानन्दमुद्वीक्ष्य यतो मदायुषो ऽभिवृद्ध्यर्थमीदृशमपि कर्मापांसुलया भवत्याचरितमतो ऽस्मत्कुलदेवतायाः परं रूपं त्वमिति तां प्रशंसयंस्तस्याश्चरणयोः शिरसाभिवन्दनं विधाय

पुनः पुनरानन्दोद्रेकेण ननर्त। ततः स्वाचरितासाधुकर्मगूहनचतुरा सुरतसुन्दरी स्वैरं विचचार। तर्हि प्रभावति त्वमपीदृशमुपायं जानीषे यदि तदा यातु भवती॥

इति एकचत्वारिंशत्कथा ॥ ४१ ॥

ततः पुनः प्रभावती विनयकन्दर्पसमीपं जिगमिषुः शुकं गिरमुच्चावचयितुं प्रववृते। तदनु तां शुको ऽवदत्। हे कौमुदि मूलदेववत्संकीर्णोपप्लवे समापतिते तन्निःसरणाय प्रसरति प्रतिभा यदि तदानीं साधनीयं निर्बाधं स्वाभिलषितम्। ततः सा शुकं मूलदेवस्योपद्रवायासनिस्तरणप्रकारमप्राचीत्। शुको ऽप्यवदत्। आकर्णय प्रभावति प्रतिभावति। महाकालाभिधा रुद्रभूमिः काचन। तत्र शाल्मलीपादपः। तस्मिन्द्वौ पिशाचौ स्तः। एकस्य कराल इत्यभिधानं द्वितीयस्य विकराल इति। तयोर्द्वयोरपि सर्वदा विवादः। तयोर्द्वयोर्मध्ये करालो वक्ति यन्मदीया प्राणेश्वरी धूमावती सर्वाङ्गलीलासौन्दर्यविग्रहवती। तदा विकरालो व्याहरति। त्वं परतस्तिष्ठ मौनमवलम्बमानः। मदीया प्राणदयिता कर्कशा सा सर्वचाङ्गतातिशयप्रसृमरगुणगणाभ्युदयसमुदयिनी। इत्येवंरूपस्तयोर्विवादः क्षणमात्रमपि न विश्राम्यति। इत्थं तेन मार्गेण मूलदेवपण्डित एकदा मार्गे गच्छन्नस्ति। तत्र स ताभ्यां लक्षितः। तौ प्रत्यक्षौ भूत्वा तं जयाहतुः। एवमवादिष्टां च। त्वया पूर्वमावयोर्विवादो निर्णेतव्यः। तदनु यथागतं गन्तव्यम्। अस्मदीययोर्द्वयोरपि सहचर्योर्मध्ये का नाम रूपातिशयशालिनी। इत्यभिधाय द्वे अपि भार्ये तौ करालविकरालौ मूलदेवाय ददृशाताम्। यावता मूलदेवो लक्षीकरोति तावता राक्षस्यौ मूर्तिमत्यौ विकराले ऽभयस्यापि भीतिजनके मस्तकयोस्तु कचशून्यतया श्मशानकापालपङ्क्तिदंष्ट्राङ्घ्रिजिह्वाग्रेण लिहन्त्यौ स्तः शब्दैर्दन्तान्निपीडयन्त्यौ स्तनौ तु जानुनोराच्छादनाय पटखण्डाविव दृश्येते। एवंविधे ते तदानीमद्राक्षीन्मूलदेवः। दृष्ट्वा चैते मूलदेवः परं संदेहमापेदे। यामेवाहं नेयं स्वरूपेति वक्ष्यामि सैव मां दशनचर्वणाविरचितावयवशकलतां प्रापयिष्यतीति। तर्हि प्रभावति बद्धायाससाध्यं कथं कृतवान्। पुनः प्रभावती शुकं पृष्टवती। शुको ऽप्यभाषिष्ट। मूलदेवः यद्यनयोरन्यतमां सुन्दरीं व्याहरिष्यामि तदान्यन्मिथुनं मां जक्षितीत्यत उभे अपि सुन्दर्यौ व्याहरिष्यामीति निश्चित्य ते दृष्ट्वोवाच। उभे अपि रूपसंपन्ने भवतः। युवयोः सदृशीं नाहमद्राक्षम्। ईदृश्यौ सुन्दर्यौ लब्ध्वा तिष्ठतोरनयोर्जन्मन एव साफल्यं मन्ये। इति। ततस्ते बहुमानेन सानन्दं मूलदेवमुद्वीक्ष्य विससर्जुः। ततो मूलदेवो जोवन्नाजगाम। मूलदेव इव त्वमप्युचिताचरणविचक्षणासि यदि तदा व्रजेति॥

इति द्विचत्वारिंशत्कथा ॥ ४२ ॥

ततः प्रभावती पटीरपारिहार्यादिभिरात्मानमलंकृत्य विनयकन्दर्पनिकेतनं गन्तुमाजगाम। ततस्तां शुको ऽब्रवीत्। देवि रतिलीलावत्संकोचे समापतिते यदि कर्तुमुत्तरं पारयसि तदा साध्यताम्। ततो रतिलीलाचरितमप्राक्षीत्प्रभावती नगौकसं सो ऽप्यवदत्। शृणु प्रभावति। पर्वतपुरीति नगरी। तत्र कुटिलो नाम मालाकारः। तस्य पत्नी रतिलीला। सा च परपुरुषरता। पुराधिपो व्यवहारी तथा सैन्याधिपः राजिरक्षकः एभिश्चतुर्भिरसेवत सुरतोपभोगम्। एकस्मिन्दिवसे मालाकारस्यापरपक्षे महालयो ऽजायत। तस्मिन्दिने यो ऽभीष्टवर्गः सर्वो ऽपि निमन्त्रितः। तया रतिलीलयात्मनः प्रेष्ठास्त्वारो निमन्त्रिताः। इमां प्रथमं भोक्तुं वणिक्पुत्रः समागतवान्। तस्योपवेशनायासनं प्रचिक्षेप। तेन समं तस्मिन्गोष्ठीकरणसमये तावता ग्रामाधिपः कर्षकः समागच्छति स्म। तं त्वायान्तमवेक्ष्य वेणुकविरचिते कुसूलमध्ये विपणिनन्दनं प्रचिक्षेप सा। तदुपरि पिधानकमकार्षीत्। ततस्तं कुटुम्बिनं गृहान्तः प्रवेशयामास। तेनापि समं सुखगोष्ठी विधातव्या। तावता क्षपापालः समायातः। तदा स कृषीवलो ऽप्यबिभेत्।

ततः सा रतिलीला तं कृषीवलं कुसूलस्य पिधानोपरि उपवेशयामास। तदुपरि वेणुनिर्मितं स्थूलं पात्रं अवनतवदनतया निवेश्य स्थगितविग्रहमकार्षीत्। तं कर्षकं जगाद। कुसूलान्तरे सर्पिणी प्रविष्टासीत्। त्वयात्रावेपमानेनासितव्यम्। तदनु निशीथिनीपालकं गृहान्तरं निनाय। यावतासावुपविशति तावता सेनानायको ऽप्याययौ। तदा रात्रिचरितं रचितपतत्रिकुचौ चिक्षेप। तदनु सेनाधिपं तमन्तरनैषीत्। यावतासावन्तः प्रविशति तावता तस्याः कौमारः पतिरागच्छत्। तदा सेनाधिनाथं मञ्चकतलं प्रावेशयत्। ततो ऽभीष्टवर्गमाकार्य भुक्तिक्रियां निरवर्तयत्। मार्ताण्डस्त्वस्ताटवीतटनिकटमटति स्म। तदा तेषां चतुर्णां पायसपूर्णा पात्रीः प्रकल्प्य प्रायच्छत्। उष्णं चीरान्नं शीतलीचिकीर्षुः कुसूलान्तःस्थितो वदनवायुना वीजयति स्म। तदा पिधानासनो मनस्यभिधत्ते। कुसूलान्तःस्थिता भुजंगी फूत्कुर्वाणा वर्तते। प्रमादतो मां दशति यदि तदानीमद्यतनस्य मरणस्य प्रकारः कथमपनेतुं शक्य इत्यभिधाय भयादमूत्रयत। तदा तन्मूत्रद्रवधारां निरीक्ष्य रतिलीला मह्यं पायसभोजननिमित्तं सर्पिः परिवेषयतीत्यभिधाय पायसपात्रीं घृतग्रहणायोदच्चयत्। तत उद्धृतया पायसपात्र्या पायसस्योष्णेनापानस्थाने भृशमतप्यत पिधानोपरिस्थितस्तदासाविति संदेहयति यत्तलस्थिता भुजंगी मां दशतीति निश्चितमतिर्मां लगति दशतीति क्रियासमभिहारेण ब्रुवाणो निरगाद्धावमानः। इतरेषां त्रयाणां चेतसि वह्निरलगदिति संदिहाने पलायनप्रयत्नः प्रावर्तिष्ट। तदा मालिको गृहपरिवृढः परं विस्मयमासाद्य कटिस्थितकर एवातिष्ठत्। कुत्रत्या इमे पुरुषा इति रतिलीलामप्राक्षीत्। तर्ह्याचक्ष्व प्रभावति। तदानींतने समये सा किमुत्तरयति स्म। प्रभावती विचारमार्गमवगाहमानापि तदुत्तरं न कलयामास। तदा तदुत्तरणाय प्रभावत्या पृष्टः शुको व्यापारयामास गिरम्। देवि तदानीं मालिकेन पृष्टा रतिलीलेत्युत्तरं करोति स्म। एते भवतः पितरो ऽद्यायमस्मदङ्गजः पितृयज्ञं करिष्यतीत्याकाङ्क्षया शरीरधारिणो निजमहालयदिने समाजग्मुः। ते भवति वीक्ष्याश्रद्दधानतां नैराश्यविवशादीर्घोच्छ्वासं भवद्वेश्म विमुच्य प्रतिययुः।

अतो ऽभ्यधुः। मन्त्रहीनं क्रियाहीनं श्रद्धाहीनं तु यत्कृतम्।
डम्भमाश्रित्य यच्छ्राद्धं पितॄणां नोपतिष्ठते॥

तर्हि प्रभावति त्वमप्येतादृशमुत्तरं कर्तुं प्रगल्भसे यदि तदाश्रय॥

इति त्रिचत्वारिंशत्कथा ॥ ४३ ॥

पुनरपि प्रभातकाले विनयकन्दर्पमन्दिरं जिगमिषुर्मन्दहाससमुल्लसितास्या प्रभावती शुकमपृच्छत्। तदा शुको बभाषे। देवि यथा गोविन्दो ब्राह्मणो निजं प्रयोजनं संसाध्य पुनरप्यात्मनो वस्त्रं गृहीतवान्तथा कर्तुं पारयति यदि भवती तदा विधीयताम्। इति श्रुत्वा प्रभावती गोविन्दचरितं व्यावर्णयतु भवानिति व्याहार्षीच्छुकम्। ततस्तत्त्वार्थविदाह विहंगः। आकर्णय प्रभावति। जनस्थाने नगरे गोविन्दनामा ब्राह्मणः। तस्य ग्रामस्याधिपः। स तु श्रीकृष्णदर्शननिमित्तं द्वारवतीमगच्छत्। स तु श्रीकृष्णाद्यनं विधाय परमेश्वरोद्देशेन धनादिना श्रीकृष्णपरितोषकरं भक्तिविशेषं संपाद्य कतिचन दिनानि स्थित्वा पुनरागच्छन्मार्गे दस्युभिर्लुण्ठितसर्वस्वो ग्राममेकमासदत्। तद्ग्रामसमीपे क्षेत्रसीमां दृष्ट्वा तथा तत्पालिकां बालविधवां दृष्ट्वा मञ्चोपरि स्थितां विहगान्वित्रासयन्तीं मार्गपरिसरवर्तिनस्तरोस्तले श्रान्तो निषसाद। स्वस्कन्धस्थां भस्त्रामधस्ताद्विधाय हरि हरि श्रीकृष्ण द्वारकानाथेत्यादिदेवनामानि व्याहरमाणो भस्त्राग्रन्थिं विस्रस्य श्रीकृष्णस्य महाप्रसादं गृह्णीध्वमित्यभिधाय तस्यै श्रीकृष्णस्य शेषं प्रायच्छत्। तत्रोपविश्य विधवाया वासनानुसारिणीं वार्त्तां विधातुं प्रावर्तिष्ट। तथारूपान्पञ्चषट्शब्दानुच्चार्य पुनरप्यब्रवीत्स्वसमीहितम्। अहं श्रीकृष्णदर्शननिमित्तं द्वारवतीं गत्वा

समागच्छन्नस्मि। ग्रामान्निजान्निर्गत्य ममाष्टमासा अजायन्त। ममेयं प्रावरणपटी विद्योतते तां भवत्यै प्रदास्यामि। श्रीकृष्णनाथः प्रीतिमवाप्स्यति। मह्यमेकवारं भरतपञ्चशरनरपतितरुणतरशशाङ्करमेदुरशरदारम्भजृम्भमाणचन्द्रकिरणकोरककोमलामलिनतानिरसनकोविदान्दशनमयूखान्किरन्ती वितर सुरतमित्यभिधाय निजलोचनगोचरीभूतपञ्चशरनरपतिचतुरहृदयचातुर्यसहचरनवीनवैधव्यदीचादानदत्तविधानां रथनिरस्तविसृतसमस्तविश्वस्तां प्रशस्तिस्तस्याश्चरणसरसिरुहमधुकरायमाणमस्तकस्तां प्रदक्षिणीकृत्य प्राशंसीत्। तदनु प्रणिपातपरायणा सहसैवोत्थातुं नेच्छति स्म। बलादनिच्छन्त्या बालविधवाया बहुविधपादपद्मपरिचर्यापरिचयचातुर्यीं प्रचुरीकुर्वाणस्तरुणकरुणापरिणतवचनानि व्याहरमाणो ऽनवरतनिरयद्वारनिरोधनपिधानपरतरद्वारवतीपुरवराधिपमधुमथनशरणचरणनिर्वर्णनजनिताग्रगण्यपुण्यापणसमर्पणकृपणमानसो द्विपटीमात्रं धनं तस्यै समर्प्येदमस्मदभ्यर्थनं नान्यथा कर्तुं युक्तमित्यप्राचीत्। तदनुसरणनिपुणकरुणावचननिचयपरिचयपेशले तस्मिंस्तदीयदयापराधीनं मानसमासीदासीनायाः। तदा सा व्यचीचरद्व्यभिचरणाचरणाय। प्रायेण कुसुमशरप्रहारमूर्च्छितो मन्दात्वं द्रावयेत्।

ततो ऽभ्यधात्।

आर्तेषु दीयते दानं शून्यलिङ्गस्य पूजनम्।
अनाथप्रेतसंस्कारमश्वमेधफलं लभेत्॥

इति विचारपदवीमवगाहमाना तन्मानसं चरितार्थयति स्म। तथा च व्यवसिते निजपटीपटीयसीं चिन्तां चिकीर्षुः किंचित्कालमस्थात्। तर्हि प्रभावति त्वमप्यभिधेहि। केनोपायप्रकल्पनेन स गोविन्दो निजां प्रावरणपटीयसीं पटीमपाहार्षीत्। इति पतत्रिसमभिहितं तदवगत्य प्रभावत्यपि विचारदृशा चारु चिन्तयन्ती न तदुपायचातुर्यं स्वचेतनायामासादयति स्म। तदनु क्षणदाप्यक्षीयत प्रभाते च नभोगं प्रभावत्यभाषिष्ट। मया तु नावबुध्यते। खग त्वमेतदुपायनिर्माणमाचक्ष्व। तदा शुको ऽपि चक्षाण। तदा प्रभावति स गोविन्दो दिगम्बरो ऽम्बरमणितापातिशयस्फुटन्मस्तककरोटीप्रदेश एव द्रागाजगाम ग्रामम्। तत्र च ग्रामद्वारि ग्राममुख्याः पञ्चषाः पञ्चजनहितानुसरणसरणिपारीणाः सकलयाचकयाच्ञाप्रत्यर्पणकलापारीणा न्यवात्सुः। कौपीनमात्रधनः स तु तानालोक्याञ्जलिमबध्नात्। अवहितकर्णा भवन्तु भवन्तः। दूरादागच्छन्नुत्तरेण मार्गेण क्षेत्रं समीक्ष्य बहुधा बाधमानां बुभुक्षां च निरीक्ष्य क्षीणकरणगणो वालुकफलयुगलमहमग्रहीषम्। तावता पदवीमेतां अविदम्। तदनु मञ्चमध्यारुह्य क्षेत्रं रक्षन्ती महिला मञ्चादवरुह्य मदीयं वस्त्रमग्रहीत्। अहं श्रीद्वारकां गत्वा श्रीकृष्णदर्शनं विधाय पुनर्निजग्रामं व्रजन्नस्मि। वस्त्राभावादनावृताङ्गो ऽस्म्यहम्। तर्हि मदीयं सिचयं दापयतेत्यभिधाय समं तेषां पुरस्तादुपाविक्षदसौ। ततस्ते तस्य हस्ते वस्त्रमदापयन्। ते ग्रामाधीशास्तस्यै अक्रुध्यन्। स च ब्राह्मणस्तैः प्रस्थापितो निजनगरमार्गमन्वसरत्। तर्हि प्रभावति त्वमपीदृशोपायानुसंधानं बोबुधोषि यदि तदा सुखेन साधय॥

इति चतुश्चत्वारिंशत्कथा ॥ ४४ ॥

ततः प्रभावत्युपपत्युः समीपगमनाय पक्षिणमप्राक्षीत्। ततस्तयानियुक्तो द्विजो व्याजहार। मतिचकोरे सालश्रेष्ठीव धूर्ताहवं परिशीलयसि यदि तदा व्रज। ततः प्रभावती तद्वृत्तान्तावगमाय शुकमवोचत्। तया पृष्टः शुको ऽप्यवदत्। शृणु प्रभावति। पीडवसिनामाग्रहारः। तत्र सालश्रेष्ठी वणिक्। स तु व्रीहीन्गृहीतुं महीमण्डनं श्रीपुराभिधानं गच्छति स्म बह्वीयसा विभवेन। तत्र बहुसीरनासीरं कर्षजनपरिवृतं मुख्यं कृषीवलं निजाम्बकसांनिध्यमकरोत्। तेन समं गरिष्ठां गोष्ठीं कुर्वाणः सालश्रेष्ठी तं गोधूमार्थं पप्रच्छ। ततो ऽसौ कृषीवलो भणति स्म। अद्यतनं दिनमत्र निवसन्तु भवन्तः। प्रातर्दिननाथस्योदये गोधूमान्भवद्भ्यो दर्शयिष्यामि। तदर्थं बध्नामि। इत्यभिधाय कर्षको ऽपि वणिजा समं स्वम-

न्दिरमेयिवान्। तदनु द्वावपि भुक्तैकपङ्क्तौ सालश्रेष्ठी विशश्राम। तदानीमसौ कर्षकगृहिणीं चञ्चलदृगचलां गुरुनिबिरीसनितम्बभारखिन्नां विषमशरविषमसमराभिलाषुकां उन्नतकुचकलशसीमासंवादविरामविगलितहारलतां चतुरचङ्क्रमणशिञ्जानमणिमञ्जीररवनिशमनलम्पटपदभिभवनकलहंसामनिमिषलोचनो ददर्श। तद्दर्शनाद्वणिगपि स्मरशरासारसंहतिपरिहृतधैर्यः चणं चिन्तालतालूतिकाकलितहृदयस्तस्थौ। तद्दूतीमुखविज्ञातनिजवैरस्यो निजां करस्थितां रत्नमयोर्मिकां तत्परिग्रहाय दत्त्वा पञ्चशरसमरसौख्यमन्वभूत्। सापि मुद्रिकाभिलाषपरिगलितमानसा सर्वाङ्गसमर्पणेन तमनुससार। ततश्च सुरतावसाने सालश्रेष्ठी मनसि गरीयांसं विषादमकार्षीत्। सिद्धा पाणिस्था पृथिवीमूल्या रत्नमयमुद्रिकाप्यगच्छत्। कतमं परमुपायं समर्पयामीति। तर्हि प्रभावतीदृग्व्यवस्थिते स वणिक्केन प्रकारेण निजां मुद्रिकामपाहार्षीत्। प्रभावती ततश्चारु विचारं कुर्वाणापि न जानाति स्मोपायम्। तदनु तया पृष्टः शुको व्याहर्तुमुपचक्रमे। निशामय निजोपरमणसगमाभिलाषिणि। प्रत्युषसि सालश्रेष्ठी नदीमासाद्य करचरणाद्यवयवक्षालनं कृत्वा रचितपठीरललाटतिलको ग्रामद्वारि समासीनं कृषीवलवृषभं गत्वा व्याहृतवानिदम्। वयं गत्वा प्रातर्निजाननदुहः समानयामः। तदनु गोधूमैर्घोणीरापूर्य तेषां पृष्ठेषु समारोप्य गमिष्यामः। भवदीयया भार्ययास्माभिः समं धारणा निरंधरणायि। एतद्धारणानियमनिर्माणनिमित्तमस्माभिर्निजहस्तमुद्रिका भवद्भार्याहस्ते दत्तास्ति। इति वणिगभिहितं समाकर्ण्य कर्षको क्रोधमवष्टभ्नात्। अभ्यधाच्च। मुख्ये विद्यमाने स्त्रीकृतव्यवहारस्याप्रमाण्यप्रसंगात्। पश्य तर्हि तस्या एतावती सत्ता। स्वतन्त्रता कुचत्या यन्मया विना व्यवहारविधानसामर्थ्यम्। तदा स सासूयः कृषीवलः संनिधाववस्थायिनं निजतनयं जगाद। याहि त्वं गृहान्गत्वा भवज्जनन्याः सकाशादेतन्मुद्रिकां प्रत्यर्पय। ततो ऽसौ तथा कृतवान्पितुराज्ञया। तर्हि प्रभावति त्वमप्येतादृशं संविद्विलासं परिकलयसि यदि तद्विधाने समुन्मिष ॥

इति पञ्चचत्वारिंशत्कथा ॥ ४५ ॥

पुनः प्रभावती इयासुरूपरमणसमीपं पचिणं पर्यचिनोत्। तदा सो ऽप्यवदत्। रे बुद्धिमतीवोत्तरं व्यत्ययितुं यदि नाटयसि तदा साध्यतां नाम। तदा प्रभावती बभाषे। बुद्धिमती कथमुत्तरं व्यत्ययति स्म। तद्वृत्तान्तं भवानेकदा आवेदयतु। तच्छ्रुत्वा शुको ऽप्यकथयत्। मङ्गलपुराह्वये ग्रामे कलितनामा कर्षकः। तस्य जाया बुद्धिमती। सैकदा भर्तारं व्याहार्षीत्। भवद्भिर्मत्परिधाननिमित्तं दुकूलमेकमानयनीयम्। तच्छ्रुत्वा कृषीवलो ऽयं वाचं प्रायच्छत्। वयं कृषिधनाः कुटुम्बिनः। कार्पासान्येव वस्त्राणि परिधीयन्ते ऽस्मादृशैः। त्वं पट्टदुकूलेन करिष्यसि किम्। तदभिहितं निशम्य सा बुद्धिमती मौनमवलम्बिन्येव तस्थौ। तत एकस्मिन्दिवसे पुरद्वारि सर्वाः प्रजाः समासीनास्तिष्ठन्ति। सो ऽप्येकतस्तासां प्रजानां मुख्यभूतः पट्टकिल आसीनो वर्तते। तदानीं सा निजतनयं तदाह्वानाय प्राहिणोत्। याहि रे त्वम्। तत्र गत्वा निजजनकमेवं वावदीहि यद्विलेपिका निष्पन्नास्ति। भवन्तो भोजनकरणाय समाहृताः सन्ति। तदा तदपत्यं तदुपान्तिकं गत्वा तथैव व्याहरति स्म। तथाहृतेन तेन वचसा स कृषीवलो मनस्यात्मीये भृशं जिह्राय। तद्वचनमेनमगृणोत्। गृहानागतवान्। इतरे तत्रोपवेशिनः सर्वे परस्परं जहसुः। एवंविधस्यार्थवादः। किं गृहे विलेपिकाया भोजनविधिः। इत्थं तस्य पट्टकिलस्य सर्वे ऽपि हसन्ति स्म। तदनु बुद्धिमत्यै सो ऽक्रुध्यत्। तदा सा वाचो युक्तिमुल्लासयति स्म। भवादृशां कुटुम्बिनां कृषिजीविनां किं नाम मन्दाचभयम्। इति श्रुत्वासौ जहास जगाद च। तस्मिन्नस्मदभिहिते न वचनीयतास्मास्वापपात। वयं भवत्याः परिधानाय दुकूलमेकं साधीयो नयिष्यामः। एकदा भवत्या इदमभिहितं अन्यथार्थाभिव्यञ्जकं युक्तिविशेषेण प्रकल्पयितव्यम्। मदीयह्रीराहित्यायैवं त्वयाभिधातव्यम्। तर्हि प्रभावति व्याहरतु भवती। केनोपायालम्बनेन सा तं कष्टं विनिर्वर्तितवती। तदा

शुकपृष्टा प्रभावती विचारपरवशायत्तं मनः कुर्वाणापि न मानसे तन्निर्धारं जानाति शुकमेव पुनः प्रश्नीकरोति स्म। शुको ऽवदत्। तदा तया बुद्धिमत्या गृहे ऽन्नपाका विविधाः साधिताः। पूर्वमेव भर्तरि संकेतं सूचयामास। त्वयाद्य प्रजाभिः समस्ताभिः समं तस्मिन्ग्रामद्वारि समासादितव्यम्। विलेपिका निष्पन्नास्तीत्यभिधायाहं पुनरपत्यं भवतः समीपे प्रस्थापयिष्यामि त्वामाकारयितुम्। तदानीं भवता अर्थिप्रजा अभिधातव्याः। आगच्छत सर्वे ऽपि सहसैव विलेपिकां भुञ्जीमहि। इति व्याहृत्य सर्वे ऽपि सखायः महानसमानेतव्याः। इति कृतसंकेतः पूर्वं पट्टकिलः प्रजाभिः समस्ताभिः समेतो ग्रामद्वारि समाविशत्। तदा सा निजं सुतं पुनरपि पित एहि विलेपिका सिद्धास्ति भोजनायागच्छेत्यभिधाय प्रास्थापयत्। स तु पितुरन्तिकमुपेत्य तथैवाभिहितवान्। सो ऽपि समस्ताः प्रजास्तथैवाभिहितवान्। आगच्छत सर्वे ऽपि सहसैव विलेपिकामभ्यवहरामः। तदाश्रुत्य ते सर्वे ऽपि कौतुकालोकनपराः संभूय समागच्छन्नभ्यवहरणाय। तदानीमन्नानि विविधानि नानाप्रकाराः पाकविशेषाश्च निष्पन्नाः सन्ति। तत्तथाविधं दिव्यान्नाहारं सर्वे ऽपि संभूय कृतवन्तः। तदा तद्वीक्ष्य सर्वे ऽपि मिथः प्रोचुः। पट्टकिलस्तु साधुप्रकारेण तिष्ठति। एतेषामेवंरूपस्य पाकविशेषस्य विलेपिकेति संज्ञा। इति तेन पाकविशेषेण सर्वे ऽपि स्वचेतसि चमत्कृतवन्तः। तर्हि प्रभावत्येतादृशवचनस्यैतादृशयुक्त्या यद्यन्यथात्वं प्रकल्पयितुं जानीषे तदा साधनीयं स्वकाङ्क्षितम्॥

इति षट्चत्वारिंशत्कथा ॥ ४६ ॥

पुनः प्रभावती निजप्रेष्ठोपकण्ठं जिगमिषुः खगं वीक्षते स्म। तदिङ्गितज्ञः शुको व्याचष्टे। देवि हलपालवदापतिते पराभियोगे यदि विज्ञानविशेषाङ्गीकारेण परेषामन्यथात्वस्फुरणं प्रसञ्जयसि मानसे तदा स्वसमीहितसिद्ध्यभिमुखीभव। तदन्वभाषिष्ट प्रभावती। हलपालः कीदृग्विधं विज्ञानमाविष्कृतवान्। तद्वृत्तान्तमावेदयतु भवान्। ततः शुको वक्ति स्म। मोहनपुराभिधाने ग्रामे पूर्णपालः कृषीवलो न्यवात्सीत्। तस्य भृत्यो लाङ्गलं वहति स्म। तदभिधानं हलपाल इति। तस्याभ्यवहरणाय पूर्णपालस्य तनया क्षेत्रे ऽशनं नीत्वा प्रतिदिनं गच्छति स्म। तयोर्द्वयोरपि तत्रामन्दानन्दसंदोहसमुद्भवं निधुवनं धिनोति। तयोश्चरितं क्षेत्रे परिसरवर्तिनः पूर्णपालाय न्यवेदयन्। इत्येकदा पूर्णपालस्तच्चरितालोकनाय छन्नतनुरुपाविशत्। तदा साप्याहारं गृहीत्वा समागमत्। द्वयोरपि संभोगः समजायत। तच्चरितं पूर्णपालो व्यालोकमानो ऽस्ति। हलपालस्तु पुरतो दृशं प्रादिशत्। तदा पूर्णपालमायान्तं लक्षयति स्म। तर्हि वावदीतु प्रभावती। हलपालस्तु तदानीं किमुत्तरं च करोति स्म। ततः प्रभावती विचारपरापि न तदुत्तरं कलयति स्म। ततस्तया पृष्टः शुकस्तदुत्तरं श्रावयामास प्रभावतीम्। हे प्रभावति हलपालस्तदा पूर्णपालमागच्छन्तमवेक्ष्य पूर्णपालपुत्रीमभाषत। त्वमधोमुखी स्वपिहि। ततो ऽसौ तस्या उदरं पाणिभ्यां बलेन संवाहयामास। तथैव किंचिदेकाकी व्याहरति स्म। जाज्वलीतु जीवितं मामकीनम्। न कदापि दारिद्र्यस्य दरिद्रतामद्राक्षम्। दिने तु लाङ्गलं वाहयामि यामिन्यां तु गवां बन्धनदोहनाद्युपचारः। तथा तस्मादेव चतुर्थे यामे समुत्थाय बलीवर्दानां चारणमुद्दिश्यारण्यमध्ये सह गन्तव्यम्। इदानीमेवाभ्यवहार्षम्। तदन्नं न यावता पक्वाशयाभिमुखं प्रसरति स्म तावता स्वामिनस्तनयायाः स्वस्थानाच्चलितो ग्रन्थिः। तस्य पुनरपि निजस्थानानयनायाभिमन्त्रणं संवाहनादि विधातव्यम्। एतस्या उदरमपि मर्दनीयम्। इत्येतद्व्यायासो मया साधयितुमशक्यः। अद्य स्वामी समागमिष्यति। तदानीमहं तस्य पुरस्तात्सेवां विहाय यथागतं गमिष्यामि। स तु पूर्णपालो ऽप्यलक्षितस्तानि वचनानि शृण्वन्नास्ते। तदनु स्वमनसि जगाद। वराको ऽयं सत्यचरित्र एव। एतस्य कष्टं बहु किल। इदानीं संवहन्नस्त्युदरमेतस्याः। एतद्दृष्ट्वैव मनुष्या न जानते किमपि किमपि जल्पन्ति। ततो ऽसौ हलपालमा-

नीतवान्। तर्हि प्रभावति त्वमप्येतादृशं विज्ञानचातुर्यं यदि जानासि तदानीं स्वाभिलषितसिषाधयिषायामुद्यममवलम्बस्व॥

इति सप्तचत्वारिंशत्कथा ॥ ४७ ॥

ततः पुनः प्रभावती विनयकन्दर्पसमोपमियासुः पतंगपुंगवमवोचत्। सो ऽप्यवदत्। देवि प्रियंवदवदुपायान्तरं प्रपञ्चयसि यदि ततो ऽभियुङ्क्ष्व। सा कीदृक् चरितमिति शुकमन्वयुङ्क्त। सो ऽपि तदाविवेदयिषुस्तामभाषिष्ट। शृणु देवि प्रभावति। विनोदपुरं नाम नगरम्। तत्र प्रियंवदनामा वणिक्। तस्य संपत्तिः शनैः शनैः पर्यहीयत। तत उद्यमनिर्माणाय किमपि मूलसाधनविधानाय धनं याचितवान्। ततस्तद्गृहीत्वा स्वयमुद्यमं समुद्दिश्य निरगात्। तदन्वसौ व्यवसायं विधाय निजलोहमयतुलानयनाय तद्द्रविणसमर्पणाय तस्य धनिकस्य गृहमगच्छत्। तदन्वसौ धनिकस्तुलायामभिलाषमकार्षीत्। स चाधमर्णो जगाद। त्वदीयां लौहीं तुलां मूषिका अप्सासिषुः। तद्वचनं निशम्य नासावधमर्णः किमपि प्रत्युत्तरं तस्मै प्रायच्छत्। मौनमेवावलम्ब्य स्थितः। तदन्वभ्यर्णमागत्याधमर्णो ऽभ्यधात्। तर्हि स्वगृहान्गच्छामः। तदानीमुत्तमर्णो वाचमाददे। अद्यैवास्नवनं देवतावरिवस्यां च विधाय भोजनं कुर्वन्तु पश्चात्स्वगृहमङ्गीकुर्वन्तु। तदानीमसौ तत्रैव सर्वं प्रीत्यवसादनायावसानं चकार। तदनु गृहागमनसमये धनिकस्य पुमपत्यं द्वारि दीप्यत्कव्यामधिरोप्य सर्वेषां पश्यतां निजगृहानुद्दिश्य निरगात्। तदन्वादाय तदपत्यं भूमिगृहे स्थापितवान्। इति तदपत्यस्य मातृपितृसखिबन्धुवर्गं अन्वीक्षणाय प्रयतते। तदपत्यं न दृश्यत इत्युद्घोषः सर्वत्रापि प्रसरीसरीति स्म। तदा तत्प्रतिवेशिनी महिला व्याहरत। भवतां यः प्राङ्गणिकः समागतः स भवदीयमपत्यं गृहीत्वा गतवान। ततस्ते धावमानाः तद्गृहानगच्छन्। तत्र गत्वा तमप्राचुः। ततो ऽभ्यधादसौ। मया भवदीयमपत्यं नाग्राहीति। तयोर्विवदतोर्नभःस्पृशः शब्दः प्रादुरभूत्। तौ द्वावपि वर्गौ विवदमानौ राजकुलमगाताम्। स तु धनिकस्तदीयमपत्यहरणलक्षणं चरितं राजानमश्रावयत्। राजा च तमधमर्णमाहूयापृच्छत्। एतदीयमपत्यमपाहार्षीस्त्वत्किमकारि भवता। तद्व्याचक्ष्व प्रभावति। तदासावधमर्णः किमुत्तरमकार्षीत्। ततः प्रभावती विचारदत्तचित्तापि तदुत्तरं नाकलयत्। तदानीं शुकमुखेन तदुत्तरमाविरचीकरत्प्रभावती। तदानीमसौ राजानं व्यजिज्ञपत्। अहमेतदीयं पुमपत्यमहार्षम्। तदहं पुनरप्येतदीयं पुमपत्यं निजसदनं नेतुमुद्युक्तवानस्मि। तावता सहसा विहायसा समेत्य श्येन एतदीयमपत्यं गृहीत्वा गगनमार्गे रयादयासीन्नभोगमनः। तदुत्तरं निशम्य सर्वे ऽपि ते भूसुपर्वसहिता निर्वर्णनपरास्तदुर्वीपतिसचिवास्तदपूर्वमपूर्वमिति व्याकुर्वाणाः समन्कुर्वते। त्वं किमेतदुक्तमसमञ्जसं भाषसे। विष्किरः कुत्रापत्यमपाहरत्। एतददृष्टपूर्वमश्रुतपूर्वं च। तदानीं स मन्दमोदमानसो वसुधाधिपमभ्यधत्त।

यत उक्तम्।

तुलां लोहसहस्रस्य यत्र खादन्ति मूषिकाः।
गजं तत्र हरेच्छ्येनः का कथा वद दारके॥

ततस्ते पुनरेवमवादिषुर्विद्वांसः। त्वं किमेतदभिदधानो ऽसि। ऋजुवचोभिरावेदय। तदनु तुलावृत्तान्तमादितःप्रभृति तेभ्यो न्यवीविदत्। तदनु मेदिनीनायकस्तद्वृत्तान्तावगमादुत्तमर्णायाक्रुध्यत्। तदीयां लौहीं तुलां तस्मै दापयामास। तर्हि प्रभावति त्वमप्येतादृशोपायरचनं प्रपञ्चयसि यदि तदानीं स्वकार्यसाधने धृतावधाना भव॥

इत्यष्टचत्वारिंशत्कथा ॥ ४८ ॥

पुनः प्रभावत्या पृष्टः शुकः प्रत्याह। देवि मन्त्रसारब्राह्मणवत्संकोचापाते निस्तरितुं यदि पारयसि तदानीं साधय समीहितम्। ततः प्रभावती प्रत्युवाच। मन्त्रसारः कथं संकीर्णं निस्तीर्णवान्। व्यावर्णय

तद्वृत्तान्तम्। ततः शुको ऽवदत्। आकर्णय प्रभावति। सुराभवननाम्नि नगरे चन्द्रशेखरो नाम राजा राज्यं प्रशास्ति। तस्य कुमारी मलमञ्जरी। तस्मिन्ग्रामे मन्त्रसारनामाग्रजन्मा भिक्षावृत्त्या जीवति। कस्यचिन्मस्तकमुदरादिकं यदि व्यथते तदानीं जलं विभूतिं वाभिमन्त्र्य प्रयच्छति। इत्थं बालकानां ग्रहनिग्रहादिकरणेन ग्राममध्यगताः कृशमध्याः स्त्रियस्तं भजन्ते। न जानाति किंचनापि परं धार्ष्ट्या- वलम्बनेन तिष्ठत्यसौ। इति सति राज्ञः कुमारीगले ग्रन्थिसंविधानकमुद्भूत्। तदपकरणायानेकशो भिषजश्च मन्त्रवादिनश्च समाहृताः परं न कस्यापि सामर्थ्येन स व्रण उपशान्तिं प्राप्नोति। असाध्यो ऽयं व्रण इत्यभिधाय सर्वे ऽपि चिकित्सकास्तां तत्यजुः। ततो राजा पटहोद्घोषपुरःसरं सर्वमपि लोकमित्यश्रावयत्। यो मदीयायाः कुमार्याः व्रणापकरणं करिष्यति तस्मै सुवर्णानां सहस्रं प्रयच्छामि। इति वार्त्तां वरवर्णिनी मन्त्रसारस्य स्त्री वीथीष्वश्रौषीत्। सा तत्र गत्वा तेषां पुरस्तात्प्रतिज्ञापुरःसरमभाषत। मदीयो भर्ता कुमार्या व्रणापकरणं करिष्यति। तदा राजा तया सह निजान्भटान्प्राहिणोत्तमानेतुम्। तद्वीक्ष्य मन्त्रसारो निजां भार्यां व्याजहार। किमेतदिति। ततस्तया तद्वृत्तान्तमावेदितं तस्मै। ततो ऽभ्यधात्। पापनिरते त्वयात्यन्तमसमञ्जसमेतद्विहितम्। अहं किमपि न जानानो ऽस्मि येनौषधविशेषं प्रयोक्ष्यामि। त्वयायं महाननर्थ आपादितः। इत्यभिधाय चिन्तां कर्तुं प्रावर्तत। ततो ब्राह्मणी तमभाणीत्। चिन्ता कस्मात्क्रियते। एतस्यां जगत्यां जानीत एवंविधः को नाम विद्यते। समस्तो ऽप्यलीकपरिकल्पितः। तर्हि भवन्तो ऽपि तत्र गत्वा राजानं संगत्य कुमार्या ग्रन्थिं निरीक्ष्य मन्त्राभिमन्त्रणं विधाय पुनरपि स्वगृहमागच्छन्तु। दिनद्वयेन कुमार्या उल्लाघता भविष्यति भवतां च यशः पृथिवीमानमापत्स्यते। अथ यदि साधु न भविष्यति कुमार्यास्तदानीमायुष उपरि प्रक्षिप्यते। एतत्ता भवद्भिषजां स्वभावव्यवहार इति युक्तिविशेषैः सा तस्य पत्नी मन्त्रसारं दृढीचकार। ततो मन्त्रसार इष्टदेवतां संस्मृत्य निरगान्नरनाथदर्शनाय। राजानं दृष्टवान्। राजा च तस्मै कुमार्या गलग्रन्थिमदर्शयत्। तर्ह्याचक्ष्व प्रभावति। एवंविधे समये स मन्त्रसारः कमुपायमकार्षीत्। ततः प्रभावती वितीर्णचित्ता तद्विचारविरचनायां प्रावर्तत। तत्स्वरूपं नैवाज्ञासीत्। ततो रात्रिरपि पर्यहीयत शुकं चाप्राक्षीत्। शुको ऽप्यवदत्। तदानीमसौ मन्त्रसारो ब्राह्मणो दर्भशिखां गृहीत्वा कुमार्या व्रणाभिमन्त्रणाय प्रावर्तत। स च मन्त्रो ऽर्थद्वारान्निर्दिश्यते। ओं नमश्चामुण्डि स्वामिनि। त्वं तु मदीया स्वामिनी। चण्डालब्राह्मणि मय्यनर्थमापादितम्। एतस्मात्संकटान्मामाकर्षयसि तदानीं मदीयजन इति भवसि। अवाग्वदने मौनमालम्बिनि स्वाहा। एतादृशं मन्त्रं व्याहर्तुं प्रवृत्तः। सा च राजकुमारी तस्य मन्त्रसारस्य मन्त्रमशृणोत्। तन्मन्त्रश्रवणादेव तस्या राजकुमार्या हास्ययुक्तमास्यं प्रावर्तत। ततस्तस्या हास्याविष्करणाद्राजकुमार्या गलसंकुचिताः सिराः समुद्भूतबलादुदाकृष्टाः। तस्मिन्समये स व्रणः संजातपाको ऽभवत्। नासिकासमाकर्षणबलाद्व्रणमप्यभिनत्। तन्मध्यगतं पूयकलिलं सर्वमपि निरक्रामत्तस्याश्च स्वास्थ्यमजायत। तदा राजा तं संमानयामास। तर्हि प्रभावति सायासमीदृशमतिवर्तितुं प्रभवसि चेत्तदा विधत्स्व निजाभिमतम्॥

इत्येकोनपञ्चाशत्कथा ॥ ४९ ॥

पुनः प्रभावती जारवसतिं सिसीर्षुः शकुनिं प्रश्नातिथीचकार। शुको ऽभ्यधात्। देवि बालकृष्णवदुत्तरविनिमयं कर्तुमीशिषे यदि तदानीमादरो विधीयताम्। प्रभावती जगाद शुकम्। तद्भवान्बालकृष्णोत्तरविनिमयचरितं ब्रूहीति। तदानीं शुकः प्रोवाच। गोवर्धननगरे लक्ष्मीनारायणस्य महान्प्रासादो ऽस्ति। तस्य परिचर्याकरो देवधरनामा ब्राह्मणः। तस्य पञ्चवर्षीयः पुत्रः। तस्य बालकृष्ण इति नामधेयम्। तस्य जननी संतस्थौ। पश्चाद्देवधरः प्रमीतभार्यः पुनरप्यात्मानमुद्वाहितवान्। सा च बालकृष्णस्य सपत्नी जननी बालकृष्णं सर्वदैवावजानीते। तस्मान्नौदनादिसौकर्यमपि न करोति। तदानीं बालकृष्णस्तत्कृता-

वज्ञानं पितुरग्रे प्रोक्तवान्। तदासौ तस्याः प्रीत्या पुत्रावज्ञापरिहारविषयं न किमपि व्याहरति स्म। इति सति स बालकृष्णो ऽप्यचिन्तयत्। अतः परं कः प्रकारः कर्तव्यः। पितापि तावदस्मदीयं पारमत्यं निरवदति एतस्याः प्रीतिप्रकर्षोल्लासेन। तस्यै हि स्नेहस्यास्य भङ्गोपायमारचयामि। एतावता प्रयोजनमिदमस्मदीयं स्वत एव सेत्स्यति। तदन्वेकस्मिन्दिने बालकृष्णो निजजनकमभिवीक्ष्य तत्संनिधानं गत्वा बभाषे। तात तव पुरस्तात्किं व्याहरामि। पित्राभिधत्स्वेति भणिते जगाद बालकृष्णः। अस्माकं द्वितीयो जनको ऽस्ति। यथा त्वं करोषि तथैवासौ करोति प्रत्यहम्। तदा व्याजहार जनकः। तमपि मह्यमेकदा दर्शयिष्यसि। बालकृष्णो ललाप। कस्मिंश्चिद्दिवसे तुभ्यमपि दर्शयिष्यामीत्यभिधाय मौनमेवास्ते। तदनु देवधरस्य हृदये विचिकित्सोदियाय। मनोगतमुवाच। स्त्रीणां चरित्रं को नाम ज्ञातुमीष्टे। न कस्यापि स्त्रियो ऽवश्यं वश्या भवेयुः।

तथोक्तम्।

शास्त्रं सुनिश्चितधियामपि चिन्तनीय-
माराधितो ऽपि नृपतिः परिशङ्कनीयः।
अङ्के स्थितापि युवतिः परिशङ्कनीया
शास्त्रे नृपे च युवतौ च कुतो वशित्वम्॥

अपत्यं यत्किमपि वदति सो ऽपि शब्दो न निर्मूलो भवितुमर्हति। तस्य कथंचिदभिप्रायो विद्यते। इति मनसि निश्चित्य तस्यां भार्यायां पुरातनीं प्रीतिं परिहृत्य गालीवितरणताडनादिनातिरोषभावं प्रादुष्कृत्य प्रवर्तमानो ऽस्ति। तदा तस्य भार्या विचारदत्तचित्ता प्रावर्तत। ममोपर्येतादृशो ऽनन्यसाधारणप्रेमास्य पत्युरासीत्। स त्वेतस्य बालकृष्णव्यसनेन पराहतः। तस्मादमुमेवाभ्यर्थयामि। ततो यथा ह्ययं साधुर्भवति तथा कंचन प्रकारं करिष्यामि। ततः सा तं बालकृष्णं संनिधावाजुहाव। तदन्ववादीच्च। त्वं मदीयस्तातः। यदा मम श्रेयः करिष्यसि तदानीं तव समीहितं करिष्यामि। ततो ऽभ्यधाद्बालकृष्णः। तव कुत्रत्यं श्रेयः। इत्थमेव भवत्या भवति। एतावन्तं कालं मम न कांचन चिन्तां कृतवत्यसि। तदा साप्यभाणीत्। अतः प्रभृत्यार्य त्वदीयां परिचर्यां सम्यक्करिष्यामि। यत्किमपि रम्यं तद्भवते वितरामि। एतस्मिन्विषये मदीयमस्ति सुकृतं भाषणं च प्रयच्छामि। तदा स बालकृष्णः तस्याः श्रेयोनिर्माणं स्वीकृतवान्। तर्हि प्रभावति त्वमपि विचारय। स बालकृष्णः पूर्वोदितं वचनं कथं विनिमयति स्म। तदा प्रभावती विचारणाय प्रावर्तत परं नावजगाम। तदानीं पत्त्रिणमप्राक्षीत्। सो ऽप्याह। प्रभावति तदानीं स बालकृष्णः पितरमासीनमभिवीक्ष्य स्वयमपि तदुपकण्ठमागादित्यभाषिष्ट। तातास्मदीयं द्वितीयं जनकं भवतो दर्शयिष्यामि। तदानीमभ्यधादसौ। दर्शयेति। इत्यभिधाय दर्पणमानीय पाणिनाग्रहीत्पितुरभिमुखं स्थापितवान्। तत्रत्यं प्रतिबिम्बमदर्शयत्। जगाद चेदम्। एकस्त्वं जनको द्वितीयो ऽयं जनकः। पाणिमचालयत्। तदानीं प्रतिबिम्बस्यापि वेपते स्म पाणिः। ततश्चावोचत्। इदं तत्स भवति। यथैव भवान्कुर्वाणो ऽस्ति तथैवायमपि करोति। तदानीं तदुदीरणात्तस्य मनःस्थितो विकल्पः पर्यत्नीयत। तर्हि प्रभावति त्वमपीत्यमुत्तरं व्यत्ययसि यदि तदानीं साधयात्मानं स्वमनोरथसाधनाय॥

इति पञ्चाशत्कथा ॥ ५० ॥

पुनः प्रभावती पत्त्रिणं प्रश्नयति स्म। ततो ऽवददसावपि। देवि प्रभावति बक्रबुद्धिः प्रकृतिः पार्थिवस्यायासमपचकार। तादृशं युक्तिविशेषं प्रयुणक्ति भवती यदि तदानीं गमनमङ्गीकुरुतात्। तन्निशम्य प्रभावती शुकं बक्रबुद्धिवृत्तान्तं पृच्छति। ततस्तदाविवर्णयिषुः पतत्री गिरां ग्रथनेन प्रभावतीं प्रीणयामास। प्रतापपुराभिधाने नगरे भरताचार्यनामधेयो नरेश्वरः। तस्यामात्यो बक्रबुद्धि-

नामा। तस्यामात्यस्य संगीते सर्वदा व्यसनमहर्निशं गायकेभ्यो गेयमाकर्णयन्नवतिष्ठते। एकस्मिन्दिवसे मातङ्गा गायन्तो ऽभूवन्। तेषां मध्ये कोकिलानामधेया गायकी गायन्त्यभूदेकाकिनी। तस्यां गायन्त्यां कश्चिददृष्टपूर्वो लयाविर्भावो ऽजायत। तद्गीते भरता अपि तदेकतानतावस्थावलम्बना एव सर्वे परिहृतबहिरबहिर्वृत्तयो ऽवतस्थिरे। राज्ञो ऽपि मानसं नितरां समतुष्यत्। ततस्तस्या मातङ्ग्या उपरि पार्थिवस्य मानसं मदनोद्दिव्दरदीपितोद्भूतधूमसमूहाध्यासितं तिरस्कृतप्रवेकविवेकविगलितनिजाभिमानाभिव्यक्तकं तरलितविलासाभिप्रायमजायत। तस्मिंवं सति किं विधीयते। तदामात्यो ऽत्यन्तगत्यन्तरज्ञो जगाद चितिपाकशासनम्। देव वासनानाशः सर्वदा भवितुं न दातव्यः। तस्याः पूरणं सर्वदा कर्तव्यमेव। भवन्तो राजानः। भवतां किमतिप्राणबाधापरे विधौ विधेयं कुत्रापि व्यवस्थापितमस्ति। पश्चादेतावत एव पार्थक्येन किमापन्तिष्ठतीत्यभिधाय महीपतेराकाङ्क्षामपोषयत्। तदा राजा प्रधानं व्यादिदेश। प्रदोषसमये त्वयैनां गृहीत्वा समागन्तव्यममुष्मिन्प्रदेशविशेषे। तदा राजादेशं शिरस्याधाय निरगात्सचिवः। तद्ब्रूहि चल प्रभावति तमुपायम्। केन प्रकारेण पर्यहार्षीदमात्यः। ततः शुकोक्त्या प्रभावती विचारसमर्पितहृदयाभवत्। पुनर्नावागच्छत्। ततः शुकमप्राक्षीत्सो ऽपि न्यवादीत्। प्रभावति तदानीं सचिवः पार्थिवेन पूर्वं परिहृताया राज्ञ्याः समीपं संप्राप्य तामवोचत्। अद्य भवतीनां विषये नरनाथो ऽस्माभिर्विज्ञप्तः संभूय सर्वैरपि राज्ञो ऽपि मानसे यथा भवतीषु स्नेह उत्पद्यते तथैव समापादयामहि। भवतीभ्यश्चित्रशालिका दापिता विद्यते। भवतीभिरद्य कृतप्रसाधनाभिः प्रदोषसमये तत्र गन्तव्यम्। इत्यभिधाय चित्रशालायामेतस्यां संध्यासमये तामनैषीदमात्यवृद्धः। तस्यै राज्ञ्यै मातङ्ग्या इव वस्त्राणि तादृशमेवालंकारं प्रदायाभिदधौ। तत्र राजा भवतीभ्यो वसनानि भूषणानि च दत्त्वा प्रातिष्ठिपत्। इति तत्रत्यमशेषं विधेयविशेषं सज्जीकृत्य निरगादगाधबुद्धिः। तदनु गत्वा राजानं व्यजिज्ञपत्। देव श्रीमता यदादिष्टमभूत्तत्सर्वमपि निर्वर्तितम्। तस्यां चित्रशालायां समानीतास्ति। स तदनु राजा तत्र गतवान्। मन्मथप्रमथितमना मनोरथैस्तामजहात्। तदनु मदनमार्गणमोहमहोर्मिवेगभङ्गे विचारपुरस्कृतो ऽवनीश्वरस्तदानीमेव चित्रशालाया बहिर्निरगमत्। तदा सचिवं व्याजहार। मां मा स्प्राक्षीः परतो याहीति। ततः सचिव उवाच। किमेतत्स्वामिन्। तदाभाणीद्धरणीनाथः। ममैतावाननर्थः समजीघटत। अतः परं देहावसानमेव प्रायश्चित्तं गृह्णीमहि। इति श्रुत्वा तदोचिवान्सचिवः। मयि संनिधानानुसारिणि यदि महीनाथप्रमाद आपतिष्यति तदानीं सो ऽमात्यः कीदृक्प्रकारः। समस्तो ऽप्युपायो निरपायतया परिहृतसर्पः। तदा जगाद राजा सचिवम्। ***। तदानीं दीपमानीय तां राज्ञीं राज्ञो लोचनगोचरीं चकार। तदालोक्य नरनाथो ऽपि संतोषपरवशः स्थितवान्। अवोचच्च। बकबुद्धिनामधेयं भवत एव युज्यते नेतरस्य। तर्हि प्रभावति बुद्धिविशेषमेवं परिशीलयसि यदि तदानीं साधय॥

इत्येकपञ्चाशत्कथा ॥ ५१ ॥

पुनः प्रभावती पृष्टवती पतत्त्रिणम्। तदन्वसावप्यवोचत्। देवि व्याघ्रमारिणीव संकीर्णनिस्तरणे प्रगल्भसे यदि तदानीमनुसंधत्स्व। ततः प्रभावत्या पृष्टः शुको व्याघ्रहन्त्रीवृत्तान्तं प्रभावतीमश्रावयत्। आकर्णय प्रभावति। विशालपुराभिधानं नगरम्। तत्र विचारवीरो राजा। तस्य कर्मकारो जगन्धनामधेयः। तस्य गृहिणी कलहप्रिया व्याघ्रहन्त्री। साहर्निशं भर्त्रा समं कलहं करोति। भर्ता यदा गृहमागच्छति भोक्तुमुपविशति तावता तस्मिन्समये किंचिदविद्यमानमेव कलहबीजमुपाख्याति चणमात्रमपि सा सुखेनावस्थातुं नोत्सहते।

यत उक्तम्।
यस्य भार्या विरूपाक्षी कश्मला कलहप्रिया।
उत्तरोत्तरवक्त्री च सा जरा न जरा जरा॥

इत्यभिधाय स तां निरकासयत्। स तामपत्यद्वयसहितां पर्यत्यजत्। परित्यागविसंविधो न कश्चन संबन्धो ऽस्त्यतः परमित्यभिधाय प्रदत्तवान्। इत्थं तद्विसृष्टा सापत्यमेकं कन्यामभिरोप्यैकं कराङ्गुलिभिराधृत्यापत्यद्वयसहिता सान्यस्मिन्ग्रामे मातृमन्दिरं प्रति निरयासीत्। ततो ऽरण्यमध्ये मध्याह्ने पथि गच्छन्ती परिश्रान्ता कस्यचिद्विटपिनस्तले निषसाद। ततस्तामभिवीक्ष्य दूरादेव व्याघ्रस्तां भक्षयितुं समागतवान्। तर्हि प्रभावति त्वमपि चारु विचारय। एतादृशे समये कमुपायमकरोत्सा। तदा प्रभावती विचारणाय प्रावर्तत। न तदुपायं कलयामास। तावता तमस्विन्यपि प्राचोयत। तदा प्रभाते प्रभावती तदुपायाविष्करणाय शुकमनुयुक्तवती। सो ऽपि तद्व्याहरणाय कृतप्रयत्नो ऽभवत्। प्रभावत्याकर्णय। तदा चित्रकायमायान्तं लक्षीचकार। तदा तदपत्यद्वयमपि पेडया ताडयामास। तत्ताडनपीडितं द्वयमप्यरुदत्। ततस्तद्रोदनशमनाय स्वयं पुत्रावबोचत्। अहं तावद्व्याघ्रहन्त्री येन केनापि प्रकारेण चित्रकायद्वयं निहत्य भवतोराहाराय पर्याप्तं पूरयिष्यामि। यावता द्वितीयो द्वीपी समागच्छति तावत्तैनमेवागच्छन्तं मया निहतं विभज्य भक्षयतमित्यभिधाय तस्य पुण्डरीकस्य खण्डनायाखण्डनविक्रमापत्यद्वयं तत्र भुवि व्यवस्थाप्योदतिष्ठत। तद्वचनाकर्णनसमनन्तरमेव मृगारिर्जीवं गृहीत्वा पलायमानो निरगात्। त्वमपीत्थं जानासि चेद्यदि तदानीमनुसर॥

इति द्विपञ्चाशत्कथा ॥ ५२ ॥

पुनः प्रभावती शुकं प्रष्टुं प्रावर्तत। शुको बभाषे। देवि तस्या व्याघ्रमार्या इवोपायान्तरप्रयोगे चातुर्यमुदेति भवत्या यदि तदा गन्तव्यं भवत्या। ततः प्रभावती तद्वृत्तान्तं जिज्ञासुः पप्रच्छ शुकम्। सो ऽप्यवोचत्। शृणु प्रभावति। शार्दूलः पलायमानो गच्छन्नस्ति। तदा मार्गे क्रोष्टा दृष्टवान्। स च तरक्षुं बभाषे। व्याघ्र देवाः किमिति पलायमाना वर्तन्ते। तदा व्याघ्रो न वदति। तदा क्रोष्टा वचनयुक्तिभिस्तद्भयमपाकृत्य स्थिरीकृतवान् चित्रकायम्। तव च पृष्ठतो न किंचिदागच्छति। त्वं पश्य। त्वयि किमेष आकस्मिको भयः समुदायमानस्तिष्ठति। भयं जहीहि। मत्पुरस्तादाचक्ष्व। यत्किंचिद्वैषम्यमातिष्ठितमस्ति तदहं युक्तिविशेषेणापकरिष्यामि। इत्याकर्ण्य धैर्यमालम्ब्य क्षणं तस्थिवान्पुण्डरीकः। तस्य पुरतश्चरितं व्याघ्रहन्त्र्याः प्राकृतं कृतवान्। ततस्तच्छ्रुत्वा मृगधूर्तो नरीनर्ति स्म गिरम्। याहि पुरतः। केन त्वं व्याघ्रः कृतो ऽसि। तत्त्वामहं मूर्खमुख्यमुपलक्षये। सा त्वां भीषयामास। कुत्र मानुषाश्चित्रकायं मारयन्ति। त्वं वृथैव भीतवानसि। आगच्छ गच्छावस्तस्याः पुनरन्तिकम्। तदानीमभ्यधाद्द्वीपी। तस्मादेव पलायसे तयाहमेव धृत्वा निहन्तव्यः। तदा क्रोष्टाभाषिष्ट। त्वं यदि मां पलायमानं ब्रुवाणो ऽसि तर्ह्यात्मनो गले मामानह्य तावता तवापि मत्पलायनशङ्का निवर्तिष्यते। तदनन्तरमात्मनो गले सृगालं पिनद्धवाञ्छार्दूलः। ततो मृगारिहन्त्री तावप्यागच्छन्तौ वीक्षते। प्रभावति त्वमपि विचार्य व्याहर। तदानीं व्याघ्रतुरा कमुपायं प्राकल्पयत्। ततः प्रभावती प्रभातं प्रतिभासाप्रभवप्रतिभावितं विधाय यदा तदुत्तररहस्यं न कलयामास तदा शुकं पप्रच्छ सोत्कण्ठा। अवदच्छुकः। आकर्णय प्रभावति। सा द्वीपिजघ्निनी मृगधूर्तं मृगारिमागच्छन्तमालोक्य क्रोष्टारमभाषिष्ट। अरे क्रोष्टो पूर्वस्मिन्दिने त्वं मत्पुरस्तादात्मनः सत्यसुकृतं दत्त्वा गरीयसीमाज्ञामपि विधाय गतो ऽभूः। तर्हीदानीं किमित्येकमेव द्वीपिनं त्वमानैषीः। एकेन व्याघ्रेणैकस्यापत्यस्योदरमापूर्यते। तदा द्वितीयमपत्यं किं त्वां भक्षयिष्यति। इति वचनं व्याघ्रो ऽश्रौषीत्। तदनन्तरं पलायनमेवाकरोत्। तर्हि प्रभावति त्वमप्युपायविशेषं परिशीलयसि यदि तदानीमनुयाहि॥

इति त्रिपञ्चाशत्कथा ॥ ५३ ॥

पुनर्व्याजहार पतत्रिणं प्रभावती। शुको ऽब्रवीत्। तस्य क्रोष्टोरिव यद्यात्मन उपर्यापतितस्य मरणोपद्रवस्य परिहारोपायं परिशीलयसि यदि तदानीमनुमन्यस्व स्वकृत्यसमर्थनम्। तदाकर्ण्य जगाद प्रभावती। क्रोष्टा कीदृग्विधं संकीर्णं निस्तीर्णवान्। तद्वृत्तान्तं वावदीतु भवान्। इति प्रभावत्याभिहितो विहगो गिरमुज्जगार। आकर्णय देवि। द्वीपी तु वेगेनात्मनो मरणभयात्पलायमानो ऽभवत्। क्रोष्टा तु तत्कण्ठे निबद्धः कण्टकविसंकटायामाकृष्यमाणो गात्रस्य समयामपि त्वचमुत्कृत्य चरणाबद्धबाधो भूमेरुपरि समाकृष्यते। तदा तादृशावस्थामुपभुञ्जानः क्षणमात्रादसवो निजा निर्गमिष्यन्तीत्येतादृशीमवस्थां प्राप्तवान्। जीवशेषावस्थामवलम्बमानो विद्यते। तर्हि प्रभावति त्वमप्यभिधेहि। तदानींतने तादृशे समये स जम्बुको द्वीपिगलबद्धमात्मानं प्रकारेण केनोदमोचयत्। ततः प्रभावती तच्चिन्तयन्ती न विवेद जम्बुकमोचनोपायम्। तदा दिनोदये पप्रच्छ पतत्रिणं व्याजहार कीरो ऽपि। तदा कण्टकाटवीमध्ये समुत्कृष्यमाणः क्रोष्टा विहस्यावोचत्। तदा व्याघ्रो बभाषे। सृगाल कस्मादस्मिन्समये हास्यास्पदं मां कृतवानसि। जम्बुको जगाद। त्वदीयं मौर्ख्यमभिवीक्ष्य मम हास्यमजायत। ततो व्याहार्षीच्चित्रतनुः। कथं मयि त्वं मौर्ख्यमासञ्जसि। सृगालो ऽवदत्। यत्र यत्र त्वं गमिष्यसि तत्र तत्र व्याघ्रहन्त्री समागच्छति। त्वामवश्यं भक्षयिष्यति। तदा व्याघ्रो व्याजहार। त्वमित्थं केन जानीषे। तदा जगाद जम्बुकः। मदीयासृगक्तं मार्गं दृष्ट्वा विदितविद्वन्नतिरवश्यमागमिष्यति व्याघ्रघातिनी। सा समागत्यावश्यं त्वां मारयिष्यति। इत्थं जानीहि। यदि भवतो जिजीविषा च वरीवर्त्ति तदानीमात्मनो गलबद्धं मुञ्च माम्। इत्थं जम्बुकवचनं विश्वस्य पुण्डरीकस्तत्क्षणं गलस्थितं मृगधूर्तमवमुच्यापासरदन्येन वर्त्मना। तर्हि प्रभावति उपायमेवंविधं यदि भवतो वेत्ति तदानीं गमनमङ्गीकुरु॥

इति चतुःपञ्चाशत्कथा ॥ ५४ ॥

पुनः प्रभावती द्वयासुरूपरमणसमीपं नगौकसं जगाद सो ऽप्यवदत्। देवि विष्णुवर्धनवदात्मनः प्रतिपक्षभूतं यदि पराभवितुं जानासि तदा याहि। ततः प्रभावती व्याहार्षीत्। तद्वृत्तान्तमाचष्टामिति पत्रिणम्। तदनु शुको ऽब्रवीत्। कन्याकुब्जानाम्नि नगरे कश्चिद्विष्णुवर्धनो ब्राह्मणः। स च सुरतोपभोगे ऽतिलम्पटश्चण्डश्च। तस्मिन्कन्याकुब्जे न काचन कामिनी कमनीयगुणा तदीयं ग्राम्यधर्मं सहते। तस्मिन्नेतादृशसामर्थ्ये प्रथामुरीकरोति स्म। एतादृशवारविलासिनीपरिवादपृथुप्रथाकारणजागरूका रतिप्रधाना काचन गणिका गणराचान्तरं कस्यांचिन्निशीथिन्यां तमाजुहाव। तदाह्वानसमये विष्णुवर्धनो ऽब्रवीत्। रतिप्रिये त्वयास्मदीयं सुरतं सोढुं न शक्यते। यदि त्वं न सहसे तदा रात्रिनिवासपरिमितं पणं द्विगुणं भवत्याः सकाशादहं ग्रहीष्यामि। तदा तत्कुट्टिनी तदीयमिति वचनीयं स्वीकृत्य रात्रिनिवासपरिमितं पणं तस्मादग्रहीत्। स तु तस्यां तमस्विन्यां रतिप्रियोपभोगाय न्यवात्सीत्। तदनु रात्रौ गरीयः कष्टं प्रवर्तमानमभूद्रतिप्रियायाः। तदनु मूत्रोत्सर्जनमिषेण तच्छय्याया उत्थाय कुट्टिनीसंनिधानं गत्वा रतिप्रिया तामेवमवादीत्। एतदीयं धनमेतस्मै प्रत्यर्पय। मम प्राणावसानपिशुनं निधुवनमेतदीयं निदर्शनमुज्जृम्भते। तदावदत्कुट्टिनी। म्रियस्व जनकजाये। हस्ते प्राप्तं पणं कथं वा प्रत्यर्प्यते। तर्हि पण्याङ्गनानां मध्ये तव को नाम नाम ग्रहीष्यति। त्वं पुनस्तदन्तिकं याहि। तत्क्षणमात्रमुपचारचातुर्येण तं रमय। पश्चादहं तरुमिममारुह्य कुक्कुटनिनदं बहुधा करिष्यामि। ततस्त्वं प्रभातं संजातमित्यभिधायात्मनः समीपान्तं गमय। तत इति कृतनिश्चया रतिप्रिया विष्णुवर्धनोपकण्ठमागत्य पुनः सुरतोपचारैस्तं सिषेवे। ततः कुट्टिनी द्वारि विद्यमानं बिल्वमधिरुह्य ताम्रचूडनिनादान्बहुधा चकार। तदा तन्निनादश्रवणाद्रतिप्रिया व्याजहार प्रियम्। इदानीं प्रभातसमयः प्रावर्तिष्ट। भवन्तस्तु गच्छध्वमित्यभिधाय रतिप्रिया निरजीगमत्। तर्हि प्रभावति भवत्यपि विचार्याभिदधातु। विष्णुवर्धनस्तु ततः परं किं व्यरचयत्। सा तद्विचारं कुर्वाणापि नाज्ञासीत्। तदा

शुकं पप्रच्छ। शुको ऽपि निजगाद। शृणु प्रभावति। विष्णुवर्धनस्तु द्वाराद्बहिरङ्गणभागे स्थित्वा यावता पश्यति तावता रात्रिमपि गरीयसीं न्यफालयत्। तदानीं द्वितीयवारं कुट्टिनी कुक्कुटनिनादं करोति स्म। तदा सो ऽपि तच्चरितमद्राक्षीत्। ततो विष्णुवर्धनः कराग्रमभिः तत्स्थितां कुट्टिनीं निहत्य भूतले निपातितवान्। तदाक्रन्दमाना पपात। तदा रतिप्रियापि तद्देशमागतवती। सा रतिप्रिया तं विष्णुवर्धनं नमस्त्वेति पादयोरपतत्। त्वमात्मीयं द्रविणं पुनर्गृहाण परमस्मासु कृपामुत्पादय। इत्यभिधाय तदीयं द्रविणं पुनरस्मै प्रत्यर्पयामास। तर्हि प्रभावति त्वमप्युपायविशेषं परिशीलयसि यदि तदानीं ध्वंसताम्॥

इति पञ्चपञ्चाशत्कथा ॥ ५५॥

पुनः प्रभावती पृच्छति स्म नभश्चरम्। ततः सो ऽपि बभाषे। देवि प्रियजल्पकवदायासनिस्तरणं जानीषे यदि तदानीं समीहस्व विधेयविशेषम्। तदा प्रभावती प्राजल्पत। किंरूपमायासं निस्तीर्णवान्प्रियजल्पकः। तदावेदयतुतरां भवानिति तया पृष्टः शुको बभाषे। अवधेहि प्रभावति। आशापूरा नाम देवता। तत्रत्यः परिचर्याकरः प्रियजल्पकः। तस्य भार्या कर्कशानामधेया। साहर्निशं प्रतिक्षणं नूतनं कलहमुद्भावयति मुहूर्तमपि कलहविहीना नावतिष्ठति। तस्य द्वारि पिप्पलतरुरेको निवसति। तस्मिंस्तरौ ग्रह एको निवसति। स ग्रहस्तस्याः कर्कशाया अश्रान्तकलहविग्रहपरिगृहीतविग्रहो दुर्ग्रहग्रस्त इव परित्यक्तनिजगृहो धावनमकार्षीत्। ततो ग्रामाद्बहिःस्थितं शाल्मलीविटपिनमेकमधिरुह्य तस्थिवान्। इत्थं बहुभिरहोभिः प्रियजल्पकस्य मनसि कर्कशाकलहदूषिते वैराग्यमुदयति स्म। गृहिणीं परित्यज्य देशत्यागं चिकीर्षितवान्प्रियजल्पकः। ततो ऽसौ निर्गच्छन्दृष्टवान्पुरद्वारि तमात्मनो ऽङ्गणतरुस्थितं ग्रहम्। स च ग्रहस्तस्य प्रियजल्पकस्य प्रत्यक्षो बभूव प्रियजल्पकमप्राक्षीत्। त्वं जिगमिषुरसि। तदा प्रियजल्पको जजल्प। अहं मम ब्राह्मण्या पलायमानो ऽस्मि। तदा प्रियजल्पकस्य तमवादीत्। त्वं को नाम। ततो ग्रहेणाभ्यधायि। भवद्गृहद्वारिस्थिते पिप्पलतरौ न्यवसमहम्। तत्रत्यो ऽनादिसिद्धो ऽग्रजन्मग्रहः साधुमन्त्रवादिभिरपि निवार्यमाणो नाहं निर्गतवान्। सो ऽहं भवद्ब्राह्मणीभयेन पलायनपरायणः सन्नत्रैव निवसामि। तर्हीदं भयमजायत। इदानीं द्वावपि समदुःखिनौ निवसावः। अहमपि तवोपकारं कंचन करिष्यामि। एवंविधस्तयोः सत्यवचननिर्णयो ऽजायत। तदनु ग्रहो ऽसावेकस्या राजकुमार्याः समाविवेश शरीरम्। तदानीं तच्चिकित्सार्थमनेके नरेन्द्रा अमिलन्। न कश्चिदपि ग्रहमपाकर्तुं प्रभवति। इति सति स प्रियजल्पको ब्राह्मणस्तत्रागच्छत्। राजानं समेत्यावोचत। अहं कुमारीमुल्लाघां करोमि। तदानीं जगाद राजा। यदि त्वमस्मदीयां कुमारीं निरुपद्रवां विधास्यसि तदानीमपि त्वां द्रविणपूर्णमर्धराज्यभाजं विधास्यामि। तदासावभिमुखं कुमार्या ब्राह्मणो निरीक्षितवान्। तस्यां च यामिन्यां चतुष्कोणान्तर्वर्ती चतुःषष्टियोगिनीमण्डलाकारं प्रकल्प्य षोडशभिरुपचारैर्दीपश्रेणीभिः परितो भ्राजमानं नैवेद्यविशेषैः सम्यगभिपूज्य डमरुनिनादाडम्बरैरम्बरं प्रतिध्वनिभिरुल्लेख्य मणिमन्त्रौषधविविधसामग्रीं विधातुं प्रावर्तत। तदा ग्रहो ऽपि तस्य निर्माणाडम्बरं निरीक्ष्य क्रोधपरवशस्तस्थौ स्वमनस्यभ्यधाच्च। अयं स्वचातुरीपरीतमेवंविधं संभ्रमं निर्मिमाणो ऽस्ति। पश्यामि तावदिदमेतदीयं सामर्थ्यमित्यभिधायासौ ग्रहः केनापि प्रकारविशेषेण न त्यजति कुमारीम्। तद्ब्राचक्ष्व प्रभावति। स ब्राह्मणस्तदानीं कतरमुपायमकल्पयत्। प्रभावती तद्विचारणाय बहुधा प्रसारयामास मानसं परं नाज्ञासीत्। ततः शुकमपृच्छत्। तदा जगाद पतंगो ऽपि। हे प्रभावति। तदासौ ब्राह्मणो ग्रहं प्रार्थयत। आत्मने सत्यवाग्दत्ता तस्यैव सत्यता परिपालयितव्या इत्येवंविधं मन्त्रं जपन्नसौ तिष्ठति यावत्तदा ब्रह्मग्रहस्योदियाय करुणा। तदा ग्रहो ऽप्यवादीत्। अहमेनां कुमारीं विहाय यास्यामि। तन्निमित्तं भवते यत्किमपि वितरिष्यति राजा तद्गृहीत्वा त्वं सुखेनास्स्व। अहमन्यत्र

गत्वा कस्यचिच्छरीरे संचरिष्यामि। त्वया तु तत्र नागन्तव्यम्। यदि तत्र त्वमागमिष्यसि तदानीं त्वामेव भक्षयिष्यामि। इत्यभिधायैव ग्रहो निरगात्। तदानीं राजकुमार्याः स्वास्थ्यमजायत। तदा राजापि तं प्रियजल्पकमग्रजन्मानमतीव संभावयन्प्रस्थापयामास। तर्हि प्रभावति एवंविधा बुद्धिर्यदि पोस्फुरीति भवत्यास्तदा गमनमङ्गीकुरु॥

इति षट्पञ्चाशत्कथा॥५६॥

पुनरपि निशासमये प्रभावती विनयकन्दर्पनिवेशनमियासुः विहंगमं वाकप्रसंगतमचीकरत्। निशम्य तदा तां प्रति विहंगो ऽप्यगाहत गिरां परिचयम्। देवि तस्यैव प्रियजल्पकस्य ब्राह्मणस्य पुरो पतितं संकीर्णं निस्तरितुं पारयसि यदि तदा गन्तव्यम्। ततः प्रभावती बभाषे। स कथं संकीर्णं निस्तीर्णवान्। इति तद्वृत्तान्तमावेदयतु नाम भवान्। सो ऽप्यवोचत्। प्रभावति स त्वसौ प्रियजल्पको जगतीपतिवितीर्णविभवसमुद्भवपरिपूर्णतया सुखेन स्थातुं प्रावर्तत। राजा च राज्यस्यार्धं प्रादात्। इति सत्यसौ ब्राह्मग्रहो ऽन्यस्य राजकुमारस्य कलेवरं प्राविचत्। तदानीं तस्य महीभृतो मनुष्याः समागतास्तं मन्त्रवादिनमाह्वातुम्। तदा स राजा प्रास्थापयत्तम्। स तत्र गतवान्। तत्र तस्य ग्रहस्य दर्शनमघटिष्ट। ततो ऽसौ जगाद ग्रहः। अरे प्रियजल्पक मया त्वं वारितो ऽपि तर्हि कस्मादत्रागतो ऽसि। इदानीं त्वामेवाहं भक्षयिष्यामि प्रथमम्। तर्हि प्रभावति वावदीतु भवती। तदा किमुत्तरं विधाय ग्रहविग्रहान्मोचितवानात्मानम्। तदा विचारणाय प्रवर्तते स्म परं तु न तदुत्तरमज्ञासीत्। तदा शुकमनुयुक्तवती। तदा जगाद विहगः। देवि तदासौ प्रियजल्पको ग्रहपरिगृहीतविग्रहं ग्रहमेव गत्वाञ्जलिं बद्धा विज्ञापितुमादृतवान्। प्रभो स्वामिन्किमिति भवानमर्षितो भवति। अहमत्रैकेन प्रयोजनेन समागतो ऽस्मि। मत्पत्नी कर्कशा नाम मामत्र स्थितमाकर्ण्य निजमन्दिरं परित्यज्यात्र मत्संनिधानमागतवती। तर्हि मदीयं मित्रभूतं त्वामवगत्य कां बुद्धिं विदधामीति प्रष्टुमागतवान्। तर्हि त्वया मद्विधातव्या बुद्धिर्मह्यमावेदनीया। तदाकर्ण्य बभाषे ग्रहः। त्वं भवच्चित्तसमुचितं विधेहि। परमहं तु स्थानादेतस्मात्पलाय्य गमिष्यामि प्रदेशान्तरमित्यभिधाय राजकुमारं समुत्थापितवान्। तदा सो ऽपि नरपतिस्तं मन्त्रवादिनं यथार्हमभ्यर्चयामास। तर्हि प्रभावति भवत्यप्येतादृशमायासमुपाय-विशेषेण निस्तरसि यदि तदा यातु भवती॥

इति सप्तपञ्चाशत्कथा॥५७॥

पुनः प्रभावती शुकमप्राक्षीत्। शुको ऽपि व्याहार्षीत्। देवि शकलाटमन्त्रिवन्मतिचातुर्यं चरितार्थयसि यदि ततस्ते जिगमिषा भवतु। तदाब्रवीत्प्रभावती। शकलाटः किंरूपो मतिमतां धुरि कथं श्लाघनीयः। तद्वृत्तान्तमनल्पमाकल्पकलितकलेवरो जल्पतु प्रतिभावितीर्णमानसः। तदा शुको ऽब्रवीत्। आकर्णय कर्णविश्रान्तलोचने। शकलाटो ऽसौ मन्त्री नन्दमहीपालस्य। स तु बुद्धिमतां धुरि धौरेयः। इत्थं तस्य तथाविधां प्रसिद्धिं निशम्य सम्यक्त्वासम्यक्त्वपरीक्षानिरीक्षणाय वडवाद्वयं न कुत्राप्यवयवविशेषे ऽपि सादृश्यादविद्यमानं रूपतो वर्णतः स्वभावत आकारतश्च प्रस्थापयामास दर्शनपातनं विधायान्यजनपदस्य परिवृढ इत्यभिधायैतयोर्द्वयोर्मध्ये का नाम जननी तनया च का। इति विवेचनं विधायास्मभ्यं ज्ञापयितव्यमिति। ततस्ते आगते अभिवीक्ष्य सर्वे ऽप्यहमहमित्यात्मनि परीक्षावैचक्षण्यं बिभ्राणाः परिवार्य वीक्षितुं प्रावर्तिषत परं न कश्चन निर्णेतुमीष्टे। राजा तदा शकलाटनामानममात्यं व्याहृतवान्। निर्धारो ऽयं भवतैव विधातव्यः। इतरथास्मास्वितस्मादेतदज्ञानजनितं महामन्दाक्षमुदेष्यति। तर्हि प्रभावति त्वमपि विचार्य व्याहर। स शकलाटस्तदा नन्दनरेन्द्रस्याज्ञां शिरस्याधाय कमुपा-

यमकल्पयत्। तदा शुकोदिता प्रभावती तद्विचारणाय चारु चातुर्यं दधानापि परं न विवेक्तुं प्रभवति स्म। तदा शुकमेव पुनरप्राक्षीत्। तदा शुकस्तद्व्याहरणाय प्रारभते स्म। प्रभावति मदुक्तौ सावधाना भव। तदा स शकलाटस्तद्वडबाद्वयमपि सपर्याणीकृतवान्। व्यायामं गरीयांसं च कारयामास तुरंगमादिभिः। तदनु पर्याणे पृथग्विधाय दामादिबन्धनमपाकृत्य नवतृणमेव चकितायां मेदिन्यां चरणाय व्यसाक्षीत्। तदानीं जननी तनयां रसनया लेढुं प्रावर्तिष्ट तनया च जनन्याः स्तन्यं पातुमुद्यत। इति निर्धारितवान्सचिवचूडामणिः। तर्हि प्रभावति त्वमप्येवंविधं कर्तुं निर्णयं पारयसि यदि तदा गमनाय यत्नं तनुहि॥

इत्यष्टपञ्चाशत्कथा ॥ ५८ ॥

पुनः प्रभावती पप्रच्छ शुकं शुको ऽभ्यधात्। धर्मबुद्धिवदुपायविवेचनं कर्तुमीशिषे यदि तदानीं साधयेप्सितम्। ततः प्रभावती शुकं धर्मबुद्धिवृत्तान्तमप्राक्षीत्। विहगो जगाद गिरम्। कनकपुरी नाम नगरी। तत्र धर्मबुद्धिदुष्टबुद्धिसंज्ञौ वणिजौ। तौ सहैव समभागेन द्रव्यमार्जयितुमेकव्यवसायेनैव निर्गच्छतः। तदनन्तरमार्जयित्वात्मनो नगरं पुनरागच्छन्तौ। तयोरेको दुष्टबुद्धिर्धर्मबुद्धिं बभाषे। समग्रं धनं कस्माद्ग्रामे गृहं नयावः। अर्धं धनं द्वयोः समभागावस्थितं विधास्यावः। तदर्धं ग्रामं नयावः। इत्यभिधायार्धं धनं तत्रैव बोधिवनस्पतिसमीपे स्थापितवन्तौ। तदनु पापबुद्धिरन्यस्मिन्दिने तत्र गत्वा द्रविणं तदाजहार। तद्धनमपहृत्यापरेद्युर्धर्मबुद्धिं बभाण। गत्वा तत्र स्थापितं द्रव्यमानयावः। तदानीं द्वावपि सहैव निरगाताम्। तत्स्थानमासाद्य द्रविणमालोकिषाताम्। तत्र द्रव्यमदृष्ट्वा तदा दुष्टबुद्धिर्धर्मबुद्धिमभाणीत्। त्वयापहृतं धनं त्वयापहृतं धनमित्युभयोर्विवादः प्रादुरासीत्। तदानीं राज्ञ आवेदनाय गतवन्तौ। तदा दुष्टबुद्धिश्च राजानं निजगाद। देव धर्मबुद्धिरयं केवलया संज्ञयैव परिगृहीतसाधुत्वाभिमानो मदपत्यानां ग्रासमग्रहीत्। राजा। कः साक्षी। दुष्टबुद्धिः। एतस्मिन्नर्थे ऽरण्यसमुद्भव अश्वत्थवृक्षः साक्षीभावे स्थितः। तं वादयित्वा सर्वेषां प्रत्ययमुत्पादयिष्यामि। तस्य तद्वचनं सर्वे ऽपि धर्मबुद्ध्य उररीकृतवन्तः। तदनु दुष्टबुद्धिर्निजसदनमासाद्य पितरं पिप्पलकोटरे प्रावेशयत्। तस्मै च संकेतं दत्तवान्। ततः प्रभातसमये संजाते राजपुरःसरः समस्तो ऽपि लोकस्तत्कौतुकालोकनाय जग्मिवान्। तदा तौ वादिप्रतिवादिनौ समागमताम्। तदनु दुष्टबुद्धिर्व्याहार्षीत्। परमेश्वरश्रीमहाविष्णुस्वरूपपिप्पलतरो यथास्ति तथैव सत्यतया व्याहरतु भवान्। को नाम तव पुरस्तात्स्थापितद्रविणमग्रहीत्। तदानीमश्वत्थतरोरुदतिष्ठद्वर्णात्मकः शब्दः। द्रव्यं धर्मबुद्धिना गृहीतमिति। तदाश्रुत्य सर्वे ऽपि विस्मयस्मितमानसा अवतस्थिरे। धर्मबुद्धिस्तु निग्रहस्थानमासेदिवान्। तर्ह्याचक्ष्व प्रभावति। धर्मबुद्धिः कमुपायं विधायात्मनः सत्यमापादयामास। तदा तद्वचनात्प्रभावती तद्विचारणाय प्रवृत्ता न जानाति स्म। ततः शुकमपृच्छत्। शुको ऽपि जगाद। आकर्णय प्रभावति। तदानीं धर्मबुद्धिर्व्यचारयत्। न तावद्वनस्पतिरसत्यं व्याहरति। अयं तु पिप्पलकोटरे कमपि मानुषं निवेश्य तद्वचनजनितो ध्वनिरयं प्रत्ययमापादयति। यथार्थं मध्यस्थानमामृश्य राजानं व्यजिज्ञपत्। देव क्षणमात्रमत्र स्थातव्यम्। मया द्रविणं तदश्वत्थकोटरे विन्यस्तमस्ति। तत्प्रभुणा पिप्पलकोटरान्तरमात्मीयमानुषं प्रवेश्य विश्वासभूतं धनमानेतव्यम्। इति विज्ञाप्य जनमेकं तदन्तः प्रावेशयत्। तत्प्रविश्य स तु दुष्टबुद्धिपितरमपश्यत्। दृष्ट्वा स तु कोटरादवतीर्यान्तः को वा निवसति न जाने। एक आस्ते मानुषः। तदा राजा कोटरास्थितं बलादाचकर्ष। दुष्टबुद्धिं तर्जयामास धर्मबुद्धिं मानयामास। तर्हि देवि कर्तुमेतादृशमुपायविशेषं यदि जानीषे तदा स्वचित्तचरितमाचर॥

इत्येकोनषष्टिकथा ॥ ५९ ॥

अन्येद्युर्दिनान्तोदये कुमुदकोशनन्दिनी विनयकन्दर्पनिकेतनं जिगमिषुर्द्विजं प्रश्नयति। तदन्ववादीत्पतत्री। देवि जयश्रीरिव बुद्धिवैभवं परिशीलयसि यदि तदा याहि। सा जयश्रियो वृत्तान्तमप्राक्षीत्। शुको ऽपि व्याजहार। मङ्गलवर्धनाभिधाने नगरे धनदत्ताभिधानो धराधरः। तस्यामात्यस्य कन्या जयश्रीनामधेया। एकदा तु तस्य नरपतेः संनिधौ विवदमानाश्चत्वारो देशान्तरादागताः पुरुषाः। तदानीं तानपृच्छन्नरेश्वरः। भवतां किंनिबन्धनो व्यवहारः। वयं देशान्तरं गताः। रत्नचतुष्टयं च तत्रास्माभिरलम्भि। तान्येकत्र स्थापितानि। ततो रात्रावेवैतस्यां न जानीमः किमजायत। चतुर्णामस्माकं मध्ये को नाम तानि गृहीतवान्। इति निशम्य व्याजहार। अमात्य एतेषां चतुर्णां मध्ये कतमो रत्नान्यग्रहीत्। त्वं सम्यग्विचार्य व्याहरतात्। इत्थं राज्ञाभिहिते सचिवस्तांश्चतुरो निजमन्दिरमानयामास। तेषां भोजनं च विश्रामस्थानं च प्रायच्छत्। ततस्ते प्रधानसहिताश्चत्वारो ऽप्युपविविशुः। ततः सचिवतनया जयश्रीस्तेषां विवादं पृच्छति स्म। क एते कस्मात्प्रदेशात्केन प्रयोजनविशेषेणात्रागमनमकार्षुः। सचिवस्तेषामागमनकारणं सर्वमवादीत्। तन्निशम्य जगाद जयश्रीः। अहमेवामुष्य रत्नचतुष्टयस्य गृहीतारं विचारयिष्यामि। तर्हि प्रभावति केनोपायेन विशेषनिर्णयं विदधाति स्म रत्नानाम्। सा विचारं कुर्वाणापि नावागच्छत्। तदा शुकं वक्ति स्म। शुको बभाषे। ततस्तेषां चतुर्णां रात्रावभ्यवहारो ऽजायत। ततो निद्राकरणाय पृथक्पृथक्स्थाने चतुरो ऽपि प्रास्थापयत्। तदनु तमस्विन्यामात्मानमलंकृत्यैकस्योपकण्ठमाजगाम जयश्रीः। तावत्तमवोचत्। मम मानसं भवद्दर्शनप्रभृति स्मरशराहतिविकीर्णधैर्यं भवति। भवन्तं विहाय न कंचिदप्यभिलषति स्म। यदि पञ्चशतं सुवर्णानां मह्यं दास्यसि तदानीमहं भवतः कुलपालिकात्वमङ्गीकरोमि। सो ऽप्यवोचत्। परमिदानीं पाणिगतं न किमपि द्रव्यमस्ति। अहमार्जयित्वा भवत्यै वितरिष्यामि। ततस्तन्निशमनात्सापि तं विहाय द्वितीयमनुससार। तमपि तथैवावोचत्। ततः सो ऽपि न किमपीत्यवोचत्। तथैव तृतीयोपकण्ठमासेदुषी तं तथैवावादीत्। ततः संप्रति मम हस्ते न किमप्यस्तीति तस्य व्यवहारमाश्रुत्य चतुर्थं पश्यति स्म दृशा धैर्यसर्वस्वहारिण्या। तं च तथैव प्राजल्पत्। ततस्त्वसौ अहं पञ्चाशत्सुवर्णपर्याप्तं वस्तुविशेषं दास्यामि भवत्या हस्ते। इत्यभिधाय पाणौ प्रादाद्रत्नचतुष्टयं तस्याः। सा च तद्रत्नचतुष्टयं गृहीत्वा अद्य त्वसाधुमुहूर्तं दिनं वर्तते प्रातस्त्वावयोरेकत्रोपवेशनाय सम्यङ्मुहूर्तमस्ति। इति तमभिधाय स्वगृहमागत्य रत्नानि जनकस्य हस्ते प्रायच्छत्। स तु सचिवस्तद्रत्नचतुष्टयं गृहीत्वा भर्त्रे समर्पयामास। राजा तु तेभ्यो दत्तवान्। तर्हि प्रभावति उपायमेवं कलयसि यदि तर्हि स्वसाध्यसिद्धौ दत्तावधाना भव॥

इति षष्टिकथा॥ ६०॥

पुनः प्रभावती पप्रच्छ शुकम्। तदनु शुको बभाषे। भूधरब्राह्मणवदायासनिस्तरणे प्रगल्भसे यदि तदा यातु भवती। सा भूधरवृत्तान्तं व्याहरेति व्याहार्षीत्। शुको ऽपि वक्ति स्म। देवि चमत्कारपुर्यां भूधरनामा ब्राह्मणो निवसति। स तु पङ्गुः। तत एकस्मिन्नवसरे समस्तैर्ब्राह्मणैः सह देवतादर्शनाय शकटारूढो निरगमत्। तदनु गच्छतां मार्गे दस्यव उदतिष्ठन्। ते सर्वे ऽपि बान्धवा दस्यून्दृष्ट्वापलायिषत। स तु चरणविहीनत्वात्पलायनसामर्थ्यमबिभ्राणस्तत्रैवास्थात्। तर्ह्याचक्ष्व प्रभावति। स तु भूधरः कमुपायं परिकल्प्य दस्युभ्य आत्मानमुदमोचयत्। तदा प्रभावती विचारयन्त्यपि न विवेद। ततः पञ्जरगतं कीरं पृच्छति स्म प्रभावती। ततो ऽवदच्छुको ऽपि। आकर्णय प्रभावति। सर्वान्स्वयूथ्यान्पलायनपरायणान्मलिम्लुचश्च धावतो दृष्ट्वा तदन्वेकाक्येव भूधरो वक्तुमुपाक्रमत धावमानान्पुनराकारयन्। अहो भवन्तः किमिति पलायनं कुर्वन्ति। तत्र च न सन्ति पश्चादशीतिशतपर्याप्ताः परिपन्थिकाः। एतेषां चतुःपञ्चषाणां भीत्या किमिति धावन्तः सन्ति। इयतामेतेषामहमेवालम्। शतहन्तीति

मदीयं विरुदं जगति प्रसिद्धम्। तदीयं वचनमाकर्ण्य चोराः वणां स्थित्वा तं विहायैव यथागतं निरगुः। तर्हि प्रभावत्येवंविधं बुद्धिवैभवं जानासि यदि तदा साधय॥

इत्येकषष्टिकथा ॥ ६१॥

पुनः प्रभावती प्रष्टुं प्रावर्तत शुकम्। शुको ऽप्यधात्प्रभावतीम्। भुक्कुण्डवदात्मनो मरणमन्यथा कर्तुं जानीषे यदि तदाङ्गीकरोतु भवती। तदा प्रभावती पप्रच्छ। भुक्कुण्ड इति को नामासौ। कथं मरणमन्यथयत्। तद्वृत्तान्तं व्याहरतां भवान्। प्रभावतीं प्रत्यवदच्छुकः। शृणु प्रभावति। सर्वतोभद्रं नाम नगरम्। तत्र भुक्कुण्डनामा कितवो निवसति स च सर्वदा द्यूतेन दीव्यति। एकस्मिन्दिने दीव्यन्प्रतिकितवैः पराजितः। तेषामङ्गीकृतपणार्पणाय न किमप्यस्ति। तदानीं चौर्याय प्रायतत। तदा चौर्यं कुर्वाणो रात्रिचरकैर्विधृतो ऽसौ। ते च तं राजसमक्षमानिन्युः। राजा च वधाय भटानादिष्टवान्। गच्छतैनं नीत्वा शूलप्रोतं कुरुत। तर्हि प्रभावति भवत्यपि व्याहरतु। केन प्रकारेणात्मनो मरणमन्यथयत्। तदा प्रभावती विचारवत्यपि नाज्ञासीत्। तदाप्राचीच्छुकम्। सो ऽब्रवीत्। आकर्णय प्रभावति। तदा तांस्तस्करो ऽभिहितवान्। राजा व्यापादयितुमुदितवानस्ति। यतो राज्ञामेव स्वाभाविको ऽयं धर्मः परिपालयितव्यो दुष्टाश्च नियमनीया इत्येतादृशं सारासारं विचारयति महीपतिः। तदानीमसावैहिकेनामुष्मिकेण च सुकृतेन संयुज्यते। अत एव मयि दण्डं पातितवान्। तत्सम्यगुचितं कृतवानसि। परं विज्ञप्तिरेका विद्यते। अहं श्लोकमेकं व्याहरामि तदाकर्णनायावधानं दातव्यम्।

भट्टिर्नष्टो भारविश्चापि नष्टो भिक्षुर्नष्टो भीमसेनो ऽपि नष्टः।
भुक्कुण्डो ऽहं भूपतिस्त्वं हि राजन्पङ्क्तौ भस्याम्यन्तकः संनिविष्टः॥

राजा एतस्य पद्यस्यार्थं व्याख्याहीति व्याजहार। ततो दस्युरवदत्। श्लोको ऽयं भविष्योत्तरपुराणे। एतस्यायमर्थः। तेषामादिवर्णो भकारः तेषु नामसु परिपाट्यामन्तकः संनिविष्टः। भट्टाचार्यमपि कलितवान्कालः। तदनु भारविमपि निगीर्णवान्कालः। भिक्षुं तथा भीमसेनं च कलितवान्कालः। एतांश्चतुरो ऽप्यग्रहीत्कालः। भुक्कुण्ड इति मदीयं नाम भूपतिरिति त्वदीयं नाम। मयि निहते त्वमेक एवावशिष्टो ऽसि। यावदहं भवतः पुरतो भवामि न तावत्कालकलितं भयम्। यथा जानासि तथानुसंधेहि। तदनु नृपतिस्तदाकर्ण्य मनस्येवमेवेति निश्चित्य तं चोरममोचयत्। तर्हि प्रभावति एतादृशमुपायविशेषं यदि जानीषे तर्हि विधेहि विधेयविशेषम्॥

इति द्विषष्टिकथा ॥ ६२॥

पुनरपि निशासमये विनयकन्दर्पसंनिधानगमनाय प्रेरयामास पतत्त्रिणं प्रभावती। तदा शुको ऽप्यभिदधे। देवि देवशर्मवत्संकीर्णावसरापाते यद्युत्तरं कर्तुं पारयसि तदा याहि। तदा प्रभावती बभाषे। देवशर्मा कथं संकीर्णां निस्तीर्णवानुत्तरविशेषकल्पनेन। व्याचष्टां भवानिति तया पृष्टः शुको व्याचष्टे। प्रभावति एलानगर्यामेलनामधेयो राजा राज्यं प्रशास्ति। तस्य संधिविग्रहकारी शिष्ट एको ऽभवत्। तस्य तनयो देवशर्मा। स तु पितरि प्रमीते स्वकीयं पौर्वापर्यमनपेक्ष्यानिरर्गलो यथारुचि व्यवहर्तुं प्रयतते। केषांचिदपि वर्षीयसां वचनं न शृणोति। तदन्वेलमहीपतिस्तमवजानाति स्म। राजा तस्मै न किमपि प्रयच्छति। इत्थं धनहारिभिः सीदत्कुटुम्बो ऽतीव क्षामतामापन्नः। ततो ऽमात्यो राजानं विज्ञप्तवान्। देव देवशर्मासौ श्रीमताममात्यभूतः। एतस्य चिन्ता न कर्तव्या। एतस्य कस्मिन्नपि कार्यविशेषे विनियोगो दातव्यः। यदि तद्विधेयं सत्तया समर्थितं तदानीं पुरस्तादेतदङ्गीकारं पुरस्कृत्याजीविका कल्पनीया। तदानीममात्यवचनान्नरनाथो निजप्रयोजनसाधनाय तमादिदेश। तस्मिन्प्रश्नति

पेशीद्वयमानीय भस्मना पूरयित्वोपरि राजमुद्रया मुद्रयित्वा देवशर्माणमाहूय त्वया शत्रुसूदनमेदिनीपतिसमीपं गत्वा एलराजेन वार्षिको दण्डः प्रस्थापितो ऽस्तीति अभिधाय तस्मै दातव्यमदः पेशीद्वयमित्युक्त्वा पेशिके ते देवशर्मणः पाणावर्पयामास। तेन राज्ञा समं सौजन्यमतितरामैधिष्ट। तथा विधातव्यं भवतेति व्याहृत्य देवशर्माणं व्यसाचीदेलमहीपतिः। तदा तदादेशाच्छत्रुसूदनमहीन्द्रं संगत्य तस्य पुरस्तात्पेशिकाद्वयं निधाय विज्ञप्तवान्। अमुं वार्षिककरमेलमहीपतिर्भवतां प्रस्थापयामास। इत्यभिधाय मुद्रामुन्मुच्य पश्यति पेशीद्वयं यावता तावता भसितपूरितान्तरमालक्ष्य शत्रुसूदनो मेदिनीपतिः कोपपरवशो भूत्वा शिष्टस्य शिरश्छेत्तुं मतिमकार्षीत्। तर्ह्याचक्ष्व प्रभावति। तथाविधे तस्मिन्समये देवशर्मा कं प्रकारमचीकरत्। ततस्तन्निशम्य प्रभावती विचारचातुर्यं बिभ्राणापि नाविन्दत। तदानीमतीतायां तमस्विन्यां शुकमन्वयुङ्क्त। ततः शुको व्याजहार। तदानीं देवशर्माभिधत्ते। देवास्मदीयो महीपालो यज्ञमकार्षीत्। तत्कुण्डसंभवां विभूतिं भवतामर्थे प्रस्थापितवान्। विभूतिरियं यत्र विद्यते तत्र दैवदशा राज्याभ्युदयस्य युगपत्संभवतः। ग्रहपीडाश्च नश्यन्ति। शत्रवो ऽपि मित्राणि भवन्ति। आयुश्च वर्धते। एतावन्तो गुणा विभूतेरस्या इत्यवधार्य एलामहीपालो युष्मत्कृते प्राहिणोत्। तदनु दूतोदितं निशम्य सम्यकसमतुष्यत शत्रुसूदनः। ववन्दे विभूतिं राज्ञीकुमारिकाणां मूर्ध्नि प्राक्षिपत्। राजा तं देवशर्माणं यथावत्संभावयामास। तर्हि व्याहरतात्। प्रभावति त्वमप्येतादृशमुत्तरं दातुमीशिषे यदि तदा मनीषितं कुरु॥

इति त्रिषष्टिकथा ॥ ६३॥

पुनः प्रभावती अभाषत नभोगं शुको ऽप्यवदत्। देवि सुमतिरिव संकीर्णनिस्तरणोपायं यदि वेत्स्यसि तदाभिसार आद्रियताम्। प्रभावत्या पृष्टस्तद्वृत्तान्तं शुको ऽपि रराण। आकर्णय देवि। मङ्गलपुरनाम्नि ग्रामे सुमतिर्नाम विपणिः। स धनार्जनायोद्यममुद्दिश्य प्रदेशविशेषे कुत्रचिद्गतो ऽभवत्। तत्र भूरिधनमार्जितवान्सधनः समागच्छन्मध्यमार्गे दस्यूनद्राक्षीत्। तर्हि प्रभावति व्याहर। तदा स कथंकारमुपायविशेषं विशेषयति स्म। तदा प्रभावती विचार्य नाज्ञासीत्। तदा प्रातः शुकमप्राक्षीत्। शुको ऽप्यवोचत्। देवि निशम्यावधत्स्व। स तु दस्यून्दृष्ट्वा समीपस्थितं गणेशप्रासादं प्राविक्षत्। तत्र गणेशमूर्तेः पुरस्तादुपविश्य द्रविणपेटिकां विवृत्य तदन्तःस्थितं धनं बहिर्विधाय पञ्चकीकरणेन पङ्क्तिषु तद्धनं व्यक्तवान्। ततो घटिकां गृहीत्वा गणाधिपमभ्यधाद्वक्ष्यमाणप्रकारेण। देव विघ्नराज इदमात्मीयं धनं गृहाण। इदमेतावत्प्रथतो भवतो धनम्। अयं लाभो जातः। अनेनैव संचरतः चत्वारि हायनान्यजायन्त मम भवदीयां सेवां कुर्वाणस्य। अहं च तव वाणिज्यकर्ता सत्यमसत्यं सेवां तावज्जानानो ऽस्मि। मदीया सेवा भवदायत्ता। एतादृशानि वचांसि दस्यव अश्रौषुः। ततः परस्परमभिदधिरे। अयं वणिक् देवस्य वचनकर्ता। एनं यदि निरीक्षामः तदानीं देवो ऽप्यस्माकमुपरि कमपि तादृशं विघ्नमापादयिष्यति यादृशेनास्माकं सर्वनाशो भविता। इत्यभिधाय वणिजं तत्यजुः। यदि प्रभावति त्वमपीदृशोपायकरणविचक्षणासि तदा साधयेप्सितम्॥

इति चतुःषष्टिकथा ॥ ६४॥

*

* *

* * * तस्मिन्वटे उलूका निवसन्ति। कदाचन रात्रौ पारणाय निरगुः समन्ततः। तेषां मध्यादेकोलूको भ्रान्तो मार्गं विहायैकस्य वटस्योपरि पर्यपतत्। तदा तत्र दिवसो ऽजायत भानुरप्युदयाचलमारुरोह। दिवान्धो गृह्णाति नासौ रूपं चक्षुर्भ्याम्। तदा वटस्योपरि काका अभूवन्। तैः पराभूतो ऽसावुलूको जीवशेषो आपादितः। तदनु मृतो ऽयमित्यभिधाय तत्यजुस्ते उलूकम्। ततः शनैः शनैरुलूको निजस्था-

नमाजगाम। तदनूलूकराजानं व्याहार्षीत्। भवतु सर्वेषु विद्यमानेषु वायसाः संभूय मां तर्जयामासुः। तर्हि भवद्भिस्तेषां मन्निमित्तो निष्कासनप्रकारः प्रत्यपकारस्य कर्तुं शक्यते यदि तर्हि क्रियताम्। ततस्तदीयं वचनं निशम्य सर्वे तज्जातीया बान्धवाः काकान्निहन्तुमुदचलन्। समागत्य तं वृक्षमवेष्टयन्। तत्रवसतीन्काकान्सर्वान्निजघ्नुः। तदनु सर्वे ऽप्युलूका निर्गत्य निजधानीं जग्मुः। तेषां मध्यादेको वायसो ऽवततार। सर्वेषु मार्यमाणेषु काकेष्वसावेक एव कुत्रापि दलगहने निलीयात्मानं जुगोप। तदनु तदाक्रन्दनं दृष्ट्वा बलिपुष्टानामतिकष्टां दशां मनस्यनुभूय किंचिद्धैर्यमवलम्ब्य परामृश्य विमृश्य च विधेयविशेषं किमतः परं कर्तुं शक्यते। ते ऽस्मद्वैरिणो भूयांसः पूर्वकानां च वैरं केन बुद्धिविस्तरेण प्रतिकर्तुं शक्येत। इत्यभिधाय तेषां निशादर्शिनामेव पार्श्वं वव्राज। तत्र गत्वा तेषां पुरस्तादपतत्। तदा तैरवादि। कस्त्वम्। सो ऽभ्यधात्। भवतां शरणमागतो ऽहं दासानुदासः। भवतामेव चरणान्मनसि धृत्वा समायासिषम्। ये च दुष्टा भवतां वैरिणो ऽभूवंस्ते सर्वे भवद्भिस्तु व्यापादिताः। इदानीमहमेक एव द्वारि स्थितो भवतां वरिवस्यां निर्वर्तयिष्यामि। निघ्नन्ति यदि निघ्नन्तु माम्। यदि वा गोपयन्ति तदा गोपयन्तु। तदिति तस्य वचनं निशम्य केचिद्वादिषु। अरिरयमस्माकमतीव विषमः। * * * * * इति व्याजह्रुः। क्रममाणो ऽयं तर्हि किं नामायं वराको वै करिष्यति काक इति तेषां पृथग्मतीनां वचोभिरन्तर्मायो ऽसौ तत्रैवातिष्ठत्। तदनु तत्र स्थित्वा तान्व्याहार्षीत्। मदीयः कश्चिदुपचारो भवतां भवितव्यः। अहं भवतां कृते शय्यां साधीयसीं कल्पयिष्यामीत्यभिधाय शाल्मलतूलेन स्वच्छेन तस्य विटपिनः सर्वमपि कोटरं पूरितवान्। रात्रौ स्वयं द्वारि निवसति। इत्थं तृणादिसंग्रहं च सम्यक्कृतवान्। तदनु कस्मिंश्चिद्दिने ज्वलन्तीं चितां विलोक्य तत्रत्यमलातमेकमाहृत्य कोटरद्वारि प्राक्षिपत्। कोटरान्तर्गततूलतृणादिकं दहनसादभवत्। समस्तानपि दिवान्धानधाक्षीत्। इत्यमसौ पूर्ववैरमसाधयत्। तर्हि सोमदत्त तादृशप्रकारो ममापि भविष्यति। येन समं पूर्ववैरमस्ति सो ऽपि न विश्वसनीयः॥

## इत्यष्टषष्टिकथा ॥ ६८ ॥

पुनः प्रभावती प्रष्टुं प्रावर्तत पतत्रिणम्। शुको ऽभ्यधात्। देवि तदा सा धूर्तचकोराभिहिता वार्ता सोमदत्तस्य मानसे न स्थानमातनोति। तदनु सोमदत्तस्तं धूर्तचकोरं कामसेनासंनिधानं निनाय कामसेनाहस्ते तत्पञ्जरं प्रादात्। सा च देवसेनां कुट्टिनीं प्रति तद्वृत्तान्तमभ्यधात्। तदनु तन्निशम्य सा जगाद। अद्य मम ललाटतटघर्मः परामृष्टः। ततः प्रभाते कुट्टिनी राजमन्दिरमगादस्याः पुरस्तादित्यावेद्य शुको ऽयं निहन्तव्यः। एतदीयं मांसं साधुरुचि पक्तव्यम्। इति तस्यै निदेशं दत्त्वा निरगात्। तदनु दासी कीरमानीय केशानुल्लुञ्चितुमाददार। तर्हि वावदीहि प्रभावति। स शुकः केन प्रकारेणात्मानं जुगोप। तदा प्रभावती चारु विचारं कुर्वाणापि नाज्ञासीत्। तदनु तया पृष्टः शुकः पुनर्जगाद। शृणु प्रभावति। तदा दासी मारणाय तमादृतवती। तदनु शुको दासीं जगाद। त्वमतीव साधीयसी। व्यसनं तव धर्मपरमेव। भवदीयौ हस्तौ प्राणिनां वधे अमोघमौ। तर्ह्यहं किमप्यनागतं जानामि। तद्भवत्याः पुरस्तादावेदयामि तवैव हितम्। तदनु त्वं मां व्यापादय। तदन्ववादीद्दासी। तर्ह्याचष्टां नाम भवान्। तदाभ्यधात्पत्री। त्वमेतस्य मांसस्य मध्ये गरीयसीं संपदमवाप्स्यसि। त्वं यथा चार्वङ्गी भविष्यसि तथौषधं दास्यामि पश्चाद्वास्यामि तव वशम्। तुलसीदलं कुशदर्भांश्चानय गोमयोपलिप्तायां भूमौ कुशानास्तीर्य तुलसीदलं गृहीत्वोपविश्य कंचन मन्त्रं स्मृत्वा तदौषधमाकर्षयिष्यामि। आत्मीयमायुरखिलमपि भवत्यै वितरिष्यामि त्वं शुचिर्भूत्वा समागच्छेत्यभिहिते शुकेन दासी तद्भेषजाकर्षदिदृक्षया तदुक्तं सर्वमनुतिष्ठति। तदनु तुलसीदलाद्यानेतुं गतां दासीं निरीक्ष्य शनैः शनैर्गत्वा स्नानभूमिकायाः प्रणाल्या निर्गतवान्। इति ब्रुवन्नैषीदनैषीन्मार्जार इति वीप्सावचनं वितन्वन्द्रुमकोटरमाजगिमवान्। एतच्छब्दश्रवणात्तूर्णमागत्य दासी कीरं न पश्यति स्म। परितो दत्तदृष्टिरपि

नाद्राचीत्। तन्नीत्वा कीराभावात्तित्तिरिविहगमेकं निहत्यापाचीज्ञोजनाय तस्याः। तर्हि प्रभावति त्वमप्येतादृशं बुद्धिवैभवं विधातुं प्रगल्भसे यदि तदा विधेयं विधेहि॥

इत्येकोनसप्ततिकथा ॥ ६९ ॥

